॥श्रीगणेशाय नमः॥ यत्र अर्थात्मकत्वाद्युपाधिकरहितो भास्करस्य स्थितत्वात्तं पूर्णज्ञोतमार्गे विवि
धयजनकत्वकर्मसंतुष्टत्वात्॥ ब्रह्मादौ सात्विकत्वात्प्रकृतिगुणाश्चयेवा मुमुक्षाश्रयत्वाद्धर्मस्य स्था
यकत्वाच्च नितिविषय विदेविस्वमेवाश्रयामि॥१॥ एवं॥ स्मृत्वा विष्णुं जगन्नाथं गुरुं नत्वा स्वबुद्धितः॥
व्याख्यामात्मार्कबोधस्य स्वग्रंथस्य करोम्यहं॥२॥ निर्विघ्नं प्रग्रंथपरिसमाप्त्यर्थं ग्रंथकृत्तत्त्वात्मकं मंगल
माचरति प्रणम्येति प्रणाम्यपि तत्पत्यग्र ध्यात्वा देवमहेश्वरं॥ आत्मार्कबोधमिच्छामि स्वांते द्वादशविशुद्ध
ये॥३॥ यितत्पत्र जनकचरणाः पदं प्रियश्वराणि स्त्रियामित्यमरः पद्ममिवकमलमिव तत्प्रणाम्य भक्तिश्रद्धा
भ्यां नमस्कृत्य एकवचनं नतु वंदे महापुरुषेत्तरणाशिवं दमित्यादि वतं किं च देवप्रकाशकं महेश्वरं सर्वसा
सेव्यं ध्यात्वा एकाग्रेण मनसा स्मृत्वा स्वांते हृदि विशुद्धये स्वांते द्वादशैनामनश्च द्वारादीनां स्वांते हृत्मान
मनदूत्यमरः विशुद्धये नितरां निर्मल्याय आदि शब्देनेंद्रियग्रहणं निर्मल्यं तु मनश्चक्षुरादीनां बाह्य विषय
परित्यागेनात्ममात्रविषयकत्वं तच्चात्मार्कबोधे सत्येव भवति आत्मा केस्यपरप्रेमास्पदत्वात् तदुक्तं वि
ज्ञात्पुत्रः प्रियः पुत्रात्पितुः पिंडाज्जथेंद्रियं॥ इंद्रियेभ्यः प्रियः प्राणाः प्राणात्मा प्रियः परइति आत्मा बो
धं आत्मार्कमन्यस्वानि च्छामि करोमीतिवक्तव्ये इच्छामीतिवचनं दुर्लभत्वप्रसिपादनाय नेन्वी तत्सा बो

मित्यत्रात्मार्क इवात्मार्क इत्युपमित समासे आत्मनः प्राधान्ये आत्मैवार्क आत्मार्क इति मयूरव्यंस
कादित्वात्समासे अर्कस्य प्राधान्यमेवसन्निकिं अयमुक्तिचेत्तदुभयमपि अत्रोपास्यत्वेनार्कस्य प्राधा
न्यविवक्षितं उपासनाजन्य ज्ञानद्वारा मोक्षरूपफलभागितयात्मनः प्राधान्यं तथा चात्र ग्रंथे कुत्र
चित्सूर्यं चंद्रबुधशुक्रशनिगुरुभौमानां प्राधान्येन वर्णनं कुत्रचिन्मम मनः श्रोत्रत्वक्चक्षुरसनघ्राणा ८
नां प्राधान्येन कुत्रचिदुभयेषां प्राधान्येन तत्तदुपयोगं भवमुपरिष्टात्स्फुटीभविष्यतीत्यत्रात्मार्कयोः सा
दृश्यवर्णनेमाचाविदुषामप्रवर्तनत्वात् अधुनातद्वर्णनमयुक्तमिति चेन्न इत्यनइति पदस्य व्याख्यावसरे उदा
तां प्रयत्रात्मस्वरूपाणि दृश्य चिंताद्वर्णनेयास्का चार्यस्य प्रवर्तत्वात् तथा हि यत्रा स्वरूपाणि अमृतस्य भागम
निमेषविदथाभिस्वरंति॥ इनो विश्वस्य भुवनस्य गोपाः समाधीरः पाकमत्राविवेश॥ यत्र सुपर्णाः सु
पतना आदित्य रश्मयो मृतस्य भागमुदकस्यानिमिषंतो वेदनेनाभिस्वरंतीति वाभिप्रयंतीति वेश्वरः सर्वे
षां भूतानां गोपायिता आदित्यः समाधीरः पाकमत्राविवेशेति धीरो धीमान्पाकः पक्तव्यो भवति विपक्वप्रज्ञ आ
दित्य इत्युपनिषद्वर्णो भवतीत्यधिदैवतमथाध्यात्मं यत्र सुपर्णाः सुपतना इंद्रियाण्यमृतस्य भागं ज्ञान
स्यानिमिषंतो वेदनेनाभिस्वरंतीति वाभिप्रयंतीति वेश्वरः सर्वेषामिंद्रियाणां गोपायितात्मा समाधीरः

आत्मा: २

याकमत्राविवेकेशोति धीरो धीमान्पाकः पक्वो भवतीति विपक्वप्रज्ञ आत्मेत्यात्मगतिमावच्छ इति सउक्तरू
पस्तूपः पाकं आत्मा चैमां शोध्यचित्तं मामित्यर्थः [illegible] उपनिषद्रूपो गोप्यस्वरूपः उपनि
षद्रूपस्य स्वरूपनिषद्वाविवेकेनेन वर्णितेनाप्यत इति व्याख्यानात् शेषं स्पष्टं अक्षरेणैव बोधनपूर्वा
धनमसेहते॥ तत्र आविर्भवेदात्मा स्वयमेवाशु मानिवेत्यादिवचनाच्च॥ नत्वेति उपजातिवृत्तं वा एतत्
उपजातिवृत्तिलक्षणात् तं नत्वा स्वमान्यान्निखिलश्रुतिज्ञानुदारचित्तान्निजनरदपालून्॥ गोविंदशर्मा कुरु
ते त्रपलंसंतास्तुखार्थं गतमत्सराणा॥४॥ गोविंदशर्मा गोविंदः कृष्णः शर्म शरणं सुखं साधनं वा आत्मा
यो वा यस्य सः ग्रंथकृत् अत्रात्मा कर्ता धेयपलंतत्प्रतिपादकं ग्रंथं कुरुते आत्मनेपदं फलसाध्यस्य फल
स्य स्वगामित्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफल इति सूत्रात् ननु कस्मै प्रयोजनायेत्यत आह स
तां सुखार्थं ब्रह्मविदां हर्षायेत्यर्थः ननु सन्मार्गवर्त्तिसाधिनः सम्प्रदस्य ब्रह्मविद्रूपविशेषवाचित्वं किं
प्रमाणमितिचेन्न असंश्च वसभवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरिति
श्रुतेः प्रमाणान्वीतकीदृशानां गतमत्सराणां गतो विनयादिभिर्नष्टो मत्सरः परोत्कर्षासहनं येषां तेषां किंभू
त्वा स्वमान्यान्नत्वेस्य पूज्यान्नत्वा मान्यत्वे हेतुः निखिलश्रुतिज्ञान् सकलवेदार्थविदः उदारचित्तान्कोपरा राम

२

रहितान्नितरां रस्यालून आत्मीवपरदुःखदूरीकरणशीलान्॥४॥ प्रयोजनांतरमाह विद्यावतामिति वसंततिल
कावृत्तं वसंततिलकोत्तोज्ञा विति लक्षणात् विद्यावतां विनयबोधयुजां द्विजानामापद्विनाशरसिकंप्र
भुमात्मभाजां॥ धर्मप्रधानमवनीश्वरमानपात्रं कृष्णं प्रसादयितुमप्यनिशं स्वतंत्रं॥५॥ विद्यावतां विद्या
ज्ञानं तद्धेतुः पुराणादिग्रंथाध्ययनं तद्वतां विनयबोधयुजां पूर्वोक्ताध्ययनजन्यनम्रताज्ञानयुक्तानां एते
न सम्यगाराधिता विद्याप्रबोधविनया विवेति रघुवंशे व्याख्यातः द्विजानां ब्राह्मणानां आपद्विनाशरसिकं
विपत्तिध्वंसे तत्परं आत्मभाजां स्वसेवकानां प्रभुं पालकं धर्मप्रधानं श्रुतिस्मृतिविहितवर्णाश्रमधर्मस्य
स्थापकं यद्वा युधिष्ठिरेकमुख्येषु सकलकार्येषु तत्सहायत्वात् चावनीश्वरमानपात्रं अराजत्वेऽपि राजसूये
यज्ञे राजपूजायाः प्रथमस्थानं कृष्णं वासुदेवं अनिशं निरंतरं प्रसादयितुमपि प्रसन्नं कर्तुमपि अपिः समुच्च
यार्थे कुरुतादिति पूर्वेणान्वय इति भावः पुनः कीदृशं कृष्णं स्वतंत्रं स्वाधीनं स्वोपाधिमायानधीनमिति यावत् न
व्याः कंचुलिकापसारणभुजाक्षेपस्खलत्कंकणक्वाणाः प्रेम तनोतु वो नववयःपालास्यापवेणुस्वन इति वदेत्
अतएव कृष्णस्य पूर्णब्रह्मत्वं तदुक्तं भागवते कृष्णस्तु भगवान्स्वयमिति न चात्र समाप्तपुनरात्तत्वदोषः कै
कारः स्मरकामुकस्यस्तु रत्नौडायिकीनारदोक्षकोशरतिमंजरी मधुलिहां लालाचकोरध्वनिः॥ तथा चम

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

आत्मा: २ ये ब्रह्मं प्रतिनारदस्योक्तिः उदाराणगगनि रोम्बुजं ज्ञेनेरमीशानपूर्वविशेषणानि मायामनुष्यस्य दर्दरंतु ब्रह्म
रूपस्येत्पर्थे नात्ययीतमक्षुरस्नजयाति दुर्गम्।। उपेयुषो मोक्षयंथमनस्विनस्त्वमग्रम्भूमिर्निरयायसंश्रयेति
पद्धा अनिशंस्वतंत्रसर्वदामायासंबंधशन्यस्वप्रकाशत्वात्मुमुक्षुणां सगुणं ब्रह्मोपास्यं तत्रस्थिरचित्त
स्यतस्यनिर्गुणब्रह्मप्राप्तिर्भवतीतिभावः॥५॥ अयमिति अयंग्रंथः संतः सकलदुरितध्वंसजननीमतिसम्य
ग्ज्ञानोवितरतिसदावेदविषया॥ कृपांकृत्वानस्मान्पयिनमतिंविमलदृग्भिर्गतमदैः॥६॥ नधिपः सशोऽध्यायीभिः कृपामाभिःश्रु* शिखरिणीवृत्तं शिखरिणीयेमानसौन्लौगः हेरुद्रादूतिलक्ष
णात् हे संतः हे ब्रह्मविदः अयंवक्ष्यमाणरूपः ग्रंथः शब्दसंदर्भः सम्यक् निर्मत्सरेण कायेण मनसा ज्ञा
नः विचारितः सन्सकलदुरितध्वंसजननी [redacted] आत्मा कर्भेदमासकदोषरूपसर्वपापविनाश
हेतुर्वेदविषयांवेदः वेदार्थः सच्चिदानंदात्मक [redacted] मोदितोयब्रह्मतत्त्वश्रवणमतिं बुद्धिंस
दानिरंतरंवितरतिददातितस्मात्ब्रह्मबुद्धिदानात्मन्मेनमनशीलेन [redacted] नामिकंपिस्मानसकमदेहदृपा
रदृतिमाच्छील्यादिषड्भेदृरमत्सपः मि अधुनापिनमतिनमस्कुर्वतिपुष्मानु त्कृष्टत्वेनजानातिमयिग्रंथ
प्रतिरूपांप्रीतिंकृत्वाहेभूताधिपः हेपंचप्रज्ञाः पंडिताः श्रुतिविमलदृग्भिः वेदार्थपरिशीलनेनकार्यरयादि राम ३

दोषरहितबुद्धिभिः अनएवगतमदैर्निरभिमानैर्युष्माभिर्विवेकिभिः सः पूर्वोक्तगुणकोग्रंथः शोध्यः विचा
रणीयइतिप्रार्थना॥६॥ इदानींग्रंथविषयप्रयोजनाधिकारिसंबंधानदर्शयन्नाह इहेहीतिमालिनीवृत्तं मा
लिनीनोम्योयेतिलक्षणात् इहहितरणिरात्माचंद्रमाश्चित्तमेववदतिमुनिगणोऽमौचैकवासंरवीदौः॥
कृतमतिसुखमत्रआद्भुमाद्रुः पिहत्सांभवतियदपवर्गद्वारमात्मैकभावात्॥७॥ इह आध्यात्मविवेकप्रपंचेतर
णिः सूर्यः द्युमणिस्तरणिः सूर्यश्चित्रभानुर्विरोचनइत्यमरः आत्माभवतिइहखलुरविरात्मेतिवक्ष्यमाणत्वात्
वचनं संसारसिंधुतरणोपायः सूर्योपासनंभवेतिज्ञापनार्थं चंद्रमाश्चित्तंमनोभवतिचित्तंतुचेतोहृदयंस्वांत
हृन्मानसंमनइत्यमरः एवमनेनप्रकारेणमुनिगणऋषिसमूहो ब्रूवदतिशिष्यान्प्रतिकथयतिहिप्रसिद्धं तथा
च श्रुतिः सूर्य आत्माजगतस्तस्थुषश्चेतिवागग्निश्चक्षुरसौ वादित्यश्चंद्रमामनोदिशः श्रोत्रमितिब्रा
ह्मणं च एक आत्मा बहुधा स्तस्य तस्य कस्या त्मनो न्यदेवाः प्रत्यंगानिभवंतीति निरुक्तं च लग्नमात्मा मनश्च
द्रइत्यादि वचनं चएतेनवाच्यवाचकभावः संबंधोदर्शितः रवींद्वोः सूर्यचंद्रयोरेकवासं एकस्मिन्क्षेत्रे
स्थितिममाममावास्या चवदतिमुनिगणाः अत्रामावास्यायांकृतं विहितंसूर्योपरागप्रयुक्तं चश्राद्धंपितृ
दृश्यैनक्रियमाणंवैधं कर्मपितृणांवसुरुद्रादित्यानां अतिसुखंबहुतृप्तिकरं आद्युः उपरिशतियाज्ञ

श्रा॰त्मा॰
४

वल्क्यादयः ननु सर्वेषां स्वस्व[illegible]पितृत्वप्रयेप्सवृत्तिर्दृश्यते तथा च तेषामेवाति सुखमिति वक्तुमुचितं किं
वस्वादिरूप्येति चेन्न वस्वादीनामेव तत्तद्देवतात्वात्तथा च याज्ञवल्क्यः वसुरुद्रादितिसुताः पितरः
श्राद्धदेवताः॥ प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेन तर्पिता इति अत्रेदं बोध्यं अस्मिन् जन्मनि जन्मान्त
रे वाऽभ्यस्तशमतप आदिसाधनैर्निर्मलमनसा वेदार्थविदामात्ममनः श्रोत्रत्वक्चक्षूरसनघ्राणवाक्पा
णिपादपायूपस्थेषु सूर्यचन्द्रदिग्वातादित्यवरुणाश्व्यग्नीन्द्रोपेन्द्रमित्रप्रजापतितादात्म्योपासनया तद्रू
पतापत्तिः यावन्तो वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दि
वे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति इति श्रुतेः तथा च आत्मभूत आदीनां प्रत्यात्म
भिन्नत्वेऽपि देवतानां सर्वत्राभिन्नत्वाद्वेदविदि ब्राह्मणे तत्सत्तादेवतास्तत्प्राः सत्योज्ञानयोगे नदेवद
तादिपितॄन्स्तर्पयति तत्र ब्राह्मणभोजनाशस्यतारतम्यप्रयुक्तं पितृत्वमिता[illegible]रतम्यमिति यद्यपि सौन्कारणा
दात्मैकभावात् आत्मनोऽनात्मत्वे न ज्ञानयोः सूर्यचन्द्रयोः सूर्ये चन्द्रस्य लीनत्वेनैक्यात् श्राद्धपूर्वोक्तमपव
र्गद्वारं मोक्षहेतुरन्यत् दुःखनिवर्तकमित्यर्थः अयं भावः यथा भूलोके दृश्यावान्तरमास्माकं रवमध्यग
तेऽस्य मध्याह्नः तथा चन्द्रमण्डलेऽकरेशानाम्नां पितॄणां तदानीं मध्याह्नः सूर्यस्य तत्र वमध्यवर्तित्वात्तथा राम
४

तदा भोजनेनात्र तृप्तिः तथेह पुत्रादिभिर्दत्तं तद्वस्तूपस्थितं तेन तेषां तृप्तिः उपरागे तु तेषां केवलो मध्याह्नं तदानी
तेषामति दुःसहः अतो नितु सुखमन्यदा ततः पूर्वं क्रियमाणं सुखं तथा चानयोर्लोकयोर्दुःखमेव दूरतः सर्वमुप
दिष्टात्सुकृतकारिष्यते अथेहात्यात्मिके आत्मान्तराणि भवति चित्तं चन्द्रमा भवति एवं वदन्ति मुनिगणाः रवाद्धेः आत्ममन
सोरेकवासमेकस्यानात्मनां वा संनिवेशः आमां च वदन्ति मुनिगणाः आमात्मा ब्दे नात्र सुषुप्तिः कदाचित्समाधिः न हानीमानां
ज्ञानानाममात्रात्मा शब्दस्यमिति वाचकत्वात् अत्र सुषुप्तौ हि तत्सुपुरुषाधिकारिणो जीवा लोकंपादिते श्राद्धप्र
द्धपाविहितं सकलं कर्म पितॄणां विश्वतेजसप्राज्ञानां अतिसुखमाद्यपद्यस्मादपवर्गद्वारफलप्राप्तिकाणां अप २
वर्गत्वतीये नि सूत्रेण व्याख्यानात् भवति तस्मादतिसुखमित्यर्थः समाधिस्थः कृतं नु तेषां सुखसमाधिनानन्व
ज्ञानोदयेन तेषां नाशं भवात्पद्यस्मान्मोक्षकारणं भवति आत्मैकभावात् आत्मनि तदानीं सहजिकान्तः करणलयप्र
देकस्यात्मनः सत्वात् सुषुप्तिसमाधौ तु तमः प्रकाशभेदादेदः सूक्ष्म त्रावधेय आ[illegible]धिदैविके परप्रत्यक्षप
चप्रत्यक्षं तदाध्यात्मिके प्रत्यक्षमप्रत्यक्षं चतुर्भपत्रयत्र किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा॥ अन्तर्बहिश्च
सर्वव्याप्य नारायणाद्गुणस्थित इति श्रुतेः यथामुत्र स्वपोदयोग्रहा अग्निस्पृष्टादीनि तत्स्तु प्रत्य[illegible]क्षाणि
तथात्रात्ममनबुद्धिप्राणिनाडाश्चेन्द्रियगणाद्याः यथा च स्वपादानां कर्मणां नेन्द्रियेभ्यो हाणि किं तु अ

त्राणि

आ॰ त्मा
५

निगम्यान्येव तथा चात्मादीनां कर्माणींद्रियग्रासणपि न गम्यानि निगम्यान्येव तत्रान्वयविशेषः अमुत्र दर्शः सर्वदाक
दा चिदुपरागः अत्र तु सुषुप्तिः सर्वदा कदाचित्समाधिः परंतु आत्मनि सूर्ये च सुषुप्त्युपरागयोः संबंधाभावोस्य कर्म
हितात्मनां तस्मात्सर्वथा जन्मवतां तदर्थं यतनीयं ॥७॥ सपंचेति पृथ्वीवर्जं पृथ्वी त्रिंशो त्रिंशो लोगवस्तु नवकाविति ल
क्षणात् स पंचदशवासरैर्भवति पौर्णमासी ततो महीप्रभृतिपंचभिर्दशभिरिंद्रियैः सा तनुः ॥ निगद्यते इमां मनो विधु
रवाप्य लोके यशःप्रभाकर इति स्फुटं सततमापरव्यात्मनः ॥८॥ यथाधिदयज्ञस्थालीपाकादौ कर्माणि पंचदशभिः
समिद्भिरग्नेः पूर्णा तनुरुच्यते तथा चात्र विनियोज्यामंत्रः अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध व
र्द्धय चास्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेति तथात्र ततोमावास्यातउपरागतो वा स पंचदशवा
सरैः पंचभिः सह वर्तमानास्ते चतुर्दशवासराश्चैतैर्दिनैः पौर्णमासी भवति सा तस्य चंद्रस्य तनुः मूर्तिर्निगद्यते
कथ्यते मनो विधुर्मनएव विधुश्चंद्रः इमां पूर्णां तनुमवाप्य प्राप्य परव्यात्मनः रविः सूर्यः आत्मैव तस्य लोके
ज्योतिर्मये वा सततं निरंतरं स्फुटं प्रसिद्धं प्रभाभाकर इति प्रकाशक इति यशः कीर्तिमाप प्राप्तवान् अथवा आ
त्मनः समाधितः सुषुप्तितो वा महीप्रभृतिपंचभिः पृथिव्यादिपंचभूतैः आदिशब्देनाप्तजोवायवाकाशानि दशभि
रिंद्रियैः श्रोत्रत्वक्चक्षुरसनघ्राणैः पंचभिर्ज्ञानेंद्रियैः वाक्पाणिपादपायूपस्थैः पंचभिः कर्मेंद्रियैः तनुः पूर्णा ५

MEMORIAL

निगद्यते इमां तनुं मनो विधुः विधुसदृशं मनः अवाप्य रविसदृशस्यात्मनः लोके देहे सततं स्फुटं प्रभाकर इति चैत
न्यकर इति यशः आप यथा सूर्य एव प्रभात यथात्मैव चैतन्यमिति सिद्धांतः तदुक्तं अथाप्यस्यैव कोशस्य चंद्रमसः प्र
तिदाप्यत इति निरुक्तेन यथा आत्मचैतन्यमात्मन्यदेहेंद्रियमनोधियः ॥ स्वकार्याय ते सु वर्तंते सूर्यालोके यथा
जना इत्याचार्यैः तथा च चंद्रमनसोः प्रकाशवत्त्वमिति तु लोकानामांतरे वेति भावः ॥८॥ लोकास्तमिति प्रहर्षिणी
वृत्तं प्रहर्षिणी म्नौ ज्रौ ग्त्रिकदशकाविति लक्षणात् लोकास्तं सकलकलानिधिं प्रसन्नं संप्राप्यातुलसुखमाप्तु
रंगनाभिः ॥ संसारे जडमतिभाव तो जितसक्ता मन्यंते स्म च परं विधुं न भानुं ॥९॥ लोकाः संसारिणो यथा सकलक
लानिधिं पूर्णबिंबं प्रसन्नं निर्मलं तं मनो विधुं चतुरमनःसदृशं रत्युपकारिणं संप्राप्य सुखत्वेनाश्रित्य अंगनाभिः आत्मक
ल्याणाद्यनुशासनात् मन्वर्थी योगशब्दो न त्वन्यत्र तथा च कमनीयाभिर्विलासिनीभिः स्त्रीभिः सह अतुलसुख
बहुरतिसुखमापुः प्रापुः किंच जडमतिभावत ४ आत्मपरमानंदविमुखबुद्धित्वात्संसारे मायाप्रपंचे आतिसक्ताः
तत्रैव तत्पराः संतः विधुं चंद्रं परमं स्वेष्टसाधकं मन्यंते स्म निश्चितवंतः भानुं सूर्यं परमं न मन्यंते स्म भानावुदिते स
तिनेषां दुष्करस्नानसंध्याग्निहोत्रहोमादिकर्मणा आवश्यकत्वादिति भावः तथा लोकयते दृश्यंते नेभोमाद
योग्रहाः सकलकलानिधिं प्रसन्नं तं मनो विधुं मनःसदृशमिमं विधुं संप्राप्य स्वसमीपं आसाद्य अंगनाभिः स्वकीय

भानुंखतापकत्वेन कांतिहरत्वेन च परमं नमन्यंते स्म ३

आत्मा
६६

भिः अतुलसुखमातुः प्रसन्नाः दर्शनीयाबभूवुरित्यर्थः शोभातिशयात् किंच संसारे संसारसदृश्यां तमः प्र
धानायां रात्रौ जडमतिभावतः उलयोरभेदः जले खमंडुले मतिरभिमानो येषां ते जडमतयः तेषां भावात् अतिसक्ता
जलमंडुलरवतत्पराः संतः विधुं स्वयोषरोनशोभोत्पादनेन च परमं मन्यंते स्मेति दुदयेन च्छोभालोपात् अथा
ध्यात्मं लोकाः साक्षिभास्वत्वेन दृश्यानां इयाणां सकलकलानिधिं समस्तचातुर्यस्थानं प्रसन्नं अप्रमत्तं तेम
नो विधुं विधुसदृशमाह्लादकं मनः संप्राप्याथात्मि। अंगनाभिर्वृत्तिभिरतुलसुखमापुः प्रवृत्तिसुप्रतिहता
निबभूवुः किंच संसारे विषयप्रपंचे जडमतिभावत आत्मप्रकाशकत्वाभावात् अतिसक्ताः संतः विधुं तादृशं मनः
परमं मन्यंते स्म भानुमात्मानं परमं न मन्यंते स्म आत्मज्ञाने तेषां प्रिय विषये प्रवर्तनात्॥९॥ अथेति अथांग
नानां च वियोगिनानां वियोगिनां कर्मभिर्याच पुंसां॥ उद्वेजको मासरतीहमत्वा जहारतं रीनरमालुरेकः॥
१०॥ अथानंतरं दीनदयालुः दुःखितदुःखदूरीकरणशीलः अर्कः सर्वतत्त्वेनाच्यः सूर्यः वियोगिनीनां प्रियवि
३ अंगनानां
रहवतीनां स्त्रीणां तथा वियोगिनां प्रियाविरहिणां कर्मभिर्याभ्यां तत्सम्प्रतिपत्तिविषयेऽत्यंतखिन्नानां पुंसां
पुरुषाणामुद्वेजको दुःखजनको मासतच्चंद्रं इति मत्वा विचार्य तं विरहिदुःखोत्पादकं चंद्रं जहार स्वसमीपं नि
नाय कलाहरणं च कारेति यावत् तदुक्तं निरुक्ते विधुर्विधमनशीलः दहनः मनशीलः पुवान चंद्रमसं पलितः आ राम
६६

ह्वियोगिरनीति अथाध्यात्मं अथानंतरं दीनदयालुरतस्ववार्कः पूज्य आत्मा वियोगिनीनां रोगैर्विषयविरहि
णीनामंगनानां बुद्धिवृत्तीनां तथा वियोगिनां सिद्धिविरहिणां कर्मभिर्यायोगाभ्यासनुद्धेनां पुंसां कर्मणपुद्वे
जको मासत्त्वमन च्छेदइति मत्वा तं तादृशं मनश्चंद्रं जहारस्वाभिमुखं संयातं दनेनरहैं इत्यधर्माभ्यासह
रणं कृतवानित्यर्थः तदुक्तं भगवता सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज॥ अहं त्वां सर्वपापेभ्यो मोक्ष
यिष्यामि मा शुच इति यद्वा विरहिभिः संसारिभिर्दुःखनाशाय संसारचतुरमपि मनः परमचंद्रं विषयं क्रियते
इत्यर्थे नान्यं पुरुहपूर्वं अदुःखघातकाः श्लोकाः प्राणेशविज्ञप्तिरियं मदीया तत्रैव नेया दिवसाः कियंतः॥
संप्रत्ययोग्यः किलरेषदेशः कलाहिमांशोरपिताययंति। कलाहिमांशोर्यपितापयंतिनेनत्प्रिये चेतसिशं
कनीयं॥ वियोगजन्मेहदयमदीयेतत्रास्थिनात्वसमुपेषितापं रश्मीतरश्मिरसि चंद्रकुंभो मां रहस्युनल जनेःस्थिन५
गर्भे मयूखैः॥ त्वां शरणागतधामुनिं कुर्यां जानकीमुखसमीयदिनस्याः उद्भ्यादयः॥१०॥ मासेतीति मासेति
मत्वा हरणं हरिं दोषस्मात्तु मासो भवतीति मन्ये॥ तस्याथ वक्ष्ये स्पष्टो द्विपक्षो चिरं विभूत्पदुरितं विना
श्य॥११॥ हत्सदृशस्यापि धौः मासेति मत्वा हरणं जानंतस्मात् कारणात् मासो भवति इत्यहमन्ये जानामि
तुत्र क्षाकामिनीमुखचंद्रमाहुती निबतननु वस्तुनो मास चंद्रमः शोभ्यपोः कोऽर्थ इति चेत् शृणु मास

हरिदेरोः

आत्मा
७

शब्दस्यकालपरिमाणविशेषवाचकत्वंचंद्रमाश्चंद्रोमानात्कालपरिमाणकर्त्तानथाचनिरुक्तंद्वारशाप्रभयश्च
क्रमेकमितिमासानामासामानादितिचंद्रमाश्चायंद्रमतिचंद्रोमानाचान्द्रमानमस्येतिवाचंद्रश्चरतेःकोतिकर्म
णइतिचअयमर्थस्तुसर्पचेतिश्लोकेध्वनितत्वादित्यनोक्तइतिज्ञेयंमासेनोत्पत्रसोचिलायेचेत्यारप्यरणमिति
सोलीपेह्णतेआउणइत्येकोगुणादेशःक्रव्यादस्वर्गस्त्वत्तरूत्यत्रतुनप्रमाणंअथानंतरंतस्यमासस्यक्षय
वृद्धिपक्षौक्षयःकलावियोगःवृद्धिःकलान्तरसंयोगःतौउभयतःस्थितत्वात्पक्षाविवकृष्णशुक्लपक्षौव
क्ष्येकथयिष्यामिकस्मैप्रयोजनायदुरितेपापविनाशप्रकर्षेणध्वसंनीत्वाचिरंबहुकालंविभूत्येसमृद्ध
येअत्रपापक्षयपूर्वस्यसुखानुभवस्याभ्यर्हितत्वात्तत्तदिच्छयाकृष्णपक्षादिमासस्तुच्यतइतिभावःननु
तथापिकृष्णपक्षादौमासेकिंप्रमाणमितिचेत्यत्वादेवप्रपिबंतिततआप्यायतेपुनः॥वायुःसोमस्यरक्षि
तासमानामासआकृतिरितिगृहाणप्रपिबंतिआदित्यादयइत्यर्थःसोममंडलंगुरुत्वादधःस्रवतितउपरिस्थत
सूर्यरश्मिसंयोगात्शुष्यतितंसोमंवायुरितोजलभागाञ्जीत्वापालयतिप्रपिबंतिआत्मानइत्यर्थःअध्या
त्मेतुआत्मप्रकाशात्संसारविषयकवृत्तिहीनभवतिविषयध्यानात्मनोधुःस्रवतितन्नप्राणःप्राणा
यामेनेरेतदूर्ध्वगमयित्वापालयतियद्वामनसःप्रसादकरणेनपालयितापाणस्थैर्याधीनमनःस्थैर्यंरम

राम
७

नःप्रसादोभवतीतिभावःतदुक्तंपातंजलयोगशास्त्रेमैत्रीकरुणामुदितोपेक्षाणांसुखदुःखपुण्यापुण्यवि
षयाणांभावनातश्चित्तप्रसादनंप्रच्छर्दनविधारणाभ्यांवाप्राणस्येतिसमानोअरण्योर्नामासःमनसःभो
गप्राप्यदृष्टिपतोनिवर्त्तनआत्मनश्चैतन्यप्राप्यभोगार्थंदृष्टिंप्रतिगमनेतावानकालःआकृतिःतापकइत्यर्थः
शेषार्थःस्पष्टः॥११॥प्रतिदिनमितिद्रुतविलंबितंद्रुतविलंबितन्भौभ्रावितिलक्षणात्प्रतिदिनंपथिहि
नकलादयविधुमनोव्रजतिस्मविभाकरःस्वपतिरत्नविनाशितवैभवोनरदेवप्रतिपन्नमतिर्ध्रुवं॥१२॥प्रति
दिनंदिवसेदिवसंप्रतिपथिमार्गेसूर्यमायकेहीनकलादयक्षीणप्रकाशविभाविवविधुमनाःविधुर्मनःमनः
समत्वात्तनचात्रोपमितसमासःउपमितंव्याघ्रादिभिःसामान्याप्रयोगइत्यनुशासनात्विभाकरंप्रकाश
हीनारंव्रजतिस्मजगाम्अथाध्यात्मंप्रतिदिनंपथियोगमार्गेहीनःकलानादेहादिपधर्माध्यासानामुद
योयस्मतत्विधुमनःश्चद्रसदृशंमनःविभाकरमात्मानंव्रजतिस्मनिरंतरंतध्यानाभ्यासवशाद्गतिहृत
गतिप्रवर्त्ततेस्मेत्यर्थःतदुक्तंपातंजलयोगशास्त्रेतस्यवाचकःप्रणवःतज्जपस्तदर्थभावनंततःप्रत्यक्चे
तनाधिगमोप्यंतरायाभावःश्चेतिकदृवस्वपतिरत्नविनाशितवैभवःस्व स्वामिनापूर्वंसमनुज्ञातियत्वा
दूरीकृतमैश्वर्ययस्यसःनितंस्वकीयंनृपतिंराजानंप्रतिपन्नप्रत्यागत्यद्वदामात्यइवदृश्यपूर्णोपमा

आत्मा:
८

उपमानोपमेयस्य धारणा धर्मो पमा वाचकानामुपादानात् ॥११॥ उदयेतिवैताली यंछंदः वैताली यं द्विः स्वरा अयुक्पा
देयुग्वसवोंतेल्गौ इति लक्षणात् द्विः स्वरा अयुग्मे चतुर्दशमात्राः युग्मेन्त्वष्टौ अंतेरलगुरुवइत्यर्थः उदयालसांभु
दुहृदयाक्षितिरस्ती हकलानिधेस्तद्दा ॥ इतियत्रूप सर्वो स्थिरात्मना त्रिजगदेतितदास्तु धीजनैः ॥१२॥ तदा चं
द्रकलाक्षयसमयेसुधीः संसारं चतुरो जनो ज्योतिः शास्त्रानभिज्ञः लोकः सर्वा यमिति निजगाद उपदिदे
श इत्यर्थः इति किं हे सर्वे हि मित्र इति स्थिरात्मना एकामबुध्याय पश्यालोकयइती ति किं यदायस्मिन्समयेइंदुहृद
इंदुहृदि वमनः सदृशं चंद्र इत्यर्थः उदयालसं स्वप्रकाशेनिरु पमं भवति विलंबेनोदेतीत्यर्थः तदा इहृद
यो कलानिधेः पूर्णस्यापि चंद्रस्य क्षतिनीशोभवति रक्त रूपनाशे रक्तः पदादिन ष्टइतिवत्कलानाशो
नाभिप्रेतः अयमाध्यात्मं हे सर्वे इंदु हृदं चंद्र सदृशमनउदयालसं भवति तदेह कलानिधेः संसारे चतुरस्या
पिमनसः क्षतिरस्तिइदं संसारदृशाक थितं तथा चात्र सुधीर्देहाभिमानी उपदेष्टा वस्तुतस्तु अनर्थहेतु
चातुर्यं अयस्यमनसः चातुर्यं क्षतेरस्मा हितत्वमेवतदुक्तमष्टावक्रेणामुनिना हेरोमुमुक्षोदेहोहरिः क
मलजोपिवा ॥ तथापि नतव स्वास्थ्यं सर्वविस्मरणादृते इति तथा चापमुपदेशः संसारादेव मानसप्रतितथा
चात्र सुधीरात्मतत्त्वउपदेष्टा इतरस्तु सर्वे स्पष्टं ॥१३॥ अधीत्येति अधीत्य विद्याः प्रतिपादितार्थीः हे इंदुहृद्ध्यासकराम ८

धा

लाविहीनः ॥ श्रुत्यादि लभ्यात्मनईश्वरस्य संप्राप्यमाप्नो भवतीति मन्ये ॥१४॥ विद्याश्चतुर्दशपुराणा द्याः तथा च
याज्ञवल्क्यः पुराणन्यायमीमांसा धर्मशास्त्रांगमिश्रिताः ॥ वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति अ
धीत्य पठित्वा द्विजराजत्वात् चंद्रमो वै ब्रह्मेति श्रुतेः चंद्रमा मे ब्रह्मा सोमं ब्रह्मेति गणत्वात ब्राह्मणा त्वि ज्ञा मनसा
चंद्रे रामनो वैयज्ञस्य ब्रह्मा न यद्विदं मनः सोसौ चंद्रः स ब्रह्मा सा मुक्तिः सा निमुक्ति रिति शतपथ श्रुतेः ब्रह्मैकोज्ञो
तेज्ञा नेविद्यावदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति ब्रह्मा परिवृढः श्रुतेनो ब्रह्मपरिवृढः सर्वं तदिति निरुक्तोव
प्रतिपादितार्थो कृत्स्नपक्षे अध्यासकलाविहीनः भ्रमसदृशप्रकाशरहितः हे इंदुः मनः सदृशं वेदश्रुत्यादि लभ्या
त्मनः श्रुतिस्मृति पुराणज्ञेयस्वरूपस्येश्वरस्य नि यंतुः स्वयं स्व संप्रति स्वयं प्राप्ति समयप्रकाशमात्यः स्वयं तु प्रहे
तत्प्रकाशवत्वेन तदैश्वर्यं वाप्नो भवतीति भविष्यतीत्यर्थः वर्त्तमान सामीप्ये वर्त्तमानवद्वेति सूत्रात् इत्यहेमने
उत्प्रेक्षालंकारः संभावनमथोत्प्रेक्षा प्रकृतस्य समेनयदिति लक्षणात् अथाध्यात्म विद्याः अधीत्याध्ययनो
त्तरकालं प्रति पादितार्थो अध्ययनप्रारंभदिवसमारभ्यात्तरोत्तरं काले अध्यासकलाविहीनः अध्यासाः भ्रमाः अ
तस्मिन्तद्दृष्टि ज्ञानरूपाः ते कलाइवपाउशाशाइवतद्रहितः हे इंदुश्चंद्रसदृशमनः श्रुत्यादि लभ्यात्मनः अवराम
न बिंदध्यासनेश्वरेयस्वरूपस्य ईश्वरस्य बुद्ध्या हि मव नैकस्यो त्मनः संप्रति तद्ध्यानसमये आमात्यो भवति स
वैत्त्याहि विशिष्टो भविष्यतीत्यर्थः इत्यहं मन्ये निश्चिनोमि नात्र संत्रात्मोत्प्रेक्षायथार्थत्वात् तदुक्तं त्पजनिजगजे

नु

वाजिकयोभजभजजैरेजगद्रहनमजं॥ तत्याभ्यानचेतः प्राप्यसिसकलंनदेपरात्येनेति सर्वं सहितुपूर्वं
त्राप्येवमेव तत्राधिनकार्यकारित्वदर्शनात्॥१४॥ लब्ध्वेति लब्ध्वाक विस्त्वीयकलाप्रसत्तेः प्रभुसमानचेमनः
सुधांशुः॥सं तर्पयामास मरुन्मुनीनांगणान्पितॄणां चतदाश्रितानां॥१५॥ मनः सुधांशुः मनः सदृशाः प्रि
यः सुधांशुश्चंद्रः रविं लब्ध्वा प्राप्य स्वीयकलाप्रसत्तेः पुष्यसदृशेर्गोनोहरे निजषोडशांशैः प्रभुनिग्रहानुग्रहस
मर्थैः विश्वमानचंद्रनः प्रकाशप्रापये भक्तिप्रादुर्भ्या पूजयामास किंच तदाश्रितानां स्वर्गपोष्याणां मरुन्मुनी
नां देवानामृषीणां पितॄणां च गणान्समूहान्संतर्पयामास तत्पांश्व कांत्युपर्यः तदाश्रादेदेवर्षिपितृतृप्ति २
र्भवतीतिभावः अथाध्यात्मे मनः सुधांशुः सुधांशुसदृशमाहारकं मनः रविमात्मानं लब्ध्वा स्वीयकलाप्रस
त्तेः ममता विषयाः प्रसन्नसदृशात्रयंशीयाः कलाः वृत्तयः ताभिः प्रभुमात्मानं समानचंद्रवृश्यति च हृदयेतिपुष्यै
ः परिपूजयतीति किंच तदाश्रितानामात्मपाष्याणां मरुन्मुनीवायुरिंद्रियप्राणानां पितॄणां विश्वेतेजसप्राज्ञानां
गणान्संतर्पयामास पुष्पोपहारगानुत्यादनात् तथा च याज्ञवल्क्यः दानासत्यः क्षमीप्राज्ञः शुभकर्मा जितेंद्रियः
तपो रतो योगशीलो नरोगैरभिभूयतइति॥१५॥ प्रापामिति प्राप्तां प्रसादेनकलासमृद्धिं निजापराधेनतुक्षतं क्ष
यं च॥ संस्मृत्यतुष्टाव मनः सुधांशुर्महेशमात्मानमजंयनात्मा॥१६॥ मनः सुधांशुः प्रसादेन स्वस्यपूर्वं मनु
राम
९

यहेराप्राप्तां कलासमृद्धिं प्रकाशवृद्धिं संस्मृत्य सम्यकुध्यात्वा निजापराधेन विरहिजनदुःखेजनन स्वकीय
विरुद्धाचरणेन क्षतं जातं क्षयंप्रकाशनाशं च संस्मृत्य यतात्मा निरुद्धचित्तः अजमजन्मानं महेशं सर्वनियंतारं आत्मा
निरुद्धचित्तः अजमजन्मानं महेशं सर्वनियंतारं आत्मानं स्वात्मस्वरूपं तुष्टाव समस्तप्रशस्तगुणाश्रयत्वेन प्रति
पादितवानित्यर्थः अथाध्यात्मे मनः सुधांशुः सुधांशुसदृशं मनः प्रसादेनात्मानुग्रहेण कलासमृद्धिं चातु
र्यवृद्धिं प्राप्तां संस्मृत्य निजापराधेन क्षतं क्षयं चेतनत्यतिरोभावं च संस्मृत्य यतात्मा अजेजन्मरहितमारोपितजन्म
नं च अजः शरीरग्रहणात्पूर्वं तदानशतिकीर्त्यं हानतिप्राज्ञवल्क्यस्मृतेः महेशं सर्वैश्वर्ययुक्तमात्मानं तुष्टाव स्तुतिस्तु स्तो
तरि मनसि पुरुषत्वारोपेणानतुसमात्रेवास्तु इमौ चात्मानिसविकस्य मनसो लयेन स्तुतिरेव नसंभवतीति
चेत्सत्यं अधिरूढसमाधियोगस्य योगस्थः कुरुकर्माणीति भगवदुपदेशात् यत्र यत्र मनोयाति तत्र समा
धयइत्यादिवचनेभ्यश्च सर्वं समजसं स्तुतिस्तु आत्मस्वरूपमहमस्वास्मीति स्वानंदानुभवेन पुनः सु
धुप्ति प्रावस्मयेतदानंदप्रकृष्टानुभवार्थ परमेष्ठास्यदस्मानमनः स्तोतव्यमत्त्वसंभवः उक्तं चास्माभिर्नामहेतुर
रोगः स्वभावाज्जातबोधायस्तसंगात्लब्धभक्तये॥ निःसंगाऊत्पापायकेवले॥१६॥ भुजंगप्रयातेनतं भु
जंगप्रयातं पदृतिलक्षणात्नेनमस्तोतमोहन्त राशीकहं त्वंप्रसादरविधात्रजनेसृजके त्वं॥ कलारूपपुत्वे

स्वात्मनेनमइति।२

स

मन्यामहे नाधनानज्वलनेनहीना अस्यस्मासु ब्रह्मचर्यमध्ययने

स्वा॰ना॰ १० मेयाप्पूजितो नः प्रसीद प्रसीद प्रपंन्नार्त्तिहंतः॥१७॥ स्वात्मनेनमदीतस्तु जिमाहनमदूतिहितमोहन्न
मीऽन्न जंहेतिहनिष्पाजिवातात्दृशमन्तेबह्मभूराहृत्वेषु द्विविजिनियमान्निषेधुः जनु म्पनमौनाजिरस्तु
सदासर्वदानजिस्तुवाक्कायकर्मव्यंग्यान्वसर्वोत्कृष्टइतिज्ञानरूपायदातिन्वदुदेप्यकेनमः हिवः
सदास्तुयावज्जीवमविच्छिन्नमपिहोत्रेन्वन्तोनये आचरेयमितिभावः नमः शब्दस्यनिघंटुषष्ठी
विंशत्यन्ननामसुपाठः तथाचश्रुतिः नपायासोमनामहे नाराया सोनजद्रूवइजितन्ननिरुक्तं अप्पा
यीमध्ययनं तपोदानकर्मैत्यौषिरेवाचरितिकोदृशायतेशोकं ह्रन्नेमनोरथपूरणोनाधिनाशकायप्रहू
सदृशोकः संसारस्तन्निर्वर्त्तकायपुनः कोदृशायस्वस्वकीयेस्वर्पमात्रनन्परदत्पर्यः पूजकेआस्थि
न्नादिसेवाकुर्वंतियद्वाप्राणायामादियोगाभ्यासंकुर्वंतिजनेअनुग्राह्येप्रसादइष्टंचित्तेनेमेल्पवाधि
धात्रेकुर्वंतेहप्रपन्नार्त्तिहंतः शरणागतपीडानाशकमयाकल्लोरूपपुष्पैः कल्लारूपाणिप्रकाशि
त्मकानिपुष्पाणिपूजाकरणान्वान्कुसुमानितेः त्वंपूजितः लोकान्वमेवप्रकाशकइतिसंमानितः
अतः कारणात्प्रसीदप्रसीद अनुग्राहकोभवादूर्वचनमादरात् अथाध्यात्मपक्षेवमेवएवमुजरत्रा
पि॥१७॥ अपीजितः अपिप्रसन्नानिसमर्पितानिसन्नान्वितस्यापि कुभप्रदानि॥ समर्पणस्येवमिमंप्रभा राम १०

वज्ञात्वाविदाकर्मसमर्प्यतेते॥१८॥ हेप्रपन्नार्त्तिहंतः स्नानान्वितस्यापिस्नानाहिंसानयुक्तस्यापिपूजक
स्यसमर्पितानितेनत्वन्प्रीतयेदत्तानिप्रसूनान्यपिपुष्पाणपिशुभप्रदानिकल्याणकर्तृणिभवंति
प्रसूनग्रहणेशब्दतः प्रकृष्टपापयोजनार्थे अर्थितः अनायासलभ्यत्वद्योतनार्थंचतथा चपुराय
नः सद्धालरोम्यस्त्वन्प्रीतयेदत्तंपवित्रपापसारिभोजनंकल्याणकर्तृभवतीत्यत्रकिमाश्चर्यमितिभा
वः यद्वाप्रसूनानिप्रकृष्टहिंसानियम्यारीतिकर्माणिताम्यपिशेषसमानएवमुक्तप्रकारेणाइमशु
भप्रदत्वरूपंससमर्पणस्यत्वन्प्रीतयेदानस्यप्रभावसामर्थ्यंज्ञात्वाश्रुतिस्मृतिपुराणेषुदृष्ट्वाविदाजा
नतोजनेनतुभ्यंकृतंकर्मानुष्ठानंसमर्प्यतेनिवेद्यते॥१८॥ अधुनास्वस्मिन्सदुपकर्तृत्वद्योतयन्नाह
सोमोहमितिसोमोहमस्मिप्रकृतिः सर्वाणांहविषांतेयज्ञफलरसोमि॥ नमामिमदुर्वारदप्रसीदप्रभोजनी
नुपहमुखप्रेतो॥१०॥ सोमस्थरः अहेरुजदूदेवसोमयंद्वद्रमादितिश्रुतेः यद्दालतोन्नक सर्वानांप्रज्ञानां
प्रकृतिः साधकतमोस्मिसोमेनयजेतेतिश्रुतेः यद्वासर्वाणामिष्टानांरेवस्यसवितुः सर्वकर्मकृरावतिवे
धसइतिश्रुतेः कृएवतिकुर्वीतिवेधसः कोविजः प्रकृतिः कालत्रोप्रकत्वेनास्मिनवोनवोभवतिजा
यमानोह्नाकेतुरुषसामेत्यग्रं॥ भागंदेवेभ्योविदधात्यायन्प्रचंद्रमासिरजदीर्घमायुरितिश्रुतेः नवोनव

MEMORIAL

आत्मा: अध्वराणां रक्षकः अह्नां तिथीनां केतुः ज्योतिःशास्त्रप्रसिद्धस्वरूपः शांशो ज्ञापकः उषसामग्रमेति प्रथमे
११ चन्द्रमा उदेति पश्चादुषा भवति बहुवचनं पूजार्थं पूजानुस्वाविभावो जरकालमिव स्त्रयो विभावक
त्वात् एतेन कृष्णपक्षो द्योतितः सोप्यमायामासन्नः प्रतिरात्रं दारात्रिः किं च हे विष्णो ते हविर्होम्यप्रथमा
दिनरस्यास्तीति हविष्मान् तत्सोमत्वर्थ इति मत्वादुत्वाभावः तस्मै यजमानाय यज्ञफलस्वर्गादि ददामि
साध्वयामि अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु ॥ दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भि
र्मनुष्येभिरग्निरिति श्रुतेः अरण्योर्वा वाइच्छिबौ अधिपद्धतुमथनकाष्ठयोः सुधितः व्यक्तः स
न्नक्षयपतीति हेतोः सुहितः स्तनगुप्तराज्यश्व दिवे दिवे प्रतिदिनं जागृवद्भिः परलोकज्ञानद्भिः म
नुष्येभिर्मननशीलैः मनुष्याः कुस्मान्त्वा कर्मीणिकुर्वते ॥ तिनिरुक्तात् सोहं त्वां मूर्ध्ना शिरसा नमा
मि नमस्करोमि अथवा मूर्ध्ना सर्वप्रकाशकत्वेन रूपेण नमामि त्वामुक्षं जानामि तथा च निरुक्तं मूर्द्धा
मूर्त्तमस्मिन् धीयत इति हे वरद अभीष्टफलद हे प्रभो समर्थ प्रसीद प्रसन्नो भव नन्वेवं सन्तस्वं तर्हि त्वमे
वैषसाध्यमुत वकिं मन्त्रार्पणेनेत्याशंक्य संबोधयति जनानुग्रहमुखा हे तो इति अनुग्रहप्रसादप्रधान
कारणात् अहं त्वा माक्षि त्यैव फलं ददामी इति भावः अथाध्याय्मसोमः योगाभ्यासैः शिथिलत्वमिति कत्वाह राम
११

मूल २

मनः नवीनः नवोनव इति श्रौमैर्थः सुयोगाभ्यासैः रिणामादि सिद्धिभिर्नवं नवं जायमानः संस्क्रियमाणः अ
ह्नां च दशेन्द्रियाणाम् उषसां तत्वज्ञानस्य बहुवचनं पूर्ववत् आत्मप्रकाशकत्वात् देवेभ्य इन्द्रियेभ्यः
दीर्घमायुः कालं वचनात् एतेन योगमार्गो द्योतितः सोपि समाप्यासन्नः किं च हे विष्णो तु न शेषं भुंजते
यज्ञफलं योगसिद्धिं अरण्योः प्राणापानयोः जागृवद्भिः आत्मानं जानाद्भिः यानि शास्त्र वेदज्ञानानि तस्या
जागर्त्ति संयमी ॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति भगवदुक्तेः शेषं पूर्ववत् नन्विह
भयत्र सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ॥ जनिताग्नेर्जनिता सूर्यस्य ज
निते द्रस्य जनितोत विष्णोः इति श्रुत्या सोमस्य मनश्चन्द्रस्य मन्यादि जनकत्व प्रतिपादितं तथा चा
त्मसूर्यस्य मुख्यहेतुत्वमुक्तं विरुद्धमिति चेन्नैवं सोमो मत्यादि ज्ञापकतया स्वरूपत इत्यर्थात् वस्तु
त स्तु आत्मसूर्यस्वात्र सोमत्वेन स्वरूपतेन तथा च निरुक्तं सोमः पवते सोमः सूर्यः प्रसवनात् जनिता
मतीनां प्रकाशककर्मणामादित्यरश्मीनां दिवो द्योतनकर्मणामादित्यरश्मीनां पृथिव्याः प्रथनक
र्मणामादित्यरश्मीनां अग्नेर्गतिकर्मणामादित्यरश्मीनां सूर्यस्य स्वीकरणकर्मणामादित्यरश्मी
नामिंद्रस्यैश्वर्यकर्मणामादित्यरश्मीनां विष्णोर्व्याप्तिकर्मणामादित्यरश्मीनामित्यधिदैवतम

आत्मा: १२

याथात्म्यं सोमस्यात्मा यैतस्मा देवेंद्रियाणां जनितेत्यर्थः अपि वा सर्वाभिर्विभूतिभिर्विभ्रजते भ्रा
न्मेत्यात्मगतिमाचष्ट इति॥१९॥ इदानीं जनोपकारकामः स्वमर्थयाचते त्वदात्मेति त्वदात्मसाक्षा
त्करणे विरुद्धा संसाररात्रिर्विदुद्रुवे दुनोति॥ उद्धर्तुमेनं सुखिनं विधातुं मां योजय त्वं कलया प्रस
न्नः॥२०॥ हे जनानुग्रहस्पृहयैहेनो त्वदात्मसाक्षात्करणे तव सच्चिदानंदात्मकं स्वरूपं तत्प्रत्य
क्षे विरुद्धा प्रतिकूला संसाररात्रिः संसारसदृशी अनेकमोहभ्रमभयप्रदा रात्रिस्तामसी विदुषे
ज्ञानस्मान्नं मोगकुशलायप्याल्पत्वं जोऽन्यत्सर्वं दुःखहेतुरिति जानते पुरुषाय दुनोति दुःखं द
दाति तस्मात्कारणात् एनं मे बोधविरुद्धं संसाररात्रि उद्धर्तुं निर्भयं कर्तुं सुखिनं सकलेष्टभोगदानेन पु
ष्टं विधातुं कर्त्तुं यदि त्वं प्रसन्नः वरदः तर्हि मां कलया स्वतेजसा या जगत्प्रकाशयेत्यर्थः त्वमि वा हं
सकला प्रजा पालयिष्यामीति भावः अतएवोक्तं राजानो रविंशिन गूढं जित्य याथात्म्यं संसाररात्रिः
पूर्ववदात्रेषु दृशः संसारः शेषं समानं यद्वा यतः प्रसन्नोसीति योजनीयं आत्मार्कस्य समत्वात्॥२०॥ ए
वमिति एवं वरदत्वमत्ता गमे मा मां सर्वं लोकप्रसारकरमात्मसमानशीलं॥ वीक्ष्यो जसा तमपि योजि
तवान् दिनेशः सोऽपि प्रणाम्य रविं प्राशु तमः प्रजस्थौ॥२१॥ दिनेशः सूर्यः एवमुक्तप्रकारेण वरं तपा राम १२

चमानं अमृतांगे जलं स्वरूपं पयः कीलालममृतं जीवनं भुवनं वनमित्यमरः अमात्यवर्यं अमात्याः
सचिवाः तेषु वतत्कार्यकारिणो विदुर्गुशनिगुरुभौमाः तेषु वर्यं स्वप्रकाशरूपं यस्य तत्प्रमनः तं तुनर्के
मनेमनसो नाशप्रतियोगित्वाभावउक्तस्तथा च सदृशं एवास्तु किं मुक्तियर्थतानुधावनेनेति चेन्न अत्र
त्ये आत्मा मन्ये त मनसा सह तिनिरुक्तात् यावदधिकार्मवस्थितिराधिकारिकाणामिति सूत्रात्
वस्कृतस्कन्नमृताग आत्मा के कस्मानहेतुअमृतभागज्ञानस्योत्कर्षानिरुक्तात् अमात्यवर्यं
अमात्यसदृशं द्रियेषु श्रेष्ठं यद्वा अमा सह भवानि अमात्यानीन्द्रियाणि अव्ययात्यप् तेषु श्रेष्ठं तमपि
मनोऽपि नेलोकरक्षणात् श्रेष्ठं अत एव लोकप्रसारकरं जनसुखजनकं अत एवात्मसमानशील
स्वसदृशस्वभावं चंद्रं वीक्ष्य विचार्य तमात्मपि पूर्वपराधिनमपि यद्वाऽपि शब्दात् बुधादयः त
था च यस्या काशेया दृशः प्रकाशः तस्य तादृशफलं भवतीत्युक्तं ज्योतिःशास्त्रे ओजसा सामर्थ्येन
योजितवान् जगत्प्रकाशकं कृतवानित्यर्थः दिनेशग्रहणात् अस्मिन्सर्वदा राजन्यताभावः सूचितः पाद
नार्थं चंद्रादीनां यत्रापि प्रकाशमानत्वात् रात्रिसंबंधो न्यथवास्तोपि चंद्रोऽपि रविस्वरूप प्रणाम्य भजमानत्वात्
नः सूर्यं प्रदेशात् आशु त्वशीघ्रं गत्वा प्रतस्थे नक्षत्रान्तरं गतवानित्यर्थः अथो थ्यात्मा हे दिनेशः प्रका

आत्माः
१२ शकत्वाद्विनेत्तानंतस्येशः उत्पादकत्वात् आत्मात्मनोगंतुजिपर्यंतमविनाशित्वाद्भ्यनंतमंगत्वरेञ्च
पिशब्दादिहृयाणामदुःखुत्वात्तसोपिमुनोपिरविमात्मानिप्राण्यस्यसर्वोत्कृष्टत्वात्तत्त्वात्मनश्चात्मप्री
यकता ऽप्रदेशाशाशुचंचलत्वात्प्रनस्येसंसारेप्रवर्त्तने शीषपूर्ववत् ॥ २१ ॥ प्रथमेति अयपंथान
काष्ठेदःपुगपरा ति केतिलक्षणात्सुरवेनाल्हीपस्यपुगमःपारद्रत्यर्थः प्रथमदर्शने हार्द्धोजे
नाः हतस्तमंगलाः सात्मजागना ॥ हर्तुविरोत्कतावीष्पतेमुदासपरिनेमुराह्लादकं सदा ॥ २२ ॥ हार्द्धोः
तत्सदृशस्यविधोश्चंद्रस्यप्रथमदर्शनेप्रथमदृश्यने ऽस्मिन्निति प्रथमदर्शने प्रतिपत्तिथिः तस्मिन्न
यथासात्मजागनाः सापत्यपुत्रवतयः हतस्तमंगलाः विरचितशोभनोत्सवाः शुक्लपक्षेसकलशोभन
कर्मणां विधानात् जनाः भूतलस्थालोकाः जंचंद्रमुदाहर्षणावीक्ष्यदृष्ट्वाहत्तचिरोत्कताः नष्टबहुका
लचंद्रदर्शनोत्कटाः संतः सदाआह्लादकं नित्यप्रीतिवर्द्धनं चंद्रसर्वेष्टितत्कालंमवनेमुः नेमश्च
कुः तथासात्मजागनाः सकिरणाकांतनयः जनाः ज्योतिर्मयाः लोकाः नेमुर्नावभूवुः तत्रोत्तरमत्र
देशपत्वेमापुरितियावत्पहासर्वतारोत्कृष्टज्ञानान्तिस्मप्रतिमासतस्तपोगतत्वात् शीषसमानं आण
ध्यात्मंहार्द्धोः विधुसदृशस्यप्राप्तेश्वर्यस्यमनसः प्रथमदर्शने अयमुत्कृष्टो गोश्वरउतिज्ञानेसात्मजा राम
१३

गनाः जनाः गृहमेधिनः हतस्तमंगलाः आदृताः संतः तं योगिनं वीक्ष्यसत्कृत्य तथाचयाज्ञवल्क्यः सान्ह
त्यमिक्षुर्वेभिक्षोस्तानव्यास्तुव्रताय चेति आह्लादकं योगसिद्धिभीरजक आपुराध्यात्मंतुजनाः प्राणाः
हतस्तमंगलाः संपादितपुराण्याः सात्मजागनाः वातपित्तकफाश्चतज्जनन्योनाडयश्चतपुक्ताः आह्ला
दकं राघवं संपादनेनयोषकं शेषसमानंस्तमानियतस्यतुसंसारिणः प्रथमदर्शने गृहपतित्वाभिमाने
जनाः पुत्रादयः आह्लादकं पोषणेनसर्वाभीष्टकारिशेषसमानं ॥ २४ ॥ हार्द्धोः शिरोभाउनाह्वत्तरथोह
तानैलोगितिलक्षणात् हार्द्धोः प्रभुसपर्ययान्वितः प्रत्यहं निश्चियथाकलोदयः ॥ लोकरक्षणामिहा
करोत्तथाद्दुष्टसत्वभयतः समंततः ॥ २३ ॥ हार्द्धोः हृत्सदृशः विधुःप्रभुसपर्ययासपर्ययाभिमुख्येक्रिय
याप्रत्यहंप्रतिदिनमन्वितः कर्तृत्वेनसबद्धः सन्निनिशारात्रौयथादेशतःकालतश्चयदवधिकः क
लोदयः प्रकाशाविभावोभत्तथातेनप्रकारेण हरात्रौसमंततः सर्वेषुदेशेषुदुष्टसत्वभयतः दिं सं
चोरव्याघ्रादिप्राणिभ्यःरवात्लोकरक्षणं स्वधर्मरतजनपालनमकरोत् तत्कृतवान्यावच्चंद्रप्रकाशं
चौरादयोनोपद्रवंतीतिदर्शनेनतत्त्रचंद्रकर्तृकत्वाभिमानइतिभावः यद्वातनःलोकरक्षणे जे रस
मेसमभावंरुहत्त्वमितियावत्प्रापितोषांश्रयाध्यात्मं हार्द्धोः विधुसदृशहत्मनः प्रभुरात्मातस्यस

आत्मा
१५

पर्यास्तु कृतक्रियायोगसाधना अग्निहोत्रादिसेवाचनयानि शिंससारे यथाकलाः योगसिद्धयः तया चा
तुर्यरूपा बुद्धयः तासां गुरुस्ट्रयोभूत्तथा सर्वदा वैराग्योपदेशेन दृहसे संसारे दुष्टसत्वभयतः स्त्र्यादिविषय
भ्यो भयात् तत्संगात्कार्यपर्याशदिदोषादर्पेन स्त्र्यादिविषयाणां दुष्टत्वात् अश्लीयनत्वर्भवृत्तिरुशतीप्याप
याऽमुयेति श्रुते श्चरुशतीप्रकाशमाना पापया रागद्वेषोत्पादनेन बंधनरूपया अमुया स्त्रिया अश्ली
अश्लीला कुत्सिता भवतीत्यर्थः लोकानां मान्यत्वेन दर्शनीयानां मुमुक्षूणां रक्षणात तेनिवर्तितं समं
तो करोत् यद्वा पतनो सुमुक्षुरक्षणात तत्संसमसाद्विहसानंदात्मकं ब्रह्मलोकरोत्प्रकटयति स्म संसारित्तु मनः
समं जनः दुष्टसत्वभयतः जारादिभ्यो हरणभयात् लोकः स्त्रीतनस्तद्रक्षणामकरोत्स्वदारनिरतश्चैववृत्ति
योरक्ष्यायतः स्मृजाद्वृत्तिया तवल्कास्मृते: ॥२३॥ चंद्र इति चंद्रे प्रशांते परिपूर्णरूपे समस्तकार्य स्पु
वदंतीति सिद्धिं ॥ तथैव ज्ञाते मनसि प्रसन्ने सिद्धान्ति सेवे पुरुषाभिलाषाः ॥२५॥ परिपूर्णरूपे शुक्लेकादश्या
दिकृष्णपंचम्यंतासु तिथिषु स्वच्छमंडले चंद्रे निशाकरे प्रशान्ते जन्म[illegible]त्वजीयषष्ठसप्तमदशमैकादश
राशिगतत्वात् शुभे सति समस्तकार्यस्य समग्रस्य कर्तव्यस्य कर्मणः सिद्धिं शुभफलं वदंति ज्योति
विदः तथैव ज्ञाते सकलेंद्रियवर्तेभिः परिपूर्णे एवं ज्ञाते ज्ञवराम नत्पादसंस्कृते मनसि चित्ते शीकाय

राम
१५

वेन प्रसन्ने समाहिते सति सर्वे समग्राः पुरुषाभिलाषाः पुरुषाः योगिनस्ते षामभिलाषाः कामाः सिद्धयंति
अप्रतिहताः फलंति तेषां निश्चयमनुवर्तंते जगदिति भावः संसारिणामपि तथा सति कामाः फलंतीति तदुक्तं अन
मीलितचित्तानां सुखं स्वप्नेपि दुर्लभं ॥ कायवाक्चित्तशुद्धानां संपदः स्युः परे परे इति इतिवदन्यध्यात्मविदो य
तविदश्चैवमन्वयः ॥२४॥ उदय इति प्रमिताक्षरावृत्तं प्रमिताक्षरा सौ सा वितिलक्षणात् उदये व्यये च अभिखेगश
मयं विधुरोजसा न परिहीनतनुः ॥ इति वीक्ष्यते अत्र विबुधाः स्वमनोरथमिति प्रकाशवति चिन्मये ॥२५॥ अय
मर्थस्तु रेहातः विधुः उदये कलावृद्धिसमये व्यये पि तत्क्षयसमयेपि अभिखगेशः खगेशः गगनचरेश्वरः सूर्यम
भिमुखलक्षीकृत्य लक्षणेनाभिप्रती आभिमुख्य इति अव्ययीभावे भेः पूर्वनिपातः ओजसा तेजसा परिहा
नतनुः शून्यमूर्तिर्न भवतीति तत्र वृद्धिक्षयपक्षयोर्वा क्षयसाक्षात्कृत्य विबुधाः विशिष्टाः पंडिताः स्वयोग
बलेन स्वाधीनमनश्चित्तं प्रकाशवति प्रकाशश्चैतन्यं जड इति आत्मनि रधति निवेशयंति ननु आर्किकादिमत
दुक्षा आत्मा जड: स्यादित्यत आह चिन्मय इति चिति चेतन्यात्मक इत्यर्थः ननु तर्हि अत्र चेतन्यं द्विविधमुक्तं अज्ञा
नोपहितमज्ञानानुपहितं च तत्राद्येरस्व तितलाद्दुतीयेरन्याशांकायुततत्राहितीयद्युत्याह अमलइति अज्ञान
संबंधशून्य इत्यर्थः उदयमत्रो भयत्र बोध्यं चंद्रः पृथिवीछायया पापाबान्तरूपं व्यवहितो भवति मावान्प्रकाश

आत्मा: रहितो।भवतिराहुग्रस्तइतितुकथामात्रं अथवाराहोः छायारूपत्वंतमोरूपत्वात्स्वरूपतिप्रकाशमहि
१५ तंकरोति।तिरोहितंकरोति।तिराहुशब्दस्यार्थः इतिहा।दित्यानेगिरसोयाजयंस्तेभ्योयाजयद्ध्रुमाप्यथिवी
पूर्णादक्षिणानामदत्ता।तिथिप्रतिगृह्य।तातयजान्यकृजस्ता।सिंहीभूत्वाविजृंभतीजनानत्र्यादि
तिश्रुत्याराहुजननत्याः सिंहिकायाः पृथिवीत्वप्रतिपादनाच्च एवंमनोदेहा।भिमानेनयावरात्मादेव
हितंभवतितावद्धेतन्पृहीनंभवतितद्रूपकाशीरवउभूतानांप्राणिनःश्रेष्ठाःप्राणिनांमतिजीविन
मतिमत्सुनराःश्रेष्ठानरेषुब्राह्मणाःस्मृताः॥ब्राह्मणेषुचविद्वांसोविद्वत्सुकृतबुद्धयः॥कृतबु
द्धिषुकर्तारःकर्तृषुब्रह्मवादिनइति॥२५॥एतावतानिबंधेनस्तुतोयस्मात्महेश्वरः।आत्मस्वरूपेण
सर्वमस्माकंकामप्रददा॥१॥ ॥इतिश्रीकालीपनामकाहिताग्निविश्वनाथमहात्मजगोविंदकृतेआत्मा
र्कबोधेमासकथनेनामप्रथमउपदेशः॥ ॥संप्रतिस्वप्रतिपत्त्यैगुरुशिष्यसंवादंनिबध्नातिश्रुत्वेति
श्रुत्वेतिकश्चिद्गुरुर्मनीषीशुश्रूषुरेनंनिजगादशिष्यः॥वदानुमासंकथमात्मभानोःसमस्यवैषम्यमिहे
रयालो॥२६॥कश्चिद्गुरुर्मनीषिषुमध्येकश्चनमनीषीविद्वान्शुश्रूषुःगुरुरपिआत्मनिष्ठः।शिष्यःउपदे
शार्हःगुरुतःउपदेशःसकाशात्इतिरवीअश्रुत्वाअवधार्यएनंगुरुंनिजगादउक्तवान्किंनिजगादतदाहहे राम
१५

MEMORIAL

दयालोसमस्यब्रह्मरूपस्यात्मभानोरात्मार्कस्यानुमासंमासेमासेप्रतिदृश्यमानंवैषम्यंनानारूपत्वं
कथंकेनप्रकारेणभवतितदुपदिशेतिप्रार्थना॥२६॥जिज्ञासुमितिजिज्ञासुमेतंनिजगादशिष्यंगुरुर्जे
नस्यापुपकारकर्त्ता॥एकाग्रबुद्ध्याशृणुजातजन्मगेयंवदामीहतवाप्यभक्त्या॥२७॥जनस्यापिपरंपर
यासर्वस्यवैदिकलोकस्यअपिशब्दात्साक्षादुपदेश्यस्यमुमुक्षुःज्ञानप्रदानेनउपकारकर्त्ताःदुःखादुद्धर्ता
गुरुरुपदेष्टाजिज्ञासुंसमस्यात्मार्कस्यप्रतिमासंविषमभावःकेनहेतुनेतिज्ञातुमिच्छुएतंप्रष्टारंशिष्यंसर्वथो
पदेश्यंनिजगादसर्वमुपदिदेशकिंनिजगादतदाहहेतातहेपुत्रतातेतिसस्नेहसंबोधनंत्वंसमाहितःतत्स्व
रूपंतस्योत्तरंएकाग्रबुद्ध्यास्थिरेणांतःकरणेनशृणुअवधारयइहात्मार्कबोधेतवप्रश्नःअग्रयाश्रेष्ठया
भक्त्यासेव्यबुद्ध्यावदामिउपदिशामिकीदृशंतत्त्वगेयंश्रवणाधिकारिणोअप्रकाश्यं॥२७॥चंद्रमंदेतिस्वागतावृ
त्तेस्वागताख्येभोगिनिलक्षणात्चंद्रमंदरवशेगृहमपनेद्वेदक्षिणांप्रथममुत्तरमन्यत्॥मित्रवैरिभवनेगततदुत्थ
ददृष्टपतेऽल्पबहुतापकरोऽर्कः॥२८॥चंद्रमंदरवशेगेचंद्रःकर्कपतिःमंदोमकरपतिःतद्वशेगेनउक्तराश्यांप्रव
र्तमानत्वात्तदधीनेद्वेअयनेभवतःतत्रप्रथमंकर्कादिदक्षिणंदक्षिणायनंस्पष्टस्यदक्षिणाभिमुखग
मनात्उत्तरंअन्यत्मकरादिउत्तरंउत्तरायणंस्पष्टस्योत्तराभिमुखगमनात्दत्तितउभेअयनेस्पष्टस्वक

आत्मा: १६ मेरा मित्रवैरिभवने मित्रं चंद्रः वैरी शनिः तयोर्गृहे भवतः तत्स्तस्मात्कारणात् अर्कः सूर्यः इत्थमनेन प्रकारे
ण दृश्यते साक्षात् क्षिप्यते इत्थं कथं अल्पबहुतापकरः मित्रभवने दक्षिणायने ईषद्दाहको भवति वैरिभ
वने उत्तरायणे सोऽसौ रसिं तापकारी भवति अथाध्यात्मं चंद्रं मनः वशगे चंद्रमंदौ मन स्वकृषी मंदस्य च स्तुष्
वक्ष्यति चंद्रस्य मनस्त्वं तत्कर्मं तदधीने अपने हृकर्म ज्ञानात्मके गती भवतः तत्र प्रथमे कर्म दक्षिणा सर्व
पालकत्वात् औदार्यं युक्तं भवति यथा मातरं माश्रित्य सर्वे जीवंति जंतवः॥ वर्जितेन गृहिणा सद्गृहाश्रमि
तर आश्रमा इति वचनात् अन्यत् ज्ञानं उत्तरं श्रेष्ठं भवति प्रकाशनात् उभे कर्म ज्ञाने मित्रवैरिभवने मित्रं स्व
प्रकाशनात् मनः अनात्मविषयप्रकाशकत्वात् वैरि च स्तुः तयोः स्थाने ज्ञापके भवतः ततः कारणात्
के आत्मा इत्थं दृश्यते अनुभूयते इत्थं कथं अल्पबहुतापकरः वयो बुद्ध्यर्थं वा विषयस्तु तानि जनकर्मणा॥
आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथेत्यादि याज्ञवल्क्यादिवचनोक्त सन्मार्गे स्थितानां विदुषामा
त्मा ईषद्दुःखदो भवति यथाह्वारुज्ञो नरो नरं सुखदोरसात्तथा च स्मृतिः आचारः प्रथमो धर्मो नृणां श्रेयस्क
रो महान्॥ इहलोके परलोके जितः परत्र परमसुखमिति केवलविषयदर्शनमार्गे स्थितानां संसारिणां तु सीख
दा दात्मस्वरूपप्राप्त्युपायाकरणात् अत्यंतदुःखदो भवति तदुक्तं भगवता आत्मैव ह्यात्मनो बंधुरात्मैव रि राम १६

पुरात्मन इति तत्रात्र कथं कुर्मैति श्रुतिविरोधः तस्याः निर्विषयके ज्ञाने बलप्रणी आत्ममात्रविषयके ज्ञाने च
तात्पर्यात्॥२८॥ एवमयनउक्त्वा संप्रति तं नर्तु निक कोरि द्वादशमासानां नामध्ये कर्क सिंहौ मासौ मित्रस्य
रणासु खवशात्प्रहर्षिण्याह॥ उग्रभुज इति उग्रभुक्तो भवति जनो वने निशीदुर्गा वच्छ जयवतित तो हितोस्य भा
नोः॥ आरो तरूहमनएवर्णा दिपूर्णा हत्वा सिंह गृहमकरोत्तथैव मित्रः॥२९॥ इंदुश्चंद्रः निशिरात्रौ जनावने
लोकानां चारादिहिंस्केभ्यो रक्षणो उग्रभुक्तो भवति यत्नं करोति किं च पापवच्छक्रिया वैनीशक्तिः कौमुदी रूपालोक
रवृतिरक्षति तदानी चौराणां योगाभावदर्शनात् पालनमिति भावः ततः सज्जनरक्षणात्कारणात् भानोः सूर्यस्य चंद्रः
हितो मित्रं मस्तिमित्रत्वेनाभिमतो भवति अत एवं मित्रत्वादेव आरोपयन्मतः तरूहं तस्य चंद्रस्य गृहं कर्क हरि
पूर्णाः अस्य तरानिनानु कं छेकत्वा विधापयद्वा आरोहितोसौ जियो जनी यस्तु सख्यमित्रमित्यर्थः तेन तक्ष्मानकर्क
योः पूर्वकाल इति कौप्रत्यपविद्धे यं स्वस्वकीयत्वेनाभिमतं गृहं वस्त्र तस्करआरोपित उग्रहमित्येवान्वयः एतेन सिंहे
कर्मणा सत्त्वज्ञानहेतुत्वम युक्तं भवत्यध्यात्मनि पेय वृद्धिपूर्णामिवाकरोत्तदुक्तं तत्रापि याज्ञवल्क्यः आ
हत्या प्यायतेसर्गः सूर्याद्वृष्टिस्ततोषधी इति अथाध्यात्मकर्म वृद्ध आह इंदुर्मनः निशि संसारे उग्रभुक्तो भल
वत्प्रभानो राज्ञनः तद्गृहमनः स्थानं कर्म वृद्धिपूर्णां सकलेष्टसिद्धिसमृद्धं तदुत्तरं स्वप्रत्यगात्मप्रतिसार

आत्मा १७ कर्कटस्थाने बुद्धिं सर्वप्रकाशसमर्थं शेषस्य षट्कर्कटशब्दकर्मशब्दयोः सिंहशब्दबुद्धिशब्दयोः श्लेषेकोर्थः कु
टाधाराच्छिद्रकलिभ्यः कर्मन्यनुशासनात्कर्कटधातोः क्रियार्थे कन्यायां सिंहः सहनादिति निरुक्तात्सहनस्य बु
द्धिमत्येव संभवः तदुक्तं भगवता यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ। समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते इ
ति एते विषयसंबंधाः धीरं धीमंतं ॥२९॥ एवं कर्कसिंहावुक्त्वा कन्यामाह मित्रस्थेति मित्रस्य भौमस्य तथा गुरो
र्विष्टांशेन यं त्रोहितउच्चसंस्थः ॥ अतः समस्थेत्यग्रहं बुधस्य पित्रादिनुष्ठानरहितो भवेत् ॥३०॥ विन बु
धः कुजजीवयोः सूर्यमित्रत्वं वक्ष्यति तथा च मित्रस्य सूर्यहितस्य भौमस्य मंगलस्य तथा सूर्यहितस्य गु
रोः बृहस्पतेश्च वैरी वक्ष्यमाणरीत्या शत्रुर्भवति न यः सूर्यहितस्य सोऽयं बुद्रस्य हितः वक्ष्यमाणरीत्या मित्र
भवति उच्चसंस्थः कन्या बुधस्य उच्चं भवति तत्र संस्था स्थितिर्यस्य तत्सदृशो भवति इदं तु सभ
वमात्रत्वेन विरा तत्र खप्रशस्तिसंपादनेन सर्वात्मनः सूर्यस्य प्रशस्तिः संपादितेत्युक्तं भवति अतो मि
त्रशत्रुत्वान्मित्रमित्रत्वाच्च समस्य मित्रवैरिभावहीनस्य बुधस्य स्थितं गृहं कन्याभिन्नं प्राप्तराशिः सूर्यः पित्रा
दिनुष्ठानवृत्तादीनां कन्यागतसूर्ये महालयश्राद्धविधानात् चंद्रादीनां नैर्मल्य [illegible] न च हितः इष्टक
रभक्तश्चथाध्यात्मकर्मज्ञानेऽयुक्तो वेदवाचमाह बुधस्यारुरुक्षुयोगिनं भौमस्यारोपस्थे श्रियम् राम १७

पत्वं गुरोः रसनया एप्युनियंतृत्वान्नैद्रीभवति योगाभ्यासेन स्वास्थ्यजननात् आरोग्यमारि सिद्धत्वान्नियंतृ
त्वा रूपत्वं वक्ष्यति तथा चारुरुक्षुयोगी वक्ष्यमाणप्रकारेणात्मप्रियघ्राणोपस्थरसनेषु नियंतृत्वा
न्नैद्रीभवति योगाभ्यासेन स्वास्थ्यजननात् आरोग्यमारि सिद्धत्वात्सारनाद्यात्मप्रियमनोरंजकत्वान्नित्यमित्रं भव
ति उच्चसंस्थः उच्चत्वात्तिहेतु वेदवाक् तत्रसंस्थानदर्थानुष्ठानेन स्थितिर्यस्य तादृशः तथा च याज्ञवल्क्य
ः पत्रानां तपसां चैव शुभानां चैव कर्मणां ॥ वेद एव द्विजातीनां निःश्रेयसकरः परः इति अतः समस्य बु
धस्यारुरुक्षोर्योगिनो गृहे सर्वसंपत्स्थाने वेदवाचं प्राप्यात्मा पित्रादितुष्ट्यापि देवर्षिगर्योनमनश्राद्धानाप्र
सारणेन चरितो जातः कन्याशब्द वेदवाक्कन्ययोरेकार्थः कन्या कमनीया भवति केयं नेतव्येति वा कमने
ज्ञानोपनेइति वाक्कनेनेवीयान्काति कर्मणा इति निरुक्तात् ॥३०॥ संप्रति शत्रुस्मरणादुःखवशादु
जगत्प्रयाति नाह विरोधिनि भुविरोधिस्वशत्रोर्हितं तं विदित्वा चकारात्तपस्ये गृहेऽल्पतीक्ष्णा ॥ तथा
पिप्रसादधिया प्रेक्ष्य तस्य प्रसन्नप्रकाशाख्यग्रहेशः ॥३१॥ ग्रहेशः सूर्यः विरोधिबुधस्यापि स्वशत्रो
र्गुरुशत्र्योर्हितं तं वक्ष्यमाणप्रकारेण मित्रत्वं विदित्वा ज्ञात्वा तस्य बुधस्य गृहे कन्यायां अल्पतीक्ष्णो मेघा
हतत्वात्स्वरश्मिः शीतलः सन्नासीत् तीक्ष्णश्च शरत्काः मेघानावृतत्वात् तादृशमातपं घर्मं चकार क्रतवावपर

आत्मा १८ स्मेपरं तु आतपकरणजन्यदुःखस्य परिणामित्वप्रतिपादनायउक्तमत्रानुशासनं च। चित्सुखापत मेदं हो
हृष्टिर्भवति शारदी। निवचनो रवमुक्तमिति भावः तथापि स्वशत्रुमित्रत्वेपि तस्य समस्यापि बुधस्य धियो
स्वविषयारण्यबुद्धी नो प्रसादं नैर्मल्यं प्रेक्ष्य ज्ञात्वा प्रसन्नप्रकाशः स्वयमपि निर्मलतेजाः बभूव तस्य गृहे द
शीभी पुत्रभसुवासी दित्यर्थः अथाध्यात्मत्व ज्ञक्षुषोः मनुशनित्स्यत्वं तयोरात्मशत्रुत्वं च वक्ष्यति ते
ष्या च ग्रहेशः इन्द्रियेशः तत्त्ववर्जकत्वात् मायाजागरे बहिरनुसरणधर्मिणोपि अनुक्तेसमस्तकरेणो
हि दिनतस्य दृक्षात्॥ स्वप्ने सुषुप्त्योः संहरतेसमः कः स्मरत्यन्ते यादृवितत्ववृत्तिदर्शिगोद्धिये शद्रूति भागव
तोन विरोधि आरुरुक्षोर्योगिनोपि स्वशत्रोरनात्मप्रकाशकत्वेनात्मद्वेषाः त्वचक्षुषोर्विषयेन
नीथै दर्शनगमनादौ तत्त्वानदानादौ हि मतत्वमिदं मम मेदृशा भवतुमिति उद्योगं भ्यासरक्षणाय रत्वावि
दित्वात् तस्यारुरुक्षोर्योगिनोपि हे सर्वसंयत्कुरे योगाभ्यासे अग्निहोत्रसेवने वाल्यनी श्रोत्र आरंभकाले
श्रमः प्रत्यवायं दुरितोत्तरं तु रवं अतः कारणान्मदुःखं चकारत्था पितस्यारुरुक्षोर्योगिनोपि योगप्रसाद
समाधानं प्रेक्ष्य स्वयं प्रसन्नप्रकाशो बभूव सर्वदा कर्मफलदानेन भासमानवासीदित्यर्थः॥ ७॥ तु
लामाह अथेति अथ श्रोतमार्ग विरुद्धात्ममंत्रीसरवा म्लेच्छराजस्य मंदस्य इत्युक्तः॥ पुरःस्थः ... कौ राम १८

र्यनाशस्य कर्ता रिपुः सर्वथास्वात्तुलग्नस्य नाथः॥ २०॥ अतस्तु उक्ते राहुकलिग्मरश्मिस्तथा तुजनानां तको
पिप्रवृत्तः॥ गृहे दक्षिणे भागे वोदीप्यते नैः स पर्याप्तः स्नानभोज्यौ शिमिञ्चु॥ २१॥ अथ शब्दः दुर्गो दक्षिण
गोलः सुमेरुस्थानां लोकानां रात्रेरारंभश्चेति ज्ञापनार्थः तथा चेत् पूर्वं षण्मासात्त जगो लो दिवसे श्चे
ति ज्ञेयं अथानेन तं श्रोतमार्ग वैरिकवन्ति निविरुद्धात्ममंत्री विरुद्धात्मानः प्रतिकूलस्वभावाः असुरा
स्तेषां मंत्री उपदेष्टा म्लेच्छराजस्यानायमालकस्यानेमंदस्य अल्पगतेःशनैः सखेव स्यमाणादित्यामि २
त्रं पुरः स्थः पूर्वपश्चिम देशगामिनां मनुष्याणां मध्ये स्थितः सदा कार्यनाशस्य नित्यमिद्धंसस्य प्रति
बंधस्य वा कर्ता संपादकः तदुक्तं ज्योतिःशास्त्रे वामे शंकेन वोढायाः सुखदा निश्चदक्षिणो॥ धनेधान्य
चपश्चस्थे सर्वनाशः पुरःस्थितः इतिद्रसमुपलक्षणं स्वात्तुलग्नस्य शत्रुः शनिः तस्यो ... तुलाया
नाथः पतिः अतएव हुक्तः स्वस्य स्वसर्व ... सर्व प्रकारेण रिपुः शत्रुर्भवति अथ अध्यात्म अथ शब्द
द्वत उत्तमजन्म शरीरावच्छिन्नानामात्मनां केवलसंसारकृत्यारंभप्रतिपादनार्थः श्रोतमार्गे निषिद्ध
त्वो विमुखत्वेन जडानि त्याह्य चिशरीराभिमानिनः तेषां स्वरक्षणप्रवर्तकः म्लेच्छराजस्य म्लेच्छाः व्या
करणलक्षणासंस्कृतशब्दभाषिणः तदुक्तं व्याकरणाध्ययनप्रयोजनकथनावसरे महाभाष्ये तेऽसु

त्य शुद्धबुद्धमुक्तस्वभावात्मबोधके विरुद्धात्ममंत्री औपनिर

आ॰त्मा राहेलयोहेलयइतिकुर्वंतः पराबभूवुस्तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदप
१९ शब्दः म्लेच्छा मा भूमेत्यध्येयं व्याकरणमिति निषेधाज्ञानात्मनि देहादौ प्रवर्तकः तस्य मदस्याल्पप्रकाश
कस्य चक्षुषः दृष्टिव्याप्तेर्ग्राहकत्वसाधर्म्यं गामित्रेपुरस्थे स्त्रीशरीरे प्रत्यक्षविषयः त्वग्रूपः तत्रा
नुरक्तत्वादनेन कार्यस्यास्मिन्जन्मनि सत्त्वाश्रवणमननादेर्नाशस्य करणोक्तेश्चक्षुत्वं भवतीति तथा
यदृष्टा वोन्मादकारिणी ॥ स्पष्टो भवतिमोहापसानानमस्यितो कथमिति द्विजराजमुखी मृगराजकटिग
जराजविराजितमंदगतिः ॥ यदि सा वनिता हृदये वसति क्व जपः क्व तपः क्व समाधिगतिरिति चस्य वं सर्व्वथा
त्वग्रूपमात्मनः शत्रुमुक्तानस्त्येवकररूपत्वेन च शत्रुत्वमाहित्वारितुंगस्यनाथाइति स्वस्यात्मनोऽरन
ल्पप्रकाशकत्वेन विरुद्धं च स्तुतस्य तुंगप्रशस्तिः प्राप्तिस्थानं लेखनादिकर्म तस्य नाथस्तत्प्रवर्तकः च
णाकरलोहो व्यक्तावपुवा दहस्यादिलेख्यलेखनेन चक्षुषः प्राशस्त्यं भवतीति भावः अधिदैवतेऽप्य
वमेव बिंबप्रतिबिंबयोरेकरूपत्वात् ॥ ३२ ॥ अतं इति अतः शत्रुत्वा तिग्मरश्मिसूनोः कृपाकिरणाल्लुड्डे
शुक्रस्थाने तुलायां दाहकः दहनेकिसेनापकरो जातः तथा ज्वरजायकरणेन तत्केऽपि प्रमोपि त्रिनानलो
कान्तुनाशयितुं प्रवृत्तः उद्युक्तो जातः स्वयं पुत्रत्वात् तत्तदुक्तश्रीश्चिन्तस्य दिनान्य स सर्वेकार्णिकवास राम १९

राः ॥ पमरं रुषत्रेति विख्याता मित्रपुक्तत्र जीवती तितरा भार्गवः शुक्रः गृहं तुलां तत्र कालिकं जनमित्यर्थः रक्षि
तु निर्भयं कर्त्तुं दीपदानैर्दीपैर्दीनैर्भगवादिद्ध्वाणां स्नानभोज्यादिभिश्च वात्तानेश्च भोज्यैरत्नैश्च भोज्यभ
क्ष्यइति नियमात् आदिशब्दात्तुलसीवनपालनादयो धर्माः तुलासंस्थे दिवाकरे तेषां विधानात् सपर्यापा
रतः सूर्यप्रीतये प्रजायां तत्पुरोभूत अथवाध्यात्मपक्षे अतः शत्रुत्वात् जडदेहत्वे चोग्रहेष्वहणसाधने करो तिग्मर
श्मिरात्मा ब्राह्मणानां प्रतिग्रहे अर्पमानेन क्षत्रियादीनां मनुष्याणां युद्धादिकर्मणि प्रवृत्त्याद्युत्पादनेन दुःख
दो भवति तथा तत्कोऽप्यस्तु जनान्ब्राह्मणक्षत्रियादीनत्तु प्रतिग्रहयुद्धादिकर्म स्फुटं तु प्रवृत्तो भवति तदा भार्ग
वः करः गृहं शरीरं रक्षितुं दीपदानैः स्नानभोज्यादिभिश्च पुरोपयत्नतः सपर्यापरितो भवति धर्मनिरतस्य नरस्य
शुची नाम्नी मनोगेहे जन्मना प्रतिग्रहयुद्धादिक्रूरं कर्म विनैव सकलेष्टसिद्धिर्भवतीति भावः तत्रस्तनयः
स्मत्तयश्च दक्षिणावतामिदिमानि चित्राद्दक्षिणावतीत्यादि विसर्पसि ॥ दक्षिणावती अस्मत्तनं भजंती दक्षि
णावतः प्रतिरजन्माः पुरित्यादा चित्राविविधानि कर्माणि दक्षिणावतां दक्षिणावतः उत्सर्पः प्रथमाध्यष
ष्ठाः स्वर्पसः स्वर्यप्रभाः दक्षिणावतो ज्योतिर्मर्त्यलोके तद्वंतो भवंतीत्यर्थः अस्मत्तनुरो आशादिरूपं तथा
चमाघः अस्मत्तनामयत्सतोमंत्रजिह्वजुहुजि ॥ शोभेवमंदरस्तुब्धक्षुभितांभोधिवर्णनेति सा वा एषा

आत्मा: ज्मतारुतिरेवयद्रूपाकृतिरम्नत्राकृतिस्याकृति [illegible] रम्नत्रारुतिराज्याकुतिरम्नत्राकृतिः सोक्तौ

२० रुतिरिति वालेराचमृतिरंतेप्राप्तुवंति भूरीपाप्त्वानवस्त्रोभिलिलसौपिः प्रतिस्त्रपान॥ नैवोशिकस्त्री

धुर्यरत्नौ स्वर्गे महीयते॥ गृहधान्याभयोयानवस्त्रमाल्यानुलेपन॥ यानिवृक्षोप्रियशय्यारत्वान्यनेसु

रवीभवेरिति याज्ञवल्क्यारयः तुलाशब्दकरशब्दयोर्व्यवहारसाधनेनैकोऽर्थः॥३३॥ वृश्चिकमाहतुरि

तेति मित्रेरापस्मरणावशान्प्रामिनाल्पराव्रतदुरितालिभिर्देहतिहीनकृतिंमुविमंगलोभवतिपुराणकृ

ते॥ इतिनद्विचित्रचारितैर्मधुरस्तरगारेगामुरितस्यवराविः॥३४॥ मंगलोमुविपच्छिन्नादुरितालिभिःच्य

लयोवृश्चिकाइत्युक्तंज्योतिःशास्त्रेतथाचालिसदृशैःपीडाकरैर्दुरितैःपापैर्हीनकृतिस्वश्रेयस्यवृत्ता

योगजनरहतिदुःखयतिपुरायकृतेधर्मंकुर्वतेमंगलःसुखकरोभवतिअत्रमंगलपरस्यावृत्तिःअ

थवाभवतिभवःशिवःसइवाचरतिकल्याणरूपोजायतइत्यर्थःअथकाभवतिसत्रासद्रूपतोमस्या

स्त्रमः भसत्रायामितिधातुपाठात्पुरायनेहेइष्टंसाधयतीत्यर्थःतथाचोक्तंसमालिंग्यचौरंघनक्र

ठिनयीनोत्तनकुचोरमेतेहमंतेरसिकरमणीभिःसुकृतिन॥नपत्रप्रस्वेदानचपुवतिरवेदोनिधुवने

त्रियामानक्षामाविरमतिनरासारतिविधाविजितिकिंचपुरायकृतेअलिचौरितोयोगिवेभवतिपूर्ववत्स २०

MEMORIAL

वैसिद्धीःसाधयतीत्यर्थः इत्युक्तप्रकारेणतद्विचित्रचरितैःतस्यमंगलस्यविचित्राणिपथ्यायोग्यनाना

प्रकाराणिचरितानिकर्माणितैर्मधुरःस्निग्धोरविःतस्यगारगःतस्यमंगलस्यआगारगृहंवृश्चिकलग्न

इतिप्राप्तोतिसःतद्गारगःसन्मुरितएवमासानामार्गशीर्षोस्मीतिभगवद्वचनात्प्रशस्तेमासेमग

लगृहेप्राप्तमनास्ववासीरित्यर्थःअथाध्यात्मंउयस्तमाहमंगलेउपूस्यताद्रूपेपरविरात्मामुरितोभ

मान् आदित्यशब्दात् स्पर्शरूपरसगंधाः तत्तद्विषयान् तान् तान् यथायथं प्रसिद्धान् विषयान् विशेषेण सि
न्वतिते विषयाः उत्कर्षेण बंधकाः षिञ् बंधने इति धातुपाठात् तान् उत्कृष्टान् गृह्णंति उपादद्दते तस्मा
त्कारणात् ते श्रोत्रादिभूताः बुधाद्याः बुधप्रथमाः आद्यग्रहणात् भृगुशनिगुरुकुजाः ग्रहाः कथिताः उ
क्ताः ग्रहेति पाद्दानुद्दति धात्वनुसारेण बुधाद्यास्तु पलक्षणात् सकलात्ममनोभूतौ सूर्यचंद्रावपि ग्रहौ भ
वतः करणभूतैर्बुधादिभिश्चंद्रस्य विषयग्राहकत्वात् तथा भूतेन चंद्रेण सूर्यस्यापि विषयग्राहकत्वात् तथा

चोक्तं एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ॥ त्रीँल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्यय इति विष्णु
:स्वरूपः तथा ह्युक्तं ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ॥ केयूरवान्म
करकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्र इति मनुष्यवन्मूर्त्तेर्वर्णनं तु अति प्राकृतानां बु
द्ध्यभिप्रायेण प्रतिमा स्वल्पबुद्धीनां योगिनां हृदये हरिरित्युक्तिविधानात् भागवतेपि एक एव हि लोका
नां सूर्य आत्मादिकृदीश्वरः ॥ सर्ववेदक्रियामूलं ऋषिभिर्बहुधोदितं इति नैव द्वादशगणानुक्त्वा एता भग
वतो विष्णोरादित्यस्य विभूतयः ॥ स्मरतां संध्ययोर्नॄणां हरंत्यंहो हरिर्नैर्दिन इति चरणेषु वशेपि द्वादशसर्गे द्वा
दीन्विषयान्भोक्तुं चारितुं दुष्करं तपः ॥ पयी सोसिं प्रजाः पातु मोरसीत्येन वर्तितुम् इति ज्योतिर्विदप्यव
ह इति यत्स्वभावकस्य ग्रहस्य यत्स्वभावके ग्रहे लग्नेपगडूवीते सनादशा भवतीति सूर्य एव सर्वात्मयोगी
भूत्वा सर्वमनुभवतीति भावः ॥ बुधादीनां श्रोत्रादिरूपत्वं त्वनुपदमेव स्फुटीकरिष्यते अत्र रूपकालं
कारः तद्रूपकमभेदो य उपमानोपमेययोरिति लक्षणात् अथाध्यात्मं श्रोत्रं च बुधो भवति त्वग्भृगुर्भ
वति अत्र त्विषोरिर्भवति रसग्रंथश्चेत्यस्य: शांतादिर्नवविधो व्याख्यास्यमानः तथा मधुरादि: षड्विधः तथा
गंधः सुरभिरसुरभिरं घ्रातपो ज्ञापकेर सनं च घ्राणं च वा गीः शनैर्भोमो भवतः एतानि स्वनोदीन तज्जहिंबु पार

गृह्णाति जानं निज्ञापयतीत्यर्थः तेषु बुधाद्यः तानि श्रोत्रादीनि दिक्पाणि ग्रहाः ग्राहकाणि कथितानि उक्तानि
शेषं पूर्ववत् ॥ ५३ ॥ संप्रति तेषां विशेषकर्माह श्रुत्वा स्पृष्ट्वेति मंदाक्रांता वृत्तं मंदाक्रांताम्भौ नौ तौ गस्मुद्
त्तुस्वरा इति लक्षणात् श्रुत्वा स्पृष्ट्वा वदति हरति प्रेक्ष्य संचारकर्ता गृह्णन्मुंचन्नपि रसमयं गंधमाघ्रायक
र्मा ॥ कर्ता भिन्नो भवति हृदयाकाशसंचारिभिस्तैः सर्वैर्मुक्तो यदि सततु तदा मुक्त एवान्यथातो ॥ ५४ ॥ अ
यं दृश्यमानः आत्मा उत्करीत्या सूर्यः हृदयाकाशसंचारिभिः हृदयसदृशमंतर्वर्ति आकाशगगनं तत्र ग
मनशीलैस्तैर्बुधादिभिः करणभूतैः एवमनेन प्रकारेण कर्ता धातूपात्तव्यापाराश्रयो भवति त्तायतेर
वं कथं श्रुत्वा स्पृष्ट्वा वदति हरति श्रुत्वा वदति स्पृष्ट्वा हरतीत्यन्वयः वृत्तानुसारेण तथोक्तमिति भावः
करणभूतेन बुधेन श्रवणेन वदति च करणभूतेन शुक्रेण स्पर्शानि हरति च प्रेक्ष्य संचारकर्त्ता करणभूतेन श
शिना प्रेक्ष्यति गच्छति च रसमभयं गृह्णन्मुंचन्नपि करणभूतेन वृहस्पतिना भुंक्ते उत्सृजति च ॥ अत एव
धनुर्मीनगते सूर्ये सकलकार्यनिषेधः तदानीमोनस्यापि विधानात् गंधमाघ्रायकर्मी करणभूतेन मंगलेन तज्जि
घ्रति कामयते च पुराभिंदुर्वाकाविरमितो ज्ञा अत्रजापनात् ॥ इद्दो विश्वस्य कर्मणो धर्ताविज्ञो पुरुषु तद्इति श्रुतेः
एक आत्मेत्यादि निरुक्तोद्देवमुक्तमिति भावः अत्रत्का प्रत्ययार्थः पूर्वकालो न विवक्षितः तथा चोक्तं अ

आत्मा: ५० रागोनीत्यपिस्तु वचं सतु रूपेस्तु पदिसैर्वैर्बुधादिभिः मुक्तो संबद्धो भवतितदा मुक्त एव कर्त्तृत्वशून्यः शुद्धो भ-
वति अथवा एभिर्मुक्त इति वक्तव्ये सर्वैरिति वचनमर्थविशेषस्य ज्ञापकं तथा च सर्वैर्जगत्कारणमायादिभि-
रित्यादि व्याख्येयं अन्यथा मायादिसंबद्धत्वेनोन मुक्त इत्यर्थः अत्र चंद्रादिषु सर्वेषु ग्रहेषु सूर्यगतेषु ...
लयः मायादिनाशे तु महाप्रलयः तदानीं सर्वेषां मुक्तिः पुनः सृष्टिस्तु स्यात् तत्कारणाभावादिति विवेकः
ननु सूर्यस्य मायासंबद्धत्वे किं प्रमाणमिति चेत् श्रुतिः प्रमाणमिति गृहाण तथाहि पूर्वापरं चरतो मायये-
तौ शिशू क्रीडन्तौ परियातो अध्वरं। विश्वान्यन्यो भुवनाभिचष्ट ऋतूंरन्यो विदधज्जायते पुनरिति एतौ स-
यौ चंद्रमसौ मायया शिशू क्रीडन्तौ बालकाविव अयाथार्थककर्मप्रवृत्तौ अपार्थकं तेऽर्भकौ स्थितौ इति
भागवतात् ... मायया ... विरम तदुपरम मायया परियातो अध्वरं अन्त-
रिक्षे लक्ष्मीकृत्य गच्छतः षोडशस्वं तारिक्षनामस्तु अधरशब्दस्य पाठात् तयोरन्यः सूर्यः अभिचष्टे अभि-
मुख्येन पश्यति अन्यश्चंद्रमाः ऋतून्समयान् तिथ्यादीन् विदधत् कुर्वन् पुनः जायते आविर्भवति एत-
न कर्मणा जन्ममरणे दोषाय धकत्वात् ज्ञानिनां तु सर्वज्ञत्वं मायात्वेन शुद्धसत्त्वप्रधानात् तदुपहितस्य
सूर्यस्यैव ज्ञत्वात् यः सर्वज्ञः स सर्वविदिति श्रुतेः मायाशब्दस्य कादृशस्तु प्रज्ञानामसु पाणेश्च धूनि राम ५०

तं सूर्याराधकत्वादिति शेषं स्पष्टं अथाध्यात्ममयमहं भ्रान्त्यया अथ यः आत्मा प्रमाता हृदयाकाशसंचारि-
भिः आकाशसदृशं सर्वाधारं हृदयं तत्र संचारिभिः स्तैः श्रोत्रादिभिः एवं कर्ता भवति एवं कथं श्रुत्वा वदति स्प-
ष्टो हरति पश्यं संचारकर्त्ता भवति रसं गृह्णन् भुंजानः सन् भुंजन्नपि गंधमाघ्रायकामी भवति श्रुत्यर्थे
तु पुरी स्थूलसूक्ष्मकारणशरीराणां वज्ञो विरागः तद्धानवज्ञः कस्माद्धुजीयतीति सतद्दति निरुक्तात् शेषं
पूर्ववत् सत्वेवं कर्त्तात्मा पदिमायादिभिः श्रोत्रादिभिश्च मुक्तो भवति तदा मुक्त एवान्यथा नो माया तमः
प्रधानात् तदुपहितस्य जीवस्य किंचिदज्ञत्वात् इत्यर्थे तु अध्वरमतः करणं अन्यः साक्षी आत्मा अभिचष्टे अन्यः
मनः ऋतून् शरीराणि त्वगादीनि षट् धातुरूपाणि शेषं सर्वं पूर्ववत् अत्र मनआदीनां सर्वेषां लये सति स सुषुम-
: अभ्यासवैराग्याभ्यां निरुद्धे मनसि समाधिः तस्मिन्सिद्धे सति सूर्यलोकप्राप्तिः सिद्धयोगेन त्यजन्देहममृतत्वाय क-
ल्पत इति याज्ञवल्क्यस्मृतेः तदानीं सकलदुरितध्वंसात् सैव मुक्तिः स्तु न तेन स पुनरावर्त्तत इति श्रुतेः पठित्वा
न निवर्त्तन्ते तद्धाम परमं मम इति भगवद्वचनाच्च आत्यन्तिकी मुक्तिस्तु सेयं गासंभव भवति सूर्यस्य सर्वजीवसम-
ष्टित्वात् उक्तश्रुतेरिति विवेकः अत एवोक्तं वेदान्तग्रन्थेषु शुकवामदेवादीनां मुक्तिश्रवणमर्थवादः इति ए-
तेनात्मन एकत्वे एकस्यात्मनो मुक्तौ जातायां सर्वेषां मुक्तिप्रसंग इति मन्यमानानां नित्यभेदवादिनः परास्ताः

MEMORIAL

आत्मा: इतरत्सर्वमुपरिष्टात्स्फुटीकरिष्यते स्यादेतत् धर्मादिमार्गप्रवर्तकाः ये वेदव्यासादयः तदुक्ते तेषामप्यन्यथ
४१ गामित्वमूपनेतथाहि स्वस्य कानीनत्ववर्णनं तत्र विप्राहि क्षत्रियात्मानो नावुक्तेयाः कदाचनेति याज्ञवल्क्यस्म
तिविरुद्धं किंच पंचानां पांडवानामेकद्रौपदीभर्तृत्वसंपादनं तस्मादेकस्य बह्व्यो जाया भवंति नैकस्या बहवः
सहपतय इति श्रुतिविरुद्धं अन्यच्च धार्मिकाग्रणी राज्यं जीवनादिलोभेन गुरुवधार्थं मिथ्याभाषणवर्णनं त
स्मरणावर्णनं च वर्णितं नहि वधोयं तत्र तत्र साक्ष्यं न तद्वदेदिति अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नत्वि
ति। च स्मृतिविरुद्धं च वचनं देव चरितं चरेदिति महात्मनां तेषां वचनं ग्राह्यं न त्वाचरणमसामर्थ्यादिति वाच्यं
पघरा चरति श्रेष्ठस्तत्तदेवेतरो जनः॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तत इत्यादि भगवद्वचनेन सदाचरणा
स्यैवेतरप्रवर्तकत्वात् अन्यथा सर्वं व्रतकथासु अत्रैवोदाहरंतीममितिहासं पुरातनमित्यादिना पूर्वेषांव
मकथासु अत्रैवोदाहरंतीममितिहासं पुरातनमित्यादिना पूर्वेषां महताचरणावर्णनं व्यर्थं स्यात् एवं सति तेषे
षां महाप्रलयादि सर्वे कार्थ धात केवचनेकथमप्रामाण्यमेतद्भावचकृतः सिद्धिरिति चेत् अत्रोच्यते सर्वा
जीवाज्ञमुद्दिश्यैव भगवान्विष्णुर्व्यासः अयं ध्यात्म अन्नमयकोशाभिमानी आत्मा भारतो नाम भरतवंश
वर्णनं कृतवान् तत्र प्राणावच्छिन्नमतिर्ज्ञायते सरस्वती वा भारती वा निति वागेव सरस्वती प्राणो भरतइ राम
४१

था

ति श्रुतेः तत्र स्त्रीमन्यन्तिः मत्स्यामत्राः जीवाः प्राणेभ्योऽन्नं भक्षणाय ति निरुक्तात्तारविद्यं ति ज्ञानोपा
दिशेन विषयाय संसारेणेन च जीवत्वान्मोचयतीति व्यास आरूढा योगिनस्तेषां कन्या स्त्वानुपयोगादियुक्ता भिमता स्त्री
ततः स्त्रीणां स्थिता सत्यवती सत्यब्रह्मवेदः तद्वती अध्यात्मविद्यासा द्वीपे हृत्पद्मे अवधिर्यो गतिः पाराशरः आपा
रेणां स्त्रियस्मिन्नस्मिन् ब्राह्मणशरीर आवरकत्वान्नीहारेण माया ज्ञानेनावृता तस्याः पराशरात् कामादिश तु विनाश
कात् उद्योयात्तु नामभव अस्य पराशरदृतिश्रुतेः इदं आत्मा उत्तिनोषीः व्याससंज्ञम्य व्यस्यतीति विवेचयति वि
विधमुपदिशतीति च व्यास स स्याविर्भावो वर्णितः जितेंद्रियो मुमुक्षुरात्मविद्यासाधकः सर्वविद्भव
तीत्यर्थं तान्यपि तस्य तेन कानीनत्वदोषः परिहृतः किंच व्याससंजातं रूपं त्वादाय रुरुक्षु योगी सत्यवत्यात्म
विद्यया अनुगृहीतानन्नमयकोशाभिमानी आत्मा विकार्यात् विलनिअविशब्द इति धातुपाठान्नवदवि आपाकर्म
मात्रसाक्षिकायां प्रवर्तनेन दासत्व अधनरामः सर्वप्रपंचधारणात् प्राणमयकोशाभिमानी दुष्कर्मसंगत्या
साक्षिके रवेद्रियेः सुपरिणामे सुखभिन्ने तन्नभिमन्यमानान सर्वाधोप्युच्यते अतएव तत्रैव पुनस्त्रीनसा
क्षिकायामुपासनायां प्रवर्तनेन दास स्त्वयाद्धः पडिगतावितिधातुपाठात् मननात्मनोमयकोशाभिमा
नीग्रामविरक्तः शुद्धकः अतएव तत्रैव पुनर्दासस्यां दासो रस्येतेरुपदासपतिकर्मणो इति निरुक्तात्सकल

सुखसाधिकायां विद्यायां प्रवर्त्तनेन दासस्य विदुरः विद ज्ञाने इति धातुपाठात् विज्ञानमयकोशाभिमानी
सात्विकः सर्वदर्शीत्यदानीं स्वसुखानुभवात् स्वयमेव ज्योतिरर्थं चिदचिद्रश्मी विचारमंथनेन प्रवर्त्तनेन
दासस्य वधूकः शुद्धः शुकः सुखरूपः तदुक्तं निरुक्ते आशु इति वशु इति च क्षिप्रनाम नी भवत इति कमि
ति सुखनामेति च आनंदमयकोशाभिमानी ब्रह्मसुखानुभवकर्त्ता परमः शांतः एवं पंचकोशाभिमा
नी व्यासो मुनिः भगवान् स्ववर्णनमेव कृतवान् स्वस्य सर्वसाक्षात्कारत्वादिति गम्यते तथाहि तत्रादौ पं
चोर्मिनोमयकोशस्य धर्मप्ररूढिरिद्याभिः देवतानुग्रहेण तत्प्रकृति का धर्मभीमार्जुननकुलसहदे
वाः पंचपुत्रा वर्णिताः तत्र पृथायां त्रयः माद्र्यां द्वौ ते क्रमेण रसननयनश्रवणघ्राणत्वगूपाणि ज्ञा
नेंद्रियाणि तत्र त्रयाणां प्रधानानां विषयेषु प्राचुर्येण प्रवृत्तेः पृथापुत्रत्वं अल्पयोर्मद्रनात् माद्रीपु
त्रत्वमिति ज्ञायते अर्थसाम्यात् तत्र धर्म धृञ् धारणे इति धातुपाठात् सर्वेषां मा अप्यभूतः सम्भवर्ति
अतएवाजातशत्रुः सत्यपरो रसनं भवति तद्विषयस्य तन्मूल जीवनाभयकर्तृत्वात् सम्भवति त्वत्यागे च
ते जिह्वा श्रीमनतिअन्नम् तन्मूलजीवनानुमा दुःखितभीमः भिभी भये इति धातुपाठात् भीमो द्विमात्र
स्मात् द्वौ यतस्माद्वति निरुक्तात् सर्वेषां भयंकरः नेत्रं भवति नेत्रस्य भयंकरो बंधकत्वात् अर्जुनः

ऋजुगति स्थानार्जने यो पार्जनेत्थि इति धातुपाठात् सर्वेषां कार्यकर्त्तायरमैश्वर्येण तु अतएवोपदेशः श्रवणं
भवति श्रोत्रद्वारा सत्बुद्धिग्रहणेन सर्वार्थसिद्धेः नकुलः कुत्सितं लातीति कुलः ला आदाने आतोनुपसर्गे क
इति सूत्रात् तत्रद्वितीयो नकुलः नञ् ग्राण न पात्रवेरानासत्यात् सुचिन कुलं नरखनपुंसकनक्षत्रनक्रनाकेषु प्रकृ
त्येति सूत्रेण नञः प्रकृतिभावः सर्वेषां पुरीक्षकः घ्राणं भवति घ्राणस्य गंधग्रहणेनामृतादिवस्तुषु परीक्षादर्शना
त् पश्शुषु तुस्फुल तरदर्शनात् सहदेवः देवैः सह वर्तमानः वोपसर्जनस्येति सूत्रात् सहस्य सत्वाभावः सर्वे
षां सुंदरः पूजकः त्वग्भवति इंद्रियाणामत्र देवाः उच्यंते इति निरुक्तात् स्पर्शेणत्वचेंद्रियाणां पूजनात् त
द्ननंतरं माद्री प्रमादकरणात् विषयासक्तिस्तस्यामासक्तस्य पांडोर्मनोमयकोशस्य नाशः विषयान्ध्यायत
पुंसः संगस्तेषूपजायते ॥ संगात्संजायते कामः कामात्क्रोधोभिजायते ॥ क्रोधाद्भवति संमोहः संमोहात्स्मृ
ति विभ्रमः ॥ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यतीति भगवद्वचनात् इत ऊर्ध्वं तपस्विभिः भीष्मब्र
ह्मचर्य धृतराष्ट्र प्राणमयकोशं चरक्षरणार्थं प्रापिता नो द्विपाणि धर्मादिरूपाणि रसनादि ॥ नित ऊर्ध्वं
रूपेण धृतराष्ट्रेण जीवेन दुष्टसंगत्यो पेक्षिता नानासत्संगत्यापेक्षिता नाम मनोमयकोशसंबंधिनां ऊर्ध्वं
त्यापांडवाभिधानानां स्वस्वविषयजन्यप्रारब्धमिंद्रियाणां स्वस्वप्रकृतिप्रकाशार्थं सवासादि वर्णनं तु प्र

आत्मा: ४३

बोधं चंद्रोदयनाटकादिग्रंथेषु दंभाहंकारादीनामिव तथोपनिषदादिषु मनआदीनामिव पुरुषत्वारोपेण
बोध्यं तदानीं मुक्तरूपो धृतराष्ट्रो जीवः उक्तरीत्या पांडवाभिधानानीन्द्रियाणि दुष्टकलिसंगत्या दुर्भ्याभो
ज्यादिना पीडयामास विज्ञानमयकोशेनोक्तरीत्या विदुरेण बहेराजनत्वयास्तु वृत्तीनि पांडवाभिधानानि त
वैव सुखसंपादकानीन्द्रियाणि नोपेक्षितव्यानि दुष्टसमत्यास तदुपेक्षणेन च महत्यकीर्त्तिर्भविष्यतीत्येवं
बोधितोपि धृतराष्ट्रः प्राणमयकोशाभिमानी जीवः दुष्टकलिस्नेहात् जतुनिर्मितगृहे ज्वलनहेतुके देहे
दशाहच परंतु तदानंतरमेव विज्ञानमयकोशेन विदुरेण म्लेच्छभाषया अ संस्कृतया तत्स्मात् कुमारं ज्ञानं
ज्ञ घ स्यावागाविश्वजिवान्धिसरस्वतीनिरूपेः ततोनिर्गमनोपायं प्रतिबोधितं उक्तरीत्या धर्माभिधानं रस
ततेन बोधितान्मार्गात् पांडवाभिधानामिंद्रियाणां कुंत्यभिधानधन्वासहसंतापात् निर्गत्य विषयेषु ब्राह्म
णासंगात् परोक्षं भिक्षाचरणं ततो ब्राह्मणशरीरसंगेनैव क्रमः सात्त्विकः आरुरुक्षुर्योगी तदनुग्रहेण च
दुपरस्कन्धो विष्टप्रजिह्ववजिय धनेन च मद्दुर्द्धं क्षलस्यैवाचलपदस्यानंदस्य शैलो शोभनो नद्यः तस्य
प्रकाशिकाकृष्णात्कृष्णाविषयाद्दुर्योधनाद्यभिधान उक्तरूपदुष्टनाशिकासा अ धो दृष्ट्या स्थूलदेहद
ष्याउपरिस्थितं स्वं च लोमतस्यः अव्याकृतेनेत्ताप शरीरे बद्धः मर्त्यत्वादिधर्मा कर्मादिमतो जीवः प्राज्ञ

राम ४३

तद्वैत्यमर्जुनाभिधानं श्रोत्रेंद्रियं तेनित्यशुद्धबुद्धमुक्तस्वभावात्मश्रवणानंतरेण श्रोत्रेणामर्त्यत्वादिविशिष्ट
स्य जीवस्य नाशो भवतीति भावः तद्वारा कृष्णाउक्तरूपा बुद्धिः अर्जुनाभिधान श्रोत्रसहितानि धर्माद्यभिधा
न रसनादीनीन्द्रियाणि प्राप्य चेन्द्रियाणामप्यात्मसुखसाधकत्वमितिभावः एतेनैकस्या द्रौपद्याः पंचपा
उवभर्तृकत्वदोषो निरस्तः अन्यच्च ततः कृष्णानुग्रहोत्तानां स्वस्वधर्मेण सकलविषयजेतृणां सकलसंप
त्या राजसूयकरणा राजा सर्वप्रपंचपतिर्मतः स्यात्तेनैकं ध्येयेन शिथिलीक्रियते यस्मिन् स समाधानरूपो यज्ञः
तदनुष्ठानं अत एव मनोमयकोशस्य पांडुभिधानस्य प्रसादः ततः दुर्योधनाभिधानस्य दु[illegible]कलेर्जाते
स्थलभ्रमः स्थले जलभ्रमः अनात्मन्यात्मबुद्धिः आत्मन्यनात्मबुद्धिः तत्रानात्मन्यात्मबु[illegible]नेरोषादि
राजसनामस स्वभावाविर्भावश्च तत्रैव क्रमस्यारुरुक्षोर्योगिनः भीष्माभिधानब्रह्मचर्यकृतपूजासम
येत्र नात्मप्रकाशकः अत एव शिशुपालः बालकबुद्धिरेष कोदेहाभिमानः तस्य तु दर्शनेन तत्त्वज्ञानेन ना
शः सति कृष्णस्यारुरुक्षोर्योगिन आत्मज्योतिः प्राप्तिः ततउक्तरूपकृष्णाग्निना नायापांडवाभिधानानामिं
द्रियाणां नादृशसंपत्तिमसहमानस्य दुर्योधनाभिधानस्य दुष्टस्य कलेः शकुनिन्याथयशरसामर्थ्येन धर्माभि
धानस्य रसनस्य दु[illegible]रादृशेषु विषयप्रवर्त्तनेन नादृशसंपत्तिहारणं ततः कृष्णाउक्तरूपा बुद्धिः दुःशासना

आत्मा:
४४

मिधानेन दुष्टोपदेशेन गृहीतापि राजसी आवरणरहिता न ज्ञाता तादृश्या बुद्ध्या तदंगीकृत्य नारुरुक्षुणा योगिना
नेकावरणपूरणात् दुष्टोसत्तस्य राजसी बुद्धिरावरणरहिता न भवतीति ज्ञात्वा आवरणभंगार्थं सुशास
नेन भवितव्यमिति भावः ततः दुर्योधनाभिधानेन दुष्टेन कलिना हारितः सर्वस्य तिमवेश्य तन्नाशाय दैतवने सदस
द्विवेके प्रवृत्तिः तत्रोक्तरूपो व्यास आरुरुक्षुर्योगी राजसः तत्कृतो धर्माद्यभिधानरसनादिविषयतत्उपदेशेना
र्जुनाभिधानस्य श्रोत्रस्य इंद्र आत्मा तत्सायकत्वात्तत्प्रियमिंद्रकीलाभिधान ब्राह्मणशरीरं प्रतिप्रापणेन तत्रानु
पासनेन तत्प्राप्तिः ततस्तदुपदेशे तत्तृतीयकारणशरीरसमष्ट्यभिमानिरुद्रोपासनं तत्र प्रथमं मूकीवाङ्गुद्गणार्क
जीतभ्यासस्तस्य हननं तत्प्रसंगेन दैतनामसमर्थं चाभिधवः ततोभिमतशिवदर्शनेन पाशुपताभिधानपरमैश्वर्य
प्राप्तिः ततः स्वर्गस्यात्मसुखस्यानुभवः तत्र तत्परस्य इंद्रियसुखसंपादिका स्त्रीतस्या अनादरवशात्क्लीब
त्वारोपे सत्यपि तक्तरूपेंद्रानुग्रहात्प्रशान्तिरेवासीत् ततस्तेषां धर्माद्यभिधानेंद्रियाणां तीर्थशास्त्रादितत्सेवनं
ततः सर्वेषां विराटः २२ तराटः २२ परिभाषणादिति धातुपाठाद्विविधो विपरीततत्त्वराटः सत्त्वाबलं चाहितान्यारिर्यस्या
त्स वेरातस्य विषये अनुष्ठाने दुर्योधनाद्यभिधानदुष्टकलिभियावासः तत्र भीमाभिधानेन चभुषा कीचकः प्र
वतेः पूर्णरंतोवशाः तद्वत्तुद्धायमानोनरवांतर्निस्सारः अन्नमयः पुरुषः तत्रमवृत्ताकृत्साठक्तरूपाबुद्धिः राम
४४

सातंमिष्यते तिरस्कृत्य परमात्मसर्वदर्शनिपुनरपहृता अन्नमयपुरुषानभिमानेन चक्षुः सत्त्वमेवजात
मिति भावः ततउत्तर उद्रुततरो भवतीति निरुक्तान्उत्तरः उत्तमुक्तोपि श्रवणमननादि कार्ये कुशले ४ श्रेष्ठा
त्मकृतत्सहाये तार्जुनाभिधानेन श्रोत्रेण युयोधनाद्यभिधानादुष्टान् कलितदाश्रितान्प्रस्थापनेन तदि
ना संपादनेन मोहयि[illegible]तान्विस्मृत्या नाहत्सेत्यर्थः ततो गावः कलिहताश्चित्तवृत्तयः प्रत्याहृताः उत्तरस्य वि
राटपुत्रत्वं वर्णितं तु स्वस्वरूपविपरीतसंज्ञात्सप्यादयतो वेरविशिष्टस्य विषयत्वं परत्वविशिष्टदृतीयत्त्वमप
रत्वं तत्कर्म तुष्टः कृष्ण आरुरुक्षुर्योगी धर्माद्यभिधानानां रसनादीन्द्रियाणां स्वातंत्र्येण विषयान्भोक्तुं स्व
यमुद्योगं कृतवान् न त्वविज्ञानमयकोशेनाविदुरेणानेकधा स्वस्वंप्रति बोधितो ४ प्राणमयकोशः धृतराष्ट्र
स्तदुपदेशनस्वेष्टं निश्चितवान् धर्मा[illegible]भिधानेन [illegible]रसनेन स्वातंत्र्येण विषयान्भोक्तुं प्राणमयकोशे धृत
राष्ट्रं प्रार्थयितुं प्रेरितः कृष्ण आरुरुक्षुर्योगी तत्त्वदर्शः साधकेभ्यो धर्माद्यभिधानरसनादिभ्यः पंचभ्यः स्वा
तंत्र्येण विषयभोगान्दत्वा पवित्रैः स्तैः सुखं प्राप्नुहीति तेन तं बोधितवान् नतदोक्तरूपो धृतराष्ट्रो जीवः दुर्यो
धनाद्यभिधानेषु दुष्टेषु कलिप्रभृतिषु बद्धस्नेहो ममेदमिष्टसाधनमिति [illegible]
(रसनादीन्द्रियेषु श्रोसर्पनाराय[illegible] ततः सर्वेंद्रियाणि स्वस्वविषयत्यागेनात्मपरायणानि भवंतु)

आत्मा
४५ जनोदुर्योधनाभिधानदुष्टेन कलिना पुनरपि प्रवर्त्तितकर्णाभिधानधर्मादिविध्वंसककर्मस्त्रीमुखप्रेक्षकेनन
ष्यापि वशासर्वार्थसंपन्नकारी येमूढः प्राविह्य यथा निकुच्छियो मिथ्यावनोनेषिताः॥ तेतेनैव निहन्यन्निदं यजरंनग्रा
जा मुंडिताः केचिह्नु च शिखीः कृताश्च कुटिलाः कापालिकाश्चापरइन्येनादृशोपदेशरूपं तन्कस्माभिधा
करुस्तु योगिप्रेरितेनानिच्छतापूर्णनामिधानेन श्रोत्रेणसमापितंततोयुधिष्ठिराभिधानेनमनसेनस्वशाक्त्या
धर्मोगोहूतः तदुक्तं यात्तवल्केन स्नातानसमः समीप्तात्तः शुभकर्मा जितेंद्रियः॥ तपोरत्नोगशीलोनरोगो
ऽध्ययनेइजितनोभीमाभिधानेन चक्षुषादुर्योधनाभिधानेदुष्कर्मा बलभद्राभिधानबलानुग्रहीतोयिगद
ध्यानयारोगावषयिण्या शब्दप्रवृत्त्याउरुस्थाने स्त्रीविषयेहमः नेत्रेनत्रानादृतामतिभावः नेत्रद्वारैवपरस्त्री
भोगेप्रवृत्तेः उक्तं च हन्त्वाकर्णोक्षविशिखेगन्त्वाकर्णाचिन्यदानियमाक्षी॥ जीवतिमुत्वा नवा किं शिव शिव
यो विलोकयन्त्री गिरेरेचचललोचनांचिनरुचेचेनः प्रमुच्य स्थिरप्रेमारांमहिमानमेरागनयनामालोका किंन्त
[illegible] किंमन्येविहरिष्यसे बत हतो मुंचान्तराशामिमामेषाकंठतटेकृतास्वलशिलासंसारवाराविधौ विधि
[illegible]स्य दुःशासनो रोरुधिरपानवर्णनंतु दुःशापदेष्टहृदयगतविषयरागनिगीरणपरं जिनज्ञानवानंतया
करणः कृतविक्षेपउजिभानुपागतकरणः कृतंतेरिजनिरुक्ताच्चदुर्योधनाद्यमिधेनदुष्टकलिकार्यसाधक राम
४५

सतदुपदेशेन तस्मै श्री आरुरुक्षौ योगिनि बद्धे सति धर्माद्यभिधानरसनादीन्द्रियाणि प्रतिहतानि भविष्यंतीत्येवं
रूपेण । उक्तरूपो दुर्योधनेन बद्धं प्रवृत्तस्तदा तस्य श्री आरुरुक्षोर्योगिविप्रवात्मयोगेन गायत्र्यनुग्रहाद्
नात्माकाभेदज्ञानोन्मकेन प्राणमयकोशाभिमानिना धृतराष्ट्रस्याध्यं दूरीचकार तदानीमपि दुर्योधना
भिधानो दुष्टः कलिः सर्वमुनरीद्रजालं न तु वास्तवमिति नते ऽध्यर्ययं नमन्यते तस्मद्दानीमथ तु भयते मन्त्र
रीश्वच्यात्मविमुखो बालोको ऽनेकधा प्रतियादितमप्यात्माकाभेदं सत्यं नमन्यते किंतु कल्पना चातुर्य मा
त्रं तन्मन एतादृशसामर्थ्यासंभावनादितितदानीउक्तरूपाधृतराष्ट्रो दुर्योधनाद्यभिधानदुष्टकलिप्र
ष्टजिवचनविश्वासो कृतोभयत्वसा[illegible]धकस्तुतिस्य तिरूपयोगेश्वरवचनेन तज्ञाहतदातु
स्य श्रीआरुरुक्षुर्योगाद्दुदानीं विहितेनैवकर्मणाएनाद्दुष्टान्विनाश्यधर्माद्यभिधानरसनादीन्द्रियाणि
स्वानंत्र्येण विषयभोगगमयिष्यामीति निश्चितवान् दुर्योधनादीनां धृतराष्ट्रपुत्रत्ववर्णनं तु केवल विष
यस्तुखलंपटः स्तु बलजन्पापामहद्भूतावासक्तः स्वेष्टसाधकज्ञानिवचनलोपी जीवो दुष्कर्मादिरूपो
भवतीत्यर्थपर[illegible]नशब्दस्तु बहृर्थकः उक्तं च भारविणा स्तु जाननपूर्पांकिमु तस्यगज्ञः स्तुयोध्वनवान
गुणोरतानाः॥ यस्तु प्रक्तवान्तः सर्वथाबलादुमोहविधत्ते विषयाभिलाषेइतितत्र श्री आरोभाषमपुडंजत्रस्व

२४ कर्म तत्र ब्रह्मचारिणि स्वकर्म कुर्वति धर्मादिपराभवं चिकीर्षौ रतएव ब्रह्मचारिणि तिरस्कृते तस्य कर्णस्या
३ र्थक्ते रूपस्य दुष्टोपदेशरूपकर्मणः सकाशान्निवृत्तिः तदानीं गुरुवेदसेवातत्परतया दुरुपदेशानादरा
त्तत्र प्रत्यक् ब्रह्मचारि २३

धर्मपरे भीष्मे युध्यमाने स जितेन तिरस्कृतस्य कर्णस्य युद्धान्निवृत्तिः प्राप्य हस्तु धिष्ठिरश्रेनायु जराजव
धः ततः शिखंडिदर्शनसमये भीष्मस्य पतनं शरतल्पशयनं च तत्त्ववं बोध्यं तथा हि ब्रह्मग्रहणानंतरं ब्रह्म
चारिणो रसनाग्नितर्दशेंद्रियवृत्तिनियमनं ततः श्मश्रुलोमवर्द्धदर्शनसमये ब्रह्मचारिणः स्वकर्मणः स
माव र्तनं तदानीं यौवनप्रादुर्भावात् कंचेण ब्रह्मचर्यरक्षणात् त्रोटो शोकाद्यभिभूतस्यात्तु तस्य सन्मार्गो
पदेशवर्णनं तु ब्रह्मचर्यकर्मणि उपनयनकल्पोक्तधर्मोपदेशपरत्वे करेयस्य दुर्जनः किं करिष्यति॥

अत्र रोयतिनोवाद्धिः स्वयमेवोपशाम्यती स्पर्शपूर्वं ततो द्रोणगुरुतेत्र चक्रव्यूहबंद्धस्य निर्गंतुमसमर्थ
स्य कृष्णानुगृहीतस्य लक्ष्मणादिहंतुरभिमन्योर्दौश्शासनिना वधः ततः कृष्णानुगृहीतेनार्जुनेन
स्वर्य दर्शने जयद्रथस्य वधः ततो रात्रौ घटोत्कचेन राक्षसेन दुर्योधनाश्रितराक्षसवधः ततो दुर्योधनादि
षुभीतेषु सत्सु कर्णेनेंद्रशक्त्या घटोत्कचवधः ततो द्रोणगुरु तीव्रभयंकरे सति स्वाश्रितानां रक्षार्थं युधि
ष्ठिरस्याश्वत्थाम्ना नारायणास्त्रप्रयोगः युधिष्ठिरादिषु ततस्तेषां विनयः तदपि एवं बोध्यं तथाहि द्रोण
गुरु समये भवती ति निरुक्तात् द्रोणगुरु स्वहकर्मतंत्र संसारचक्रबद्धस्य मुक्तिकर्तुमसमर्थस्य लक्ष्मणः
श्रीमानलक्ष्मीशब्दस्य यामादित्वान्मन्वर्थायेन मन्यपेयरे लक्ष्यात्म्य चो निगरास्त्रेण कारादेशात् तेन दारि
श्रोतुरंतः शत्रुजयानंतरं निश्चयेन बहिः शत्रुनाशः शांतरसानंदउक्तं चेष्ठसामाशर ४८

मोदूष्यारिग्रहणात्तद्दूनशीलस्य आरुरुक्षुयोग्यननुगृहीतस्य यथोक्तसाधनापेक्षणात् दमितः क्रोध
विशिष्टस्याग्निहोत्रकर्मणः एतद्धा अग्निहोत्रं वै अग्रे वषोडशकालमिति श्रुत्यनुसारेण तद्दुष्कर्मी श्रिते
न तदुष्टशासनपोषकेणारेहोवावधः दुष्टशासनावोशस्य केवलेंद्रियसुखतत्परस्य परोक्षमहाफल
का अग्निहोत्रकर्म तिरस्कर्तृत्वात् अभिमन्योर्जुनपुत्रत्ववर्णनं सुभद्रायां शोभनकल्याणयां श्रुतौ नि
तरां तत्परो व्रती आरुरुक्षुयोग्यननुगृहीतोग्निहोत्रकर्मकर्ता भवतीत्यर्थः परं लक्ष्मणादीनां दुर्योधनादिपु
त्रत्ववर्णनं तु केवलस्वसुखसाधनतत्पराः सर्वं पुत्रमेव करोमीति स्वधर्मस्पर्शयितारः श्रीमदारिद्र्य
पाभवतीत्यर्थः परं ततो ग्निहोत्रजनन्यावेदवाचितत्परेणाश्रितेन दुष्कर्मारिषु परमात्मस्वरूपदर्शनेन स्वाश्रि
तेषु सत्सु दंभ आरुरुक्षुयोग्यनुग्रहानस्य दर्शनेन तत्त्वज्ञानेन परमात्मानं स्वरूपं सर्वकर्मसाक्षिणं तत्फल
दातारं च दृष्ट्वा हन्तृश्रोत्रं त्वचः श्रवणं तत्परं नाम्नो हिमाव: अनुभवाय तत्रस्य दृष्टएव ततः संसारे आरुरुक्षुयोगी
प्रवर्जितेन घटोत्कचेन घटजइतिघटत्तस्म सम्पयोग्यः अतएव घटोत्कचउक्तः पूर्वबंधनः कच बंधनइतिधात्वनु
सारात् उक्तं बंधनश्च सत्सु रागो सत्सु द्वेषः तार्देशात्मकप्रवर्जनेन दोषेण दुष्कर्मी धाश्रितादोषा विनाशि
ताः ततो दुष्कर्मारिषु पराभूतेषु सत्सु तन्मुखितेन कर्णेन उक्तशत्या संतापकेन सर्वं ज्ञोसि श्रीमानसि परिपू

आत्मा: ४७

[illegible]

णोसीत्येवंरूपयापरमेश्वरेशक्त्याहतः वंचितः क्षालरणः पूज्यचोरोहंतव्यइत्यादिबुद्धिनिरासेनकलि
हृद्दुर्भवतीतिभावः अत्रानुभवः स्फोरीमिरूहनीयः घणेनकचस्यभीमपुत्रत्ववर्णनंतुहिंडवाहिउ
ग्नाररहितधानुपामनसर्वत्रानारकर्णीजसीवृत्तिलस्यामासक्तस्यचक्षुषः संकोशाद्राग
द्वेषप्रवर्तनंभवतीत्यर्थः पतितोनोवभोजनादिग्रहकर्मणिप्रवृत्ते आरुरुक्षुयोगिप्ररणप
स्वाश्रितानांरक्षणायरसनस्यअभ्यस्यामात्रभ्यः सकलविषयभोगसाधनोदेहः अशभीजनइतिक्रयादिधात
पाठान्तत्रभोक्तृत्वेनतिष्ठतीति आत्मनामनित्कनि बुनिपक्वेतिमलिनत्वेषारणेरित्वात्तस्यतःतथाचाम्बत्यो
माजीवः चिरमविनाश्यपिहतइत्यन्तभाषणसंसारलिपुरस्यममआत्माकोभेदासाधनेनपरमात्मत्वप्राप्स्यभावान्मरणं
जातमित्यर्थपरंएतेनधार्मिकाणामन्तभाषणमितिदोषोनिरस्तः ननुकुंजरमरणवर्णनंतुपशोरविशेषेणादृष्टत्वात अ
नत्वंतस्यदेहात्मबुद्ध्यानत्वाशेनाशः मनुष्यस्यतुमननशीलत्वंतस्यदेहनाशेपिजीवस्यनित्यत्वादनाशइत्यर्थपरं
नत्वेपरदर्थेणाहसद्यंतस्येवनाशे [illegible] किमनेनकर्मणोजितनिर्णयायस्थिराभूयप्रवृत्तं धर्मी
घभिधानरसनीहिंसापकर्मणोनिवर्तनंचतदान्यायाजितधनेनसमाधितमाहशधवस्यधष्टत्वातधुमशब्दस्यद्रव्या
र्थकत्वातयाज्ञवल्क्येस्यजितपिन्यायार्जितधनलत्वजानमित्यजितिधिश्रिय॥ ष्माडकुलस्यवारीवग्रहस्योपिवित्तुच्यत
इतिइतउतरोवानप्रस्थाश्रमोबोध्यः ततोश्वत्यामाउक्तरीमाजीवः सात्विकेषुरसनादिद्वियेषुश्रीसूर्यनारायणपरंतेनार ४७

राम

वार्थसंपन्नेरीपेषटाः प्रविहायपांतिकधियोमिथ्यावनांतैविराणः ततेनैवनिहसर्निर्दयतरंनग्रीहिताषुतिताः केविलंचाशिखाःहुताअङ्गुलीलाःका
पालिकाख्यापरइत्येनोद्दशोपदेशरूपंतत्कस्माभिधानारुरुक्षुयोगिप्रेक्षितेनानिष्ठुनाप्युर्जुनाभिधानेनअ
त्रैणसमाधितंतनौयुधिष्ठिराभिधानेनरसनेनस्वशक्त्याद्यात्यारोगोहतः तदुक्तंयाज्ञवल्क्येनदांतासत्यः
क्षमीप्राज्ञः शुभकर्माजितेन्द्रियः॥ तपोरतोयोगशीलोज्ञरोगैरभिभूयतेइतिततोभीमाभिधानेनचक्षुषार्द्र
योधनाभिधानोदुष्कर्माबलभद्राभिधानबलानुग्रहान्नोपिगदाभिधानयारोगाविषयिणाप्राइबप्रवृत्याउ
रुस्थानेस्त्रीविषयेहतः नेत्रनतनानादततमितिभावः नेत्रद्वारेवपरस्त्रीभोगेप्रवृत्तेःउक्तंचहत्वाकदाक्षविशि
खैर्गत्वाकतिचित्पदानियमाक्षी॥ जीवतिपुवानवाकिंशिवाशिवभक्षोविलोकयन्तीतिरेरंचचलेलोच
नाचितरुचेचेतः प्रमुच्यस्थिरप्रेमाणंमाहमनमेणनधनामालोकयाकिंतत्पसि॥ किंमन्येविहरिष्यसेवत
हतांमुञ्चांतराशामिमामेषाकंठतटेकृतारवलुशिलासंसारवाराणिधाविततिभीमस्यदुश्शासनोरोहधिरपानव
र्णनंतुदुष्टोपरेष्टहृदयगतविषयरागनिर्गीरणपरंकामसगिदुष्टोपारिष्टोपविषयेपरिणामदुःखत्वेनज्ञातेनेत्र
सात्विकत्वोत्तरपरंनभवतीतिभावः तदुक्तंपरिक्राङ्कामुकश्शुनामकस्मिंस्त्रीकलेवरे॥ कुणपः कामिनीभक्ष्यमि
तितिस्त्रोविकल्पनाइतिततोयोगेश्वरेणकृष्णाभिधानेनविषयस्वभावकामेनधर्मीघभिधानरसनादीदि

आत्मा ४८

येषु स्वविहारं गीतेषु विनष्टप्रायेषु दुर्योधनाभिधानदुष्टेन कलिना रजसा रभिषिक्तो नस्व राज सोऽश्वत्थामो क्र
रूपाजीवो धर्माद्यभिधानरसनादीन्द्रियात्मजरूपविषयभोगनाशं तिरस्कारत्वं च प्रद्युम्नाभिधानन्यायया
र्जितधननाशसहितं कृतवान् तदा जन्तु × संसारराज्ञो × यशस्करं न भूरि दिनि वर्णितविषयभोगतिरस्कारे कलिकु
लनाशात् ततः कृष्णाभिधानारुरुक्षुयोगिप्रेरितेनार्जुनाभिधानश्रोत्रेण अश्वत्थामस्य जीवप्रयुक्तं स्वरक्षक
ब्रह्मास्त्राभिधानं वेदान्तानुष्ठानं च अस्त्रत्वेन दुःखकरत्वात् शत्रुनाशकत्वात् च जारशैनैव ब्रह्मास्त्राभिधानोपनिष
दात्माकाभेदज्ञानेन पुरा भूत सर्वोत्कर्षात् ततः सोऽश्वत्थामो क्रूरयाजीवः शान्तिगतः उत्तरागर्भगतस्य प
रीक्षितो ब्रह्मास्त्रात्संतापकात् स्वदर्शनेन रक्षणास्य वर्णनं तु संन्यासितत्वं गंगतस्य जीवस्योटं भरेः कष्टा
दूरानुष्ठानात् तत्त्वज्ञानेन रक्षणसमाधिस्थस्य योगिनः सर्वकर्माकरणेपि प्रत्यवायाभावो तत् तदुक्तं भ
गवतांस हायेरत्नमयादिश्रून्यपर्यन्तजडात्मवादिभिरज्ञावी केनीति कैः कृष्णाभिधानारुरुक्षुयो उप
नुग्रहीतस्यापि धर्माभि× सर्वधर्मान्परित्यज्येत्यादिगातता दुर्योधनाभिधानदुष्कर्म ×धानस्यस्तनस्य
दुःखरोगारोपिते सति स्वकोपीनिवृत्तिः तदा कृष्णाभिधान आरुरुक्षुयोगी स्वाभिमतसिद्धार्थं भीष्माभि
धानब्रह्मचर्यतः सकलविविधधर्मबोधने धर्माद्यभिधानरसनादीन्द्रियाणि प्रवर्तयामास ततो भीष्मस्य राम ४८

शरापरामरणावर्णनं तु विषयदर्शनेन ब्रह्मचर्यस्य नाशादित्यर्थपरं कृतं भवति तेनापायेन्यादि काव्यारब्धम
वाच्य ज्ञानिनो ब्रह्मचारिणो नैष्ठिकस्यापुनर्भवज्ञापनार्थं च तदुक्तं याज्ञवल्क्येन अनेन विधिना देहं साध
यन्विजितेन्द्रियः।। ब्रह्मलोकमवाप्नोति न चेहाजायते पुनरिति ततः कृष्णाभिधानारुरुक्षुयोगिवशवर्तिनो
धर्माद्यभिधानरसनादीन्द्रियाणां निःकंटकराज्यसुखाभिधानपरमानंदानुभवः तस्मिन्न वाहरूपेण प्रवृत्ते स
ति कृष्णाद्यभिधानस्यारुरुक्षोर्योगिनः कुलप्रद्युम्नाद्यभिधानकामादिकं तत्स्त्रिहार्षपैवनष्टं ततो कृष्णे
उक्तरूपे योगेश्वरे अर्जुनाभिधानश्रोत्रायस्वनायिकात्वेनाभिमता विषयानंदवृत्तीः समर्थ्य स्वरूपं सच्चिदान
दात्मकं गते अर्जुनाभिधानश्रोत्रा ऊतप्राणबलात् चोराभिधानैः संसारिभिर्विषयानंदवृत्तयो हृताः तेस्ता
अनुकृता इत्यर्थः ततो विषयानामनुत्तरपथं गतानां पांडवानां शरीरलये सति स्वरूपावाप्तेर्वर्णनं तु आरूढयोगिनि
हतबलानामिन्द्रियाणां समाधिगतानां गोलेषु नष्टेषु स्वस्व स्वरूपसमष्टिरूपं देवतात्मकं तद्रूपेणावस्थान
मित्यर्थपरमिति भारतात्पर्यात्मा निसंक्षेपः शेषदृशि जदिशा व्याख्यातदृशा वसेयं एवं सर्वं पुराणमप्यध्यात्मप
रमेव समाख्याबलात् तत्स्वप्नुपरमेव किंचित्स्फुटीकरिष्यते तस्माद्दूरव्यासादीनां मुनीनां नोत्पथगामित्वं
तथा च महाप्रलयादिपरीक्षार्थद्योतकेतद्वचनेप्यामारायमेव नादृशा योगिनां सर्वज्ञत्वादिति।।५४।। ननु श्री

आत्म
४९

त्रादीनामिंद्रियाणां बुधादिग्रहत्वमुक्तं तत्र किं प्रमाणं युक्तिः केवलात्तत्वचनमित्याशंक्य तत्र पुराणमपि
प्रमाणयन्नादौ श्रोत्रस्य बुधत्वमाह वक्तुरिति वक्तुर्गिरस्तां न विधोः सकाशाज्जाता श्रुतिः सा हिमरश्मिपुत्रः
॥ बृहस्पतेर्जायायां चंद्राद् बुधो जात इति पुराणं तथा चाध्यात्मे वक्तुः शब्दं कुर्वतः गिरिवाचिस्तां तं मनसो देव
विधुः समष्टिरूपदेवतात्वात्तस्मात्तच्छ्रुतिर्जाताऽन्यत्राभेदत्वमविवक्षितं वक्तृवचनेन मनसि स्थिरे सति श्रव
णं भवतीति भावः एतेन चंद्रस्य गुरुतल्पगत्वदोषः प्रसक्तः पुरास्तः सा श्रुतिर्हि मरश्मिपुत्रश्चंद्रात्मजो बुध
उच्यत इति शेषः एवमुत्तरत्र दृष्टं श्रोत्रश्रवणयोरभेदविवक्षयात्र तस्य वा हिमरश्मिपुत्रो विदित्युच्यते॥ अथ
नात्वचः शुक्ररूपत्वमाह त्वगिति त्वग्भार्गवोऽसौ कचजन्मभूमिर्द्दातीसंजीवनमात्मगोप्त्री॥ ५५॥ कचः सं
जीवनविद्यार्थं शुक्रसमीपगतः तं सिषेवे तत्र वृषपर्वराणासुरैरयं यदा यदा हतस्तदा तदा देवयानीस्नेहेन संजी
वितः पश्चात्पेष्य पानेनोदरंगतः तत्रापि तत्प्रार्थनया तस्मै संजीवनं दत्तं ततः कचोऽपि स्वजनकाय शुक्राय संजीवन
ददाविति पुराणं तथा चाध्यात्मे त्वक् स्पर्शनं असौ अथ श्रोत्रे युक्तलक्षणो भार्गवः शुक्रः उच्यते कीदृशत्वक्
कचजन्मभूमिः केशजनिस्थानं तादृशत्वक् आत्मगोप्त्री स्वपालकाय संजीवनं ददाति पोषयतीत्यर्थः अयम
त्राभिसंधिः वृषपर्वकामरूपे चरणे केन अस्ते रणादे[?]भिमा विनापापकृतपुरुषेण स्वकल्याणाय केशवपने राम

४९

कारितेपित्वचास्तानमार्गस्नेहेन पुनः पुनः संवर्द्धितः श्मश्रुजटालोमभरात्मवानिति याज्ञवल्क्यस्मृतेः परा
नुस्वसुखपोषधारिणां केशो त्वचि आयंतलयं नीते सत्यपि त्वचा तथैव पुनः संजीवितः कचस्य शुक्रसंजीवनव
र्णनं तु रोमाणां त्वग्जीवनज्ञापकत्वपरं तथा चोक्तं काव्यमुकुंदे जनवीजेन बकुलचंदनासेचनैः सरोजदलस
गमे रयिन चेष्टते सुंदरी॥ परंतु जवनाम निप्रियसखीभिराविरमेनि वेदयति जीवितं श्रवणसीमिरो मोकमइति
एवमिदं मध्यत्र बोध्यं यथान्यभिधानारूढजीवस्य देवयान्यभिधानज्ञानमार्गश्रेष्ठो यामयामपि शर्मिष्ठा
भिधानसकलसुखसाधककर्ममार्गश्रेष्ठावेवासक्तिरासीदिति॥ ५५॥ चक्षुषः शनिरूपत्वमाह छायेक्ष
णमिति छायेक्षणं पालयतीति भाया निगद्यते सा जननी तदीया॥ तदीयपुत्रत्वमनुष्टुयुक्तं तस्माच्छनैश्च
नमेव वत्स॥ ५६॥ सूर्यस्य तेजो वेगमसहमाना सरण्यूभार्या तस्याः सवर्णा छाया तस्याः सूर्यात् शनैर्जात इति
पुराणं तथा चाध्यात्मे दैवते इनभाया सूर्यप्रभायाः कीदृश्याः ईक्षणं चक्षुः पालयतीनाशान्नरक्षति
पोषणात् सा छायाजननी चक्षुषो माता निगद्यते उच्यते समानसंविग्नंदेवगत्वात् अमुष्य चक्षुषः तदीयपुत्रत्वं छा
यात्मजत्वमुक्तं साधकप्रमाणोनोपन्यस्त तस्मात्तदुक्तं साधर्म्यदर्शिनात्तलोचवंच चक्षुः हे वत्स पुत्र शनैश्चरं भ
वति एव शब्दोऽत्र भिन्नक्रमः अत्रानुक्रमणिकापि प्रमाणत्वेनोक्ता पुरस्तात्तदुदमत्रैव बोध्यं यथामुत्रसूर्य श

नदीयार्

ज्ञान्मा: ५० न्योः परस्परं वैरं वचनगम्यं तथात्रापि सूर्यचक्षुषोर्वैरं प्रत्यक्षसिद्धं सूर्यदर्शने चक्षुर्नो घादर्शनात्तेन क्षेनो घंटमा
दित्यं नास्ति तेन करोचन॥ नोपरक्तेन वारिस्थेन मध्यं न भसो गतमिति मनुवचनेनैतदुक्त्वा तेषु सूर्यदर्शनस्यै
रितजनकत्वानुमानाच्च अन्यच्चापाप्यपि दृश्यते दक्षिणायने सूर्यस्य छायाप्राप्तिः उत्तरायणे प्रभाप्राप्तिस्त
तस्मादिमे तस्य भार्ये भवतः परंतु सूर्यस्य प्रभायां प्रीतिः स्वसमानशीलत्वात् न छायायां विरुद्धस्वभावत्वा
त् अत एव दक्षिणायने नामस्मरे देवतानां स्थापनमुक्तं प्रतिष्ठामयूखे नारसिंहे मातृभैरववाराहनारसिंहत्रिविक्रमा
॥ महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने न तु नित्यशः इति अथ ध्यान्तेतदुक्तं निरुक्तमात्मा आत्मनः तस्य भार्ये चिच्छक्तिः तस्या
छायाभासरूपा सा दृक्षणं पालयति दृग्विषयेभ्यो बहुप्रकाशसामर्थ्यं न पोषयति दूरतस्तद्वर्तते किंच
साभासरूपा छाया कर्ममार्गे वर्तते ज्ञानमार्गे तु चिच्छक्तिः प्रकाशते उभे अपि आत्मनो भोगजनकत्वाज्जाये
उच्येते तत्रात्मनश्चिच्छक्तावेव प्रीतिः नित्यानंदानुभावकत्वात् नेतरस्याः परिणामदुःखत्वात् ननु चंद्रमं दर्श
गेऽन्यत्रोक्तं विरुद्ध्येतेति चेन्नैवं तत्र केवलविषयदर्शनमार्ग आत्मविरोधी स्तुतं न त्वात्मदर्शनं तथा अत्रोऽविरोधं तु
दुक्तं महाभारते उद्योगपर्वणि यश्चास्ति तमोलोके यश्च बुद्धेः परं गतः॥ तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जन इति
एवं केवलकर्ममार्गोऽपि नात्मविरोधी तदुक्तं सम्यग्ज्ञानमहाज्योतिर्दीपिताशयताजुषः॥ विधीयमानमप्येतन्न भवे राम ५०

MEMORIAL

त्कर्मबंधकमिति इदमत्र बोध्यं यथामुत्र सूर्याच्छायायां शनिर्जन्म तथात्मन आभासरूपायां छायायां विष
यदर्शनोत्पत्तिः यथा चामुत्र सूर्यात् प्रभायां मनुर्जन्म तथा चात्मनश्चिच्छक्तौ योगमार्गजनिरिति॥५६॥
रसनस्य ब्रह्मरस्य नित्यमाह अगोचर इति अगोचरे काव्यरसे प्रबोधो भवत्यमुष्मादपि चेतरत्र॥ तादृक्सुभोज्येषु तथै
व वक्तुः तस्माद्रुरुं तं रसनं वदामि॥५७॥ अमुष्मात् उक्तात् स्वगृहे त्यत्रोक्तप्रभावात् वक्तुर्व्याख्यातुः अगोचरेऽननु
भूते काव्यरसे काव्यशब्दार्थरूपं तदुक्तं काव्यप्रकाशे तद्दोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापीति तत्र का
व्यरसे शांतादि नवविधप्रबोधोऽत्यात्ने भवति उत्पद्यते नव रसास्तु शांत शृंगार हास्य करुण रौद्र वीर भयानक बीभत्सा
द्भुताः तत्र निर्वेदस्थायिभावः शांतः अहौ वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा लोष्टे वा बलवति रिपौ वा सु
हृदि वा॥ तृणे वा स्त्रैणे वा मम समदृशो यांतु दिवसाः क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः॥ रतिस्थायिभावः
शृंगारः शय्यां वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं॥ वि
स्रब्धं परिचुंब्य जातपुलकामालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुंबिता॥ हासस्थायिभा
वो हास्यः आकुंच्य पाणिमशुचिं मम मूर्ध्नि वेश्या मंत्रांभसां प्रतिपदं पृषतैः पवित्रे॥ तारस्वरं प्रहितथूत्कमदात्प्र
हारं हाहा हतोऽहमिति रोदिति विष्णुशर्मा॥ शोकस्थायिभावः करुणः अहामातस्त्वरितासि कुत्र किमिदं हा देवताः

आन्मा ५१

क्वाशिषोधिकल्पाणान्मतिनोशनिर्दृतवहस्तेंगेषु स्थेवृशो॥ इत्थं घर्घरमध्यरुद्धकरुणाः पौरांगनानां गिर
श्चित्रस्थानपि रोदयंति शतधा कुर्वंति भित्तीरपि॥ क्रोधस्थायिभावो रौद्रः कृतमनुमतं दृष्टं वा यैरिदं गुरुपा
तकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः॥ नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनामयमहमसृ
ङ्मेदोमांसैः करोमि दिशां बलिं॥ उत्साहस्थायिभावो वीरः क्षुद्राः संत्रासमेते विजहत हरयो भिन्नशक्रेभकुं
भा युष्मद्देहेषु लज्जां दधति परममी सायकाः संपतंतः॥ सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किंचिद्भ्रूभंगलीलानियमितजलधिं राममन्वेषयामि॥ भयस्थायिभावो भयानकः ग्रीवाभंगाभिरामं मुहु
रनुपतति स्यंदने बद्धदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं॥ दर्भैरर्द्धावलीढैः श्रमवि
वृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥ जुगुप्सास्थायिभा
वो बीभत्सः उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिंडाद्यवयवसुलभान्यु
ग्रपूतीनि जग्ध्वा॥ आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्य
ग्रमत्ति॥ विस्मयस्थायिभावोऽद्भुतः चित्रं महानेष बतावतारः क्व कांतिरेषाभिनवैव भंगिः॥ लोकोत्तरं धैर्यम
हो प्रभावः काप्याकृतिर्नूतन एष सर्गः॥ अपि चेतररसाभासभावाभासभावस्थितिभावशांतिभावोदय राम ५१

भावसंधिभावशबलतास्वपि प्रबोधो भवतीत्यनयैव क्रमेणोदाहरणानि तत्र रसाभासः स्तुमः कं वामाक्षि क्ष
णमपि विना यं न रमसे विलेभे कः प्राणान् रणमखमुखे यं मृगयसे॥ सुलग्ने को जातः शशिमुखि यमालिं
गसि बलात्तपःश्रीः कस्यैषा मदननगरि ध्यायसि तु यं॥ अत्रानेककामुकविषयत्वाद्रसाभासः॥ भावः कं
कोणाविनिविष्टमीशमेकालकूटमपि मे महामृतं॥ अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते॥ अत्र रतिर्देव
विषया॥ भावाभासः राकासुधाकरमुखी तरलायताक्षी सा स्मेरयौवनतरंगितविभ्रमास्या॥ तत्किं करोमि विद
धे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः॥ इयं सीताविषयकरावणवचन॥ भावस्थितिः जाने कोपपरा
ङ्मुखी प्रियतमा स्वप्नेद्य दृष्टा मया मा मां संस्पृश पाणिनेति रुदती गंतुं प्रवृत्ता ततः॥ नो यावत्परिरभ्य चाटुकश
तैराश्वासयामि प्रियां भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः॥ अत्र विधिं प्रत्यसूया॥ भावशांतिः तस्याः
सां द्रविलेपनस्तनतटप्रश्लेषमुद्रांकितं किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते॥ इत्युक्ते क्व तदित्युदी
र्य सहसा तत्संप्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतं॥ अत्र कांतं प्रति कोपस्य शांतिः॥ ८॥
भावोदयः एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया सद्यः कोपपराङ्मुखं ग्लपितया चाटूनि कुर्वन्नपि॥
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणान्मा भूत्सुप्त इवेत्यमंदवलितग्रीवं पुनर्वीक्षितः॥ अत्रौत्सुक्य

मार्ष्टुं

आत्मा: ५२

स्येरयः॥ भावसंधिः उक्तिक्रमस्य तु पुःपराक्रमनिधेरभ्यागमादेकतः सत्संगप्रियता च वीररभसोत्फालश्च मां क
र्षतः॥ वैदेहीपरिरंभ एष च मुहुश्चैतन्यमामीलयत्यानंदी हरिचंदनेंदुशिशिरः स्निग्धो रुणद्ध्यन्यतः॥ अत्रा
वेगहर्षयोः संधिर्भावशबलता॥ क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय नः श्रु
तमहो कोपेपि कांतं मुखं॥ किं वक्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु
लु युवा धन्योधरं धास्यति॥ अत्र वितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंताभावानां शबलता॥ तादृक्ष्वत्र
ननु भक्ष्येषु भोज्येषु भक्ष्येषु भोज्यं भक्ष्यमित्यनुशासनात् रसेषु मधुरादिषु तथैव प्रबोधो भवतीत्यर्थः ते च रसा
उक्ता वैद्यकशास्त्रे मधुरोम्लः पटुश्चैव कटुतिक्तकषायकाः॥ इत्येते षड्रसाः प्रोक्ता नानाद्रव्यसमाश्रिताः
॥ पटुर्लवणः धरांबुक्ष्मानलजलज्वलनाकाशमारुतैः॥ वाय्वग्निक्ष्मानिलैर्भूतद्वयैः रसभवः क्रमात्॥ गुरुः
स्निग्धश्च तीक्ष्णश्च रूक्षो लघुरिति क्रमात्॥ धरांबुवह्निपवनव्योम्नां प्रायो गुणाः स्मृताः॥ तेष्वेव तत्र भवं
त्यन्ये गुरोः घुगुणसंचयाः॥ वीर्यमुष्णं तथा शीतं प्रायशो द्रव्यसंश्रयं॥ यत्सर्वमग्नीषोमीयं दृश्यते भुवनत्रयं॥ अ
त्रैव तत्र भविष्यति वीर्यं स्यन्यानि यान्यपि॥ मिष्टः पटुश्च मधुरमम्लोम्लं पच्यते रसः॥ कषायकटुतिक्तानां पा
कः स्यात्प्रायशः कटुः॥ मधुराज्जायते श्लेष्मा पित्तमम्लाच्च जायते॥ कटुकाज्जायते वायुः कर्मीरस्य तानि पा राम ५२

कतः॥ प्रभावस्तु यथा धात्री लकुचस्वरसादिभिः॥ समापि कुरुते दोषत्रितयस्य विनाशनं॥ क्वचित्तु केवलं
द्रव्यकर्म कुर्यात्प्रभावतः॥ ज्वरं हंति शिरोबद्धा सहदेवी जटा यथेति संक्षेपः तस्मादुभयरसज्ञापनात् तदुक्ता
ते स्वगतहगतेत्यत्रोक्तप्रभावं गुरुं बृहस्पतिं रसनेन परमात्मनः स्तुत्यैः स्यरसनारैव्योद्भूयं वदामि उपरिष्टा मि
तद्दूषणं तनुते उक्तं च बृहती रुषे गुरुस्त्वाना गुरोः रुष्टेनकश्चनेति अध्यात्मे तु जिह्वायाः उभयरसज्ञापकत्वाद्रसनं
तं गुरुं वदामीति योजनीयं॥ ५७॥ भूमेरिति भूमेः सुतो भौम इति प्रसिद्धः स्वस्याज्ञतत्वा गुणभाक् सुगंध्याः॥ आ
सक्तिरस्य स्वगुणेऽस्ति तस्मात् घ्राणं महीजं कवयो ब्रुवंति॥ ५८॥ भौमो मंगलः भूमेः सुतः पृथिवीपुत्र इति प्रसि
द्धः लोकेशास्त्रे च प्रकर्षेण ज्ञातः कीदृशः सुगंध्याः शोभनगंधवत्याः सुगंधिशब्दात् ङीप्रत्यये स्वप्र्वे
ति वा नदीत्वात् हे ङसः आगम घाडित्याडागमः स्वस्याः आत्मीया या ज्ञता तस्याः पृथिव्या गुणभाक् गुणो
गंधः तं भजतीति तादृशः गंधगुणभाक् इत्यर्थः अत एवास्य मंगलस्य स्वगुणे गंधे आसक्तिः तदुक्तं तेषामप्रवृत्तिः
अस्तीति शेषः गंधग्रहणसाधर्म्यदर्शनात् महीजं मंगलं परमात्मनः स्तुत्यस्य घ्राणं गंधज्ञापकं कवयः पं
डिताः सरव्यावान् पंडितः कविरित्यमरः ब्रुवंति परिशेषात् कथयंति नन्वत्रासक्तिरित्यादि विशेषणं व्य
र्थं इतरेषामपि तथादर्शनादिति चेन्मैवं ततोपि तेषां तथात्वविवक्षणात् अध्यात्मे भौमो घ्राणं तत्त्वे

आ॰त्मा ५३ तथाऽतिज्ञानं घ्राणं महीजं पार्थिवं अनलस्वं मंगलस्वरूपं शेषं समानं ॥५८॥ ग्रहाणामिति ग्रहणानां विषयाद्बु
धा बाह्याभ्यंतरभेदतः ॥ तत्रांतरांस्त्वं वक्ष्यामि शृणु मित्र निरूपणे ॥५९॥ ग्रहाणां बुध्यादीनां तथाध्यात्मे
इंद्रियाणां श्रोत्रादीनां विषयाः विसिन्वंति विशेषेण बध्नंति ते तादृशाः शब्दस्पर्शरूपरसगंधाः द्वैधा द्विप्रका
रा भवंति कुतः बाह्याभ्यंतरभेदतः बाह्या अनात्मनिष्ठाः अभ्यंतरा आत्मस्वरूपाः तेषां भेदात् विशेषात्
तत्र भेदद्वये बाह्याः श्रुत्वा स्पृष्ट्वेत्यादिनोक्ताः अधुना तरांस्त्वं वक्ष्यामि मनः प्रवृत्तेयं प्रकर्षेण वदिष्या
मि शृणु मित्र निरूपणे शश्च वक्ष्ये मित्रारोचनेषां कथनार्थं अत्रानिमित्तात्कर्म योग इत्यनुशासनात् स
प्रमीनिमित्तमिह फलं च मेणादीपितं हेतीत्यादौ तु चर्मादिप्राप्तिः योगशब्देन सयोगसमुदायात्यत
रसंबध इति संकोचे प्रमाणाभावेः तस्मादेतद्द्विप्रकृतमिति तन्मतव्याप्तिभावः ॥५९॥ श्रुत्वेति श्रुत्वा
ष्टयोगा भवंति प्रजानं स्तनत्स्थूलसंस्पर्शाति प्रदीपः ॥ ध्येयं समीक्ष्येति शनैरभीशं गुरुरसं ज्ञापयती हे हंसे
॥६०॥ अष्टांगमित्यष्टौ योगाः योगश्चित्तवृत्तिनिरोधः तदंगानि यमनियमासनप्राणायामप्रत्याहारधारे
णाध्यानसमाधिरूपाणि तत्र यमाः अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः तत्सिद्धये स्तु हिंसा प्राणवियोगा
नुकूलो व्यापारः तदभावात् सर्वभूतशांतिः सत्यं यथार्थभाषणं तेन मंचारिसिद्धिः स्तेयं द्रुतिजनकमरणा राम ५३

परागाभावः स्वाध्यायो वेदः तस्य पुनः पुनः पठनं तेन तत्प्रतनंत ४

दानं तदभावात् सर्वरत्नोपस्थानं ब्रह्मचर्यं जितेंद्रियत्वं तेन वीर्यलाभः परिग्रहः स्त्रीतदंगसंगात्स्थैर्यं नियम
मास्तु शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि शौचं जलादिना बाह्यं वैराग्येणाभ्यंतरं तेन सर्वदर्शनी
यत्वं संतोषः जीवनपूर्त्यधिककास्याभावः तेन चित्तैकाग्र्ययोग्यत्वं तपः कृच्छ्रचांद्रायणादिनाविधिना
निरंतरं शरीरशोषणं अप्रशस्तोमितहिताशनवांस्तेन विषादिद्वयरेवनानुग्रहात्सकलेष्टसिद्धिः याज्ञवल्क्यो
प्याह तेन प्राप्त्यर्थं त्वनेन सर्वकामफलैः शुभैः ॥ यं यं क्रतुमधीते च तस्य तस्याप्नुयात्फलं ॥ त्रिर्वित्तपूर्णां पृथि
वीदानस्य फलमश्नुते ॥ तपसश्च परस्येह नित्यं स्वाध्यायवान् द्विजः इति ईश्वरप्रणिधानं ईश्वरः क्लेशकर्म
विपाकाशयैरपरामृष्टः पुरुषविशेषः यद्वा मायोपाधिजगद्योनिः सर्वज्ञत्वादिलक्षणः ॥ तत्तास्वल्पज्ञजीवसम
ष्टिरूपेण चिंतनं तेन नाहं करोमीत्यभिमानाभावः अन्यूकजनाधिगमोप्यनया भावश्च आसनानि तु करचर
णादिसंनिवेशविशेषेणानेकविधानि तानि स्थिरसुखं प्राणायामास्तु शरीरांतःसंचारिवायुनिग्रहोपायाः रोध
स्तंभनरूपाः तेन चित्तस्थैर्यं प्रत्याहारः इंद्रियाणां विषयेभ्यो निवर्तनं तेन मनःप्रसादः एते देहेंद्रियसाध्य
त्वाद्बाह्याः धारणा तु हृत्स्थज्योतिषि मनः ॥ स्थिरीकरणं ध्यानं तु तत्रैव विच्छिद्य विच्छिद्य प्रत्ययप्रवाहः समा
धिस्तु तत्रैव तदाकाराकारिता या चित्तवृत्तेर्भानं सविकल्पकः तल्लये तु निर्विकल्पकः तत एवैकेवल्येवना

५ क्षणःपूर्णः परमात्मेति गीयते तदुक्तं जसाबादि
५ दित्यः तस्य सकल ५५

नेश्रुत्वा गुरुवचनतोवगम्य प्रज्ञानतः आत्मस्वरूपज्ञाता भवतिश्रवणं श्रोत्रस्य॥ ततः प्रवीर्यः प्रकृष्टवैराग्य
बलः प्रकृष्टमूर्द्धगामिवीर्यरेतोयस्यतादृशश्चततस्थलयोगशास्त्रे प्रसिद्धं मूलाधारनाभिहृदयकंठभ्रू
मध्यमूर्द्धरूपस्थानं षट्स्य शक्तिस्वाधीनं करोतिदृढवैराग्यस्याद्धरितसायोगिनस्तु चतस्रः सिद्धयः प्रादुर्भव
न्ति तत्र मूलाधारे मनसो धारणातया तालभुवनज्ञानं नाभौ धारणातः भूर्लोकज्ञानं हृदये धारणातः अन्तरिक्षलो
कज्ञानं कंठे धारणातः कालचक्रज्ञानं भ्रूमध्ये धारणातः स्वर्गलोकज्ञानं मूर्द्धनि धारणातः परमात्मज्ञानं तथा प
रकायप्रवेशादयो योगसिद्धयः नीतिभावः स्पर्शनं त्वचः॥ ध्येयं हृदये चिंतनीयं ज्योतिः समीक्ष्य निरंतरायं यथा भवति प
तथा दृष्ट्वा अभीष्ट अंतर्यामितया सर्वभवर्त्तकमात्मानं प्रतिशनैर्रतिमद्दंगच्छति अत्वारितविषयीकरोतीत्य
र्थः दर्शनं चक्षुषः॥ गुरुः सकलशास्त्रप्रवक्ता ऊढ आत्मा ऊहः हृदयेहृदयं हृदयस्य प्रियंरसं परप्रेमास्वाद्य त्वा
तरसो वैसः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेश्च आत्मानं दृष्ट्वा पयति स्वसंवेद्यत्वादास्वादयति गुरु
रसमित्यत्र रोरीति लोपे पूर्वस्य दीर्घोणः इति दीर्घः रसज्ञापनं रसनस्य॥ ६०॥ तदित्थं तत ऊर्ध्वं लेशंसुर
भिविरत्वाभीमः श्रुमान्कामयतेसमग्रे॥ ग्रहत्वमवैविषयेषु तेषां विज्ञापज्ञानं नतिबहिस्तेष्वेव॥ ६१॥ भीमः सु
मान्भूमिः शरीरं स्मारअव्यवशात्तत्संबद्धः पुरुषः ननु तदात्माभिमानी तस्यतादृशानंदानुभवायोग्यत्वात्ततऊर्ध्वं से राम

शंतस्य परमानंदस्यात्मनः गंधोल्लेशः गंधोगंधक आमोदलेशोसंबंधगर्वयोरितिविश्वः प्राणायामाद्यभ्या
सजन्यप्राणं दः तस्यलेशः अंशः तादृशात्मश्रवणजन्यानंदः तस्य रभिसमीचीनं विदित्वानुभूयसमग्रंसंपू
र्णं स्वात्मानं दकामयते अनुभवितुमिच्छति एतादृशगंधग्राहकत्वं प्राणस्य॥ तेषां बुधानां ग्रहाणां श्रोत्रा
दीनामिंद्रियाणाम् एवंपरमानंदभूतेषु विषयेषु प्रवाकृतशब्दादिषु ग्रहत्वं ग्राहकत्वं विज्ञाय सम्यक् ज्ञात्वा श्रु
द्धान्तःकरणाः संतः बहिः प्रपंचे तेषु वपरमानंदपरमात्मरूपेणैव जानंति अकुतोभयत्वाय प ईश्वेति यच्च किं
चिज्जगत्सर्वमित्यादिश्रुतेः उक्तं च पो विकल्पमिदमथ मंडलं पश्यतीशं निखिलं भवद्वपुः॥ स्वात्मप
क्षयापिपूरितं जगत्यस्य नित्यस्य खिलः कुतोभयमिति॥ ६२॥ एवं मिति एवंरवेः स्वाभिमुखो ग्रहाणां न कोपिशत्रु
र्नोहिमित्रमस्ति॥ बहिर्मुखे वकर्म कृतं न यात्वं नस्माद्धिंतं शत्रुरपीहकर्मी॥ ६३॥ एवमुक्तप्रकारेण ग्रहाणां च
द्रादीनां मध्ये रवेः सूर्यस्य स्वाभिमुखः स्वास्मिन्नुपगतः ग्रहः तदा कर्माभावात्तेकोपि ग्रहः न शत्रुः अस्ति द्वेषत्वभ
वेन न हि मित्रमस्तिनापि हितो भवति हि यस्मात् बहिर्मुखे स्वानभिमुखे ग्रहे कर्म कृतं तु कृतं च दुष्कृतं च क
र्म तत्कृतेन निबंधनं तथात्वे शत्रुत्वं च मित्रत्वं च अत एवोक्तं मत्स्यपुराणे आदित्याभिमुखाः सर्वे ग्रहाः पूज्या इत्य
र्थः तस्मात् शत्रुमित्रत्वयोः कर्मकृतत्वात् उहेयहेतुकर्मीहितमित्रं भवति कर्मशत्रुरपि भवतीत्यन्वयव्यतिरेकाभ्या

२

आत्मा:
५५

कर्मणएवतथात्वमितिभावः अथ ध्यानस्यैवात्मनः अहाणामिंद्रियाणां नकोपि नकिमपि विशेषपूर्ववत्॥६१॥
प्रकाशइति प्रकाशेरवावुदितेयुमिनाशविरुद्धं तमस्तोमरकं चेत्कदाचित्॥ तदा निष्कर्तृत्वमस्याक्रमे
स्मिन्नतः कारणात्तत्स्थिरनाशयामः॥६२॥ प्रकाशे तेजोमये रवौ सूर्ये उदिते उदिते सति विरुद्धं शरीमयप्र
नेन जगद्रोधितमज्ञायारूपं नाशमदर्शनं शब्दस्य नाशनमिति धातुपाठात्तयामिथ्याप्राप्तिकदाचि
त्कस्मिंश्चित्पर्वणि उदरयानं तरमपि तत्कारकं चेत्तुराहुरूपेणाव्यवधायकं यदि तदा तस्मिन्काले अपि
तन्मोनाशकेयिरवी अस्य तमसः अनिष्कर्तृत्वं उत्पानकारित्वं उक्तस्य त्वादिषु वर्णितं अतः का
रणात्दस्मादेतोः तत्तमस्थिरंबहुकालंभाशयामः तन्नाशापयतामहे इत्यर्थः अतीतस्मात्नेकर्मप्रवृत्त्या
देवतापसादादुत्पन्नानवकाशइतिभावः अथ ध्यानस्यप्रकाशेचेतन्यरूपेरवावात्मनिउदितेसाक्षा
त्कृतेसतिविरुद्धं तमोऽज्ञानं नाशयातिकदाचित्कस्मिंश्चित्समाधिसमयेतन्त्वज्ञानानंतरमपितत्का
रकं चेत्लयविक्षेपकषायरसास्वादरूपेणाव्यवधायकं यदि तदास्मिन्नात्मनि अस्याज्ञानस्यानि
कर्तृत्वमनर्थहेतुत्वमुक्तं वेदान्तेषु अतः कारणात्तत्तदज्ञानंचिरंनाशयामः लयादिविघ्नचतु
ष्टयात्मकाज्ञाननाशयपतामहे निरंतरं समाहिताएवभवामइत्यर्थः लयादिविघ्नलक्षण ५५

नितु तत्रलयस्तावद्वृत्तेरुपस्य प्रवस्योतिरनवलंबनेनचित्तवृत्तेर्निद्रा॥ तादृशज्योतिरनवलंब
नेनचित्तवृत्तेरन्यावलंबनं विक्षेपः॥ लयविक्षेपाभावेपिचित्तवृत्ते रागादिवासनयास्तब्धीभा
वात्तादृशज्योतिरनवलंबनं कषायः॥ समाध्यारंभसमये सविकल्पकानंदास्वादनं रसास्वादः
परेतादृग्प्रचतुष्टयेन रहितेन निर्वातदीपवदचलं चेतन्यमात्रमवतिष्ठते तदा निर्विकल्पकः स
माधिः तदुक्तं लयेसंबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः॥ सकषायं विजानीयात्समप्राप्तं न चालय
येत्॥ नास्वादयेद्रसं तत्र निःसंगः प्रज्ञया भवेत्॥ यथादीपोनिवातस्थोनेंगतेसोपमास्मृतेति
॥६३॥ किंचद्विजेश्वरइति द्विजेश्वरो मन्दरविप्रकाशं प्राप्नोति नागूरिपुरन्यवेश्म्य॥ मनःस्थिरीकृत्यप
वित्रकर्मरेवेरुपस्यानुगतोविरश्मः॥६४॥ द्विजेश्वरः द्विजानांब्राह्मणानामीश्वरः पालकश्चंद्रमाः सोमो
स्माकंब्राह्मणानां राजेतिश्रुतेः एतद्वैदेवसोमंयच्चंद्रमाइत्येतरेयब्राह्मणात्तरविरूपममावास्यायां अ
भ्येत्यप्राप्यप्रकाशंप्राप्नोतितत्करणाभास्वररूपवान्भवतीत्यर्थः रिपुः छादकत्वेनशत्रुः अतएवागुः
अविद्यमानागावः किरणायस्य तादृशोराहुः रविमभ्येत्यप्रकाशंनप्राप्नोतिइतरथाहवेत्प्रकाशतइत्य
र्थः ३ नैत्यमवेक्ष्यदृष्टारवेः सूर्यस्यउपस्यानेगताः सेवांप्राप्ताः वयंमनश्चित्तंमनतशीलंस्थिरीकृत्यएका

बलेन समीपं गतावयं मनांस्थिरीकृत्य ॐ योगमार्गे पानि ८।

आत्मा: ग्रं विधाय यथविप्रकर्म जगत्प्रसारकं श्रोत्रं च स्मार्त्तं चानुष्ठानं विरक्ताः निरंतरं कुर्मः तत्सेवया तत्प्रीत्या ज्योति
५६ र्मयलोकप्राप्तिर्भवतीति भावः तथा च निरुक्तपुण्यकृतो ह्येव तत्र गच्छतीति अथाध्यात्म हृज्ज्ञेश्वरः कर्मेन्द्रि
यज्ञानेंद्रियप्रवर्त्तकं हृज्ज्ञानां स्वधर्मे प्रवर्त्तकं च सात्विकं मनः समाधावात्मानमभ्येत्य प्रकाशं वदु विषय
के दूरश्रवणादूरदर्शनादिरूपं चेतनं प्राप्नोति रिपुः मोहकत्वेन पापं अनरुवानुः अविद्यमानस्फूर्त्तिकं देहा
भिमानरूपं तदेवं मनः प्रकाशं न प्राप्नोति त्यवेक्ष्य विचार्य एवं तन्मनः उपस्थानगताः अस्थिवलं हत्वा पवि
त्रकर्मयोगाभ्यासरूपं विरक्ताः ॥६४॥ सर्वविधस्यैतेनित्यं सेवके सुस्वकर्मभिः ॥ आत्मस्वरूपं सदाऽनन्यमस्माभि
र्ध्यायेयं निधारय ॥३॥ ॥ इति कालोपनामकाद्दिताग्निविश्वनाथभट्टात्मजगोविंदभट्टकृत आत्मार्कबोधे
कर्मकथनं नाम तृतीयउपदेशः ॥ ॥ इति श्रुत्वा शिष्यो गुरुं वदति कर्मणा इति कर्मणः शत्रुर्मित्रं त्वेतदुक्तमेव
दयभो ॥ शृणु वाचिप्रसन्नो मे वक्तुमात्मामि पुत्रक ॥६५॥ हे प्रभो बहुजन्मेन सदुपदेष्टृत्वेन च समर्थक
र्मणाः शत्रुमित्रं त्वे किं कर्म शत्रुः किं कर्म मित्रं मिति पृष्ठं ते ज्ञातुं मिच्छते मे महानुग्रहाय वदेउपदिश प्रार्थना
यां लोहृ इति एवं गुरुर्वदति हे पुत्रक पुत्रवत्स्नेहपात्र अनुकंपायाः कृतत्वमुपदेश्यः शृणु एकाग्रचित्तः राम
सन्नवधारय वक्ति त्वया पृष्टं साकल्येनोपदिशामि मे ममात्मा चित्तं वक्तुं कथयितुं प्रसन्नोस्ति सारतो भवति ॥ ५६

६५॥ संप्रति तादृशकर्मनिर्णयार्थं स्थाननिर्णयमाह ॥ श्रुत्वा स्पृष्ट्वेति श्रुत्वा स्पृष्ट्वा वदति हरति प्रेक्ष संचा
रके तीर्थ इत्युक्तं उच्चत्यापरसमयोगधर्मा प्रायकामी ॥ एवं सज्ञा द्विविधः करणोसंनिकर्णादि एवं स्त्रस्मात् ह
हे द्विविधमभवच्छोत्रं सात्म्यादिकानां ॥६६॥ अथोदत्यानं तत्र घातकोनिपातः तथा च रसग्रहणभावे
न्यविषयासक्त्यभावइतिभावः शेषमुक्तोर्थे एवमुक्तप्रकारेण करणादिरवेणः श्रोत्रादीनि हृदयचराणिग्रा
हकाणि आदिशब्दात्त्वक्चक्षुरसनघ्राणानि अधिदैवतेतत्कार्णादिभक्ताः एवेदाः ग्रहाः वि [illegible] शनिगुरुकुजाः द्विवि द्र.गु
धकरणोउभयक्रियायां संज्ञाः संति तत्र एवं ते नेतस्मात् द्विविधकरणत्वात् श्रोत्रं सात्म्यादिकानां पूर्वीक्तानां
गेहं स्थानं द्विविधमभवत्तदुभयप्रकारं ज्ञातं तद्यथा श्रोत्रं वाचोत्व क्पाणी चक्षु श्चरणेरसनपायुघ्राणोपस्थौ
अधियन्त्रो दिगग्नी वा विदो आदित्य विष्णु वरुणा मित्रो अप्रजापती अधिदैवतेतु मिथुनकन्या वृषतुलेमकर
कुंभोमीनधनुर्मेषवृश्चिकोरगानि स्थानान्यत्रानिवचनगम्यान्येव तत्र ताराग्रहाः प्रत्यक्षाः अध्यात्मेतु
स्थानानि मंत्रानि तेंद्रियाणिवचनगम्यानि ज्ञानक्रियाभ्यामनुमेयानि च न प्रत्यक्षाणि अत्र श्रोत्रादिशब्दे
न स्थानेंद्रियाणि वोध्यानि न चात्र पूर्वार्द्धे पुनरुक्ति इदं विधेयभेदान्तउदेतिस विनानात्मस्तासरूपवासमीति चा ।
सपत्नाविपत्तीचमहताभेकरूपतेतिवतपूर्वमात्माके श्रुत्वा स्पृष्ट्वेत्यादिनाकर्तृत्वमभिहितं इदानीं श्रोत्रं सात्म्या

व्या॰ त्रा॰
५८

रिकानंद्विविधकरणात्मकत्वात्रामिधीयते॥९६॥मनःस्थबाणो रितिमनःस्थबाणो रुभयात्मकत्वादहंकारस्यादि
दमेवयुक्तं॥संसाररात्रौ भ्रमणाद्दिवरात्रौहैः समंकरणैर्बुध्यादिभिर्लिप्तेः॥९७॥मनःस्थबाणाः चित्तेसमष्टिरू
पस्यचंद्रमसउभयात्मकत्वाद्बुध्यारीनामिवउभयोर्द्विविधः कालककलनजगत्प्रकाशनरूपस्त्रात्मास्व
रूपंयस्यसःतत्वात्तद्रूपंध्यवयवकेसिंहात्मकंग्रहस्थानस्यातद्रूपमेवग्रहेद्विधमित्येवयुक्तंप्रमाणा
सिद्धुं अत्रहेत्वंतरंहरिदारुक्तरीत्या मनश्चंद्रस्यसंसाररात्रौसंसारसदृशपातमःस्वभावायांरजन्यांतैःपू
र्वोक्तैःकरणैर्बुध्यादिभिर्ग्रहैःसमंसार्द्धभ्रमणात्कालचक्रेगतिविशेषदर्शनात्अत्रमनःस्थबाणशब्दे
नांतःकरणसमष्टिर्हिरण्यगर्भउच्यतेतस्यप्रजापतित्वात्अथाध्यात्ममनःस्थबाणाः मनःशब्देनांतःक
रणात्स्युक्तरूपस्थबाणसदृशस्वरूपबुद्धिमनोरूपंग्रहसकलविषयग्राहकंअवयवावयविभावेषु
स्याद्विरमेवयुक्तंअत्रहेतूभयात्मकत्वात्कर्मेन्द्रियज्ञानेन्द्रियरूपत्वात्किंचहरिदेः चंद्रसदृशस्यहर
स्येतरुभयात्मकैःकरणैर्बुध्यादिभिर्बुध्यादिसदृशैःश्रोत्रादिभिर्ग्रहैराङ्मैःसमंसत्रिसदृशेनामसेसंसा
रेभ्रमणात्तदुक्तंभगवताद्द्वियाणांहिचरतांयन्मनोनुविधीयते॥तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसी
तितथाचेरमधिदैवतेबोध्यंसर्वप्रपंचस्याग्नीषोमीयत्वात्अग्निर्वैसर्वादेवताःसोमःसर्वादेवताइतिश्रुतेःहि राम

र्वादेः ५८

रण्यगर्भस्यसकलदेवतामयत्वात्सूर्यचंद्रशब्दवाच्यतेजोमयजलमयमंडलेतस्यैवस्वरूपेइतिगम्यतेतपोःप्रजा
पतित्वात्एतेस्वरूपेज्ञानकर्मभ्यामुपास्येतथाखवायुतेजोजलक्षितीनांप्रजापतित्वोपितेषामुपासनासा
धनत्वंतथायजमानस्यप्रजापतित्वपिउपासकत्वंतथैवाध्यात्मेनतरेवतानुग्रहात्मनोबुद्धोशाधनोप
तच्छोधुनानिदेहाकोरेणापरिणतानिपंचमहाभूतानिशोधकस्तत्रदेवतानुग्रहीतोजीवः फलभागीच्येयो
समष्टौचैवमष्टौतिमिविहरतआत्मनःप्रायकंसूर्यमंडलमेवतस्यस्वप्रकाशत्वात्तत्रशुद्धोबुद्धिरवसा
धनंबुद्धेसद्यष्टिरूपेणानन्यप्रयोज्यत्वात्तदुक्तंमंत्रार्थातत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥धियोयोनःप्र
चोदयादितिअस्यार्थःवयंजीवाःदेवस्यस्वप्रकाशस्यस्वप्रकाशस्यसवितुःसर्वोत्पादकस्यपरमात्म
नःतस्यैवार्थःतत्सूर्यस्यसमष्टिरूपेणसर्वांतर्यामित्वेनचसर्वप्रवर्तकंएकंसंसाररात्रिदुःखभर्जनात्भं
र्गस्तेजोवरेण्यंपरप्रेमास्पदमात्मरूपंधीमहिध्यायेमकस्मात्समात्मनेपरंमनोनैर्मल्यंततस्मैस्येरणेनेवभ
वतीतिभावःतत्किंयःपरमात्मासवितासूर्यःस्मृतःसनःनोस्माकंजीवानांबहुवचनंत्वाश्रितपत्न्याद्यभि
प्रायेणधियःअग्निहोत्रहोमादिक्रियाःस्वप्रसादिकाःधीशब्दस्यकर्मनामसुपाठात्स्वविषयाएवस्मृतीश्व
र्योचितागायामितिधातुपोषात्प्रचोदयात्प्रकर्षेणप्रेरयतुउत्तोढ्यायोधामहात्म्यर्थःपल्वलगतंभयन्यंकलि

आत्मा
४८

प्रवाहवत् अनादिविषयवासनामलिनेमनस्तेत्रैव प्रसरतिदुःखयति च तन्निवृत्तिस्तु ध्यानेनैव भवती
ति भावः तस्मात्सूर्यचंद्रयोरुपास्यत्वाविशेषेपि मोक्षसाधनत्वसूर्यमंडलमेवोपास्यं ॥ ६७ ॥ कर्मीजंरज्ञानमूलः
स्तुयोशोः सूर्यस्य गेहक्रमतो वदंतु ॥ वयंतु चक्राद्बहिरेवस्वरूपं भजाम तत्केंदुमिमंद्विगेहं ॥ ६८ ॥ आरोक
मात्रिहोत्राद्यनुष्ठानयोगाभ्यासश्रवणत्वद्दलोकप्राप्तिर्भवतितत्र रवुद्धिशुद्ध्यनंतरं सर्वोत्कृष्टच
स्थानेजीवात्मपरमात्मैक्यज्ञानेनततः सूर्यलोकप्राप्तिर्भवति अतः कारणात्स्तुयोशोगेहं कर्काभि
धावस्थानं सूर्यस्य गेहं सिंहाभिधानस्थानं क्रमतः श्रीनंतयेशावदंतु ज्योतिर्विदः कथयंतु वयंतु श्रुति फलभेदात्
प्रमाणज्ञाः उमस्तु तद्रूपमिदं हिरण्यगर्भाद्विगेहाद्विस्थानं तत्करात्योभयप्रतिममिति पावनत्सूर्यचंद्र
मसोधानेतु श्रुतेः कर्कसिंहयोर्जलतेजोमयत्वात् वचनेनतस्मात् चक्राद्द्वादशराशिमंडलाद्बहिरेवासं
बद्धमेवस्वरूपं सूर्यमंडलैकध्यानगम्यपरमात्मानं सूर्यं भजामः चिंतयामः अज्ञानसमष्ट्यनुपहितेजा
नीमइत्यर्थः अध्यात्मेतु चक्रान्वबुद्धिमनोदशेंद्रियसमूहात्मकात् बहिरेवस्वरूपं सूर्यमंडलव्याहृरू
पबुद्धिगम्यप्रत्यगात्मानं भजामः श्रवणमननिदिध्यासनैः शुद्धांतःकरणाः पश्यामइत्यर्थः पतंगमत्क
मस्तुरस्येत्यादिश्रुतेः उक्तार्थः किंकृत्वा इदंमंतःकरणं द्विगेहं ज्ञानकर्मसंपादकं बुद्धिमनोरूपमुत्कास राम

लंड५

५८

सारचक्रस्यतन्निबंधनत्वात् ॥ ६८ ॥ किंचेति किंचातिमित्रस्यमद्गेहं स्वगेहं जानाति जानातु हितः खगेशः ॥ वयंतु
तु चक्रभ्रमणेन खिन्ना नेच्छामस्वात्र पुनः प्रवेष्टुं ॥ ६९ ॥ किंचान्यद्बुहितेद्दष्टं संपादकः खगेशः खगाः गगने
राश्यद्वादश्यः तेषामीशस्तत्त्वकाशकः सूर्यः अतिमित्रस्यतद्युक्तो भवतीत्यत्रोक्तरीत्या परमहितस्य चंद्राभि
धानस्य प्रजापतेर्गेहं सिंहस्वगेहं स्वप्रापकत्वान्निजस्थानं जानातिमन्यतेतर्हि जानातु स्वकीयमेवेतिमन्य
तां चक्रभ्रमणेनराशिमंडलस्य परिवर्त्तनेन खिन्नाः दुःखिनो वयंतूपासकाजीवाः अत्र चक्रेपुनः प्रवेष्टुं
भूयोबंधनायनेच्छामएवनैवकामयामहे अयंभावः भ्रमरकीटन्यायेन योयथा भजति सतथा भवति तथा
चापुनःखेदाय चक्रासंबद्धं स्वसत्तया चक्रप्रवर्त्तकोनञ्चलमेवसूर्यमंडलध्यानगम्यं सूर्याभिधानं परमा
त्मानं भजामः ततश्चपूर्वोक्तचक्रभ्रांतानभवेमेति अथाध्यात्मं किंचाहितः स्वानंदानुभावकः खगानिद्रिय
चराशिरिंद्रियाणि तेषामीशः प्रवर्त्तकः आत्मा अतिमित्रस्यात्यंतसुखयतोंतःकरणस्य गेहं ज्ञानात्मकंप्रपंचं च
ज्ञानवानहमितिप्रत्ययात्स्वगेहं निजप्रापकं जानातितर्हि जानातु चक्रभ्रमणेन जननमरणपरिवर्त्तनेन खि
न्नावयं अत्र संसारे पुनः प्रवेष्टुं नेच्छामः तथा च श्रुतिः बह्वीः समा अकरमंतरस्मिन्निंद्रवरुणानःपितरं जहामि ॥
अग्निः सोमो वरुणस्ते च्यवंते पर्यावर्त्तद्राष्ट्रं तदवाम्यायन्ति अनेकानि वर्षाणि कृतवानस्मि अत्र मध्ये पुना

आत्मा ५९

सर्वेश्वरमात्मानं परमार्थतो जानन्नहं जन्मनिमित्तं पुरुषं पुनर्न भजामि श्रोदयौग्निः अत्यंतनिरोध्य वृत्तिं कंम
नो वा रसनं तानिंद्रगं छंति अस्थिरत्वादित्यर्थः परिवर्त्तमानं सकललोकरक्षामि व्याप्नुवन्विश्वात्मयोगे
न पालयिष्यामीत्यर्थः वर्त्तमानसामीप्ये वर्त्तमानवद्वेति लट्प्रत्ययः॥ ६९॥ तथापीति तथापि गेहं द्विजरा
जबंधोः किं कर्त्तुमिच्छाम इहावगम्य॥ दूरं फलं स्यादिति सहस्ररश्मेरिदं गृहं नोपरमेव बुद्धिः॥ ७०॥ यद्यपि सिंहा
त्मको राशिश्चेद्गृहमिति केनापि ज्योतिर्विदा नोक्तं तथापि द्विजराजबंधोः उक्तरीत्या चंद्रमित्रस्य सूर्यस्य गे
हस्थानमिह राशिचक्रे ऽवगम्य ज्ञात्वा किं कर्त्तुमिच्छाम इत्यस्य यान किमपीत्यर्थः परस्परप्रीत्या चंद्रस्येव
सूर्यकार्यकारित्वे बाधकाभाव इति भावः हीनत्वर्थे दूरं तु श्रुतिविरोधात्तविपरीतं फलं स्यात्तथाहि स
हस्ररश्मेर्बहुकिरणस्य सूर्यस्येदं सिंहराशिरूपमेव गेहं भवति अपरं कन्याराश्यादिकं नैव भवति एवशब्दो
चमित्रक्रमः बुद्धिरेतादृशी ज्ञानं फलस्यादित्यर्थः तथा च श्रुतिः द्वादशारं नहि तज्जराय ववर्त्ति चक्रं परिणाम
नस्य॥ आपुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुरिति ऋतस्य सूर्यस्य ऋतमित्येषवै सत्यमि
ति ब्राह्मणात् द्वादशारं द्वादशाराश्यात्मकं चक्रं द्यां परिगतं लक्षीकृत्य वर्द्धति भ्रष्टं परिवर्त्तते तच्चक्रं नहि ज
रायनापि क्षयायापि किंतु स्थिरमित्यर्थः हे अग्ने अत्र संवत्सरचक्रे सप्तशतानि विंशतिश्च तावत्संख्याकाः मिथु राम ५९

न्तासो राशिरिदिवसस्याः पुत्राः अस्तोदयप्रभवाः आसमंतादभिव्याप्य तस्य तनुव्यवहिताः स्थिता इत्यर्थः याव
त्सलग्नाहोरात्रकाले चक्रं परिवर्त्तते तावन्निरंतरं कल्याणकृद्विति भावः॥ अत्रामर इति मभूमिमिथुस्याग्नेः संबोध
नान्नभूमिछायासंबंधिनामेवाहोरात्रसंबंध इति गम्यते अथाध्यात्मं यद्यपि बुद्धिरेवात्मप्रकाशिका त
थापि द्विजराजबंधोः श्रीरामस्य मनस्त्वाश्रितकारिणा आत्मनो गृहं बुध्यात्मकं ग्राहकं इहं संसारे
वगम्य किं कर्त्तुमिच्छामः नो किमपीत्यर्थः आत्मनः स्वनित्यानंदत्वमन्वीत दूरं तु फलं स्यात् यतः सहस्ररश्मे
रात्मनः इदं बुध्यात्मकं ग्राहकं अपरं सकलं जगन्नैव भवतीति बुद्धिः ज्ञानं इदमप्युक्तं बुद्धिग्राह्यत्वे घटादी
नामिवास्य दृश्यत्वं स्यात् तथा च तेषामिव तेनास्य मिथ्यात्वं स्यात् शुक्तिरजतादिवत् तस्मात्तस्य स्वप्रका
शत्वात्तेनरभास्यत्वं तदुक्तं अवच्छिन्न इवाज्ञानात् तन्नाशे सति केवलः॥ स्वयं प्रकाशते ह्यात्मा मेघापाये ऽशुमानि
वेति श्रुत्यर्थे अमर इत्याद्यग्नेः संबोधनादुक्तसंबंधिनामेव पात्रवल्क्यादीनां तेषामात्मसंबंध इति गम्यते॥
७०॥ तस्मादिति तस्मादवेक्ष्य क्रमितरसमस्तत्तराय भागाव यनेवंदति॥ कर्मीत्यकर क्षितिसुतरंतु ज्ञानात्मक
लपरस्यवत्मी॥ ७१॥ तस्मादुक्तश्रुतिसंमतत्वादिदं पूर्वोक्तसमस्तद्वादशराश्यात्मकं चक्रं रवेर्भवति नान्यस्य तदी
यभागो तस्य संवत्सरचक्रस्येमावृशौ ककी दिक्ष्व मकरादिक्ष्व तावयने गतीवर्दे ति सूर्य एवं चरतीति कथ्यं १

१६०

आत्मा: ६०

तिज्योतिर्निर्विशादयः तत्र दक्षिणं दाक्षिणायने कर्मात्मके कर्मशास्त्रदृष्टविधिः तदात्माकारणं यस्य तादृशं दे
ति दक्षिणायनस्य कर्मप्राप्यत्वात् उत्तरं त्वयनं ज्ञानात्मकं ज्ञानहेतुकं वदंति तस्य तत्प्राप्यत्वात् कीदृशं ब्रह्मपदस्य
वर्त्म ब्रह्मलक्षणस्य परमं धाम सच्चिदानंदात्मकं तस्य परं स्थानं सूर्यः तस्य प्रापकं पूर्वापेक्षयाताद्यविशेषः तथा च याज्ञ
वल्क्यादयः सह आत्मैव जिज्ञास्यः सर्वोत्तेरेवमेव च॥ द्रष्टव्यस्त्वयमंतव्यः श्रोतव्यश्च द्विजातिभिः॥ य एव
मेनं विदंति ये चारण्यकमास्थिताः॥ उपासते द्विजाः सत्यं श्रद्धया परया युताः॥ क्रमात्ते संभवंत्यर्चिरहः शु
नथोत्तरं॥ अयनं देवलोकं च सवितारं सवैद्युतं॥ ततस्तान्पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान्॥ करोति पुनरावृ
त्तिस्तेषामिह न विद्यते॥ यज्ञेन तपसा दानैर्ये हि स्वर्गजितो नराः॥ धूमं निशां कृष्णपक्षं दक्षिणायनमेव च॥ पि
तृलोकं चंद्रमसं वायुं वृष्टिं जलं महीं॥ क्रमात्ते संभवंतीह पुनरेव व्रजंति च॥ एतद्यो न विजानाति मार्गद्वितयमा
त्मनः॥ दंदशूकः पतंगो वा भवेत्कीटोऽथवा कृमिरिति अयोध्यात्मनस्तस्मादात्मनः स्वप्रकाशत्वात्समस्तमिदं प्रका
शं पंचकं प्रपंचजातं दैवात्मनस्सर्वं भवतीति भोग्यत्वात्तत्र द्वयं भोगो कर्मज्ञानात्मको अयने गती वदंति तत्र दक्षिणं
दक्षिणायुक्तं कर्मात्मकमग्निहोत्रादिरूपमयनं वदंति तत्र दक्षिणं दाक्षिणायुक्तं कर्मात्मकमग्निहोत्रादिरूपमय
नं वदंति दक्षिणावतामिदमानि चित्रा दक्षिणावतां दिवि सूर्यासः॥ दक्षिणावंतो अमृतं भजंते दक्षिणावंतः प्रति राम ६०

MEMORIAL

तत्र आयुरिति श्रुतेः उक्तोऽर्थः योगाभ्यासरूपं तु दक्षिणं सर्वत्र वैराग्यादुत्तरं उत्तरं तु तदनंतरमुत्पन्नं श्रेष्ठं च ज्ञाना
त्मकं तत्त्वज्ञानमयनं वदंति कीदृशं ब्रह्मपदस्य वर्त्म ब्रह्मणः सच्चिदानंदात्मनः परं स्थानं मोक्षः तस्य वर्त्म प्रापकं तत्त्व
ध्यात्मेषु रत्ना उत्तरायणं विषयदर्शनमार्गरूपकं कथितं तत्कथं तत्त्वज्ञानं भवितुमर्हति कथं च मोक्षहेतुरिति चे
न्न शृणु अंतःकरणवृत्तिप्रतिफलितज्ञानमपि ब्रह्मैव सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः घटज्ञानं पटज्ञानमुत्प
त्तिमित्याद्यनुभवस्तु घटपटाकारांतःकरणवृत्तिलयविक्षेपनिबंधनः अतो ज्ञानस्याबाधात्सत्यत्वं घटपटापुनः
कविषयकवृत्तिभासकत्वादनंतत्वतो देवब्रह्मरूपेण ज्ञातेः सत्मोक्षहेतुर्भवति॥ ७१॥ कर्मेति कर्मचांद्रमयनं तो न
गद्येतवीरबोद्धृभिरिदं प्रसाद्यते॥ उत्तरं तु गुरुशिष्यसंस्थया प्राप्यते हृदयभिन्नप्रसादतः॥ ७२॥ चांद्रं चंद्रलोकप्रा
पकं कर्म पूर्वाक्रमयने निगद्यते याज्ञवल्क्यादिभिर्मुनिभिः उदं कर्म वीरबोद्धृभिः वीराः दृढशरीरा [illegible] तत्सउत्सा
हवंतश्च बोद्धारः कल्पशास्त्रयोगशास्त्राभिज्ञास्तैः प्रसाद्यते सफलं क्रियते उत्तरं उक्तरूपं सूर्यलोकप्रापकं
ज्ञानं गुरुशिष्यसंस्थया उपदेष्टृउपदेश्यभावेन प्रसाद्यते इदं त्वावश्यकत्वाभिप्रायेणोक्तं कर्मणामुपदेशस्यापि ज्ञा
नेवीर्यबुद्ध्याद्यपेक्षणात् द्वयं कर्म च ज्ञानं च इदं तत्प्रसादतः सूर्यानुग्रहात्प्राप्यते सिध्यतीत्यर्थः अन्यच्च इदं न
प्रसादतः सार्वविभक्तिकस्तसिः आत्मप्रसादाद्यद्वयं प्राप्यते साध्यतइत्यर्थः॥ ७२॥ उभमेवाथ द्वतयत्नाधिदेव

तेत्वाहंभौमे नेति भौमेनवाचस्पतिनाचर्मारंचांद्रंतुशुक्रेणबुधेनगुप्तं॥ विरेजन्तु द्वे अयने अगारैः ससंपुटौमंत्रइव
स्ववीजैः॥७३॥मारमंदस्यश्चनेरिदमयनंमकरकुंभमीनमेषवृषमिथुनराश्यात्मकं भौमेनवृश्चिकपतिनावाच
स्पतिना धनुष्पतिनाप्रतिलोमेनतुवाचस्पतिनामीनपतिनाभौमेनमेषपतिनागुप्तंकल्योदोर्नोदृशीस्यन्यारस्मि
नथाचांद्रंतुचंद्रस्यदमयनंतुकर्कसिंहकन्यातुलावृश्चिकधनुराश्यात्मकंतुशुक्रेणवृषपतिनाबुधेनमि
थुनपतिनाप्रतिलोमेनतुबुधेनकन्यापतिनाशुक्रेणतुलापतिनागुप्तंततः प्रभृतिनस्यनस्युनत्तद्रुहेजातमि
तिभावः द्वेउभेअयनेपूर्वोक्तेअगारैस्तैस्तैर्गृहैः पूर्वोक्तराशिरूपैर्विरेजतुःराशीनामृक्षत्रंत्वेपिशास्त्रदृष्ट्या
नक्षत्रांनांशुभाशुभातेकरत्वंस्ववीजैःमंत्राणांतत्तदुत्पत्तेःस्वीकारात्तन्निजस्यहेतुभूतैरक्षरैः ससंपुटः संपुटइवकरंड
इवसंपुटःपूर्वापश्चाद्भावेनसन्निवेशविशेषस्तेनसहवर्तमानोमंत्रःतंत्रशास्त्रोक्तारेवनाप्रकाशकोवर्णसमूहः
सइव॥७३॥यस्यतिथयस्यराज्येहितेरुशोबद्धभवतिनान्यथा॥ चांद्रंमारंचसंपूर्णमयनंकथ्यतेततः॥७४॥
लोकेदृश्यतेयतोहियस्मात्प्रपरोऽत्र परोपप्रभुत्वंभवतितेदृशस्तस्यैवस्यलंबद्धंभवतिअनेकग्रामकोव
र्ततेअन्यथायस्यराज्यंनास्तितस्यदेशोबद्धंनभवतिकिंतुअल्पोभवतितत्स्मादृशनान्तसमृर्णषड्राश्यात्मक
मयनंदक्षिणंकर्कादिचांद्रंकथ्यतेचंद्रस्वामिकमुच्यतेअयरषड्राश्यात्मकंतुसूर्यस्यस्वयंभूत्वेनसंभवतिनमो

मित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतंसपर्यतादूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्यायशंसतेति
श्रुतेः अहर्वैमित्रोरात्रिर्वरुणइतिवाअ्हरहोरात्रेआरभ्यइतिब्राह्मणान्पूर्वदिवस्थःसूर्योमित्रोभवतिपश्चिम
दिवस्थःसूर्योवरुणोभवतीतिव्याख्यानाश्चमेहतममोमलहरणकरणंतस्मादुदितःसूर्योमित्रोभवतिवरुणंतम
सःछादनंतस्मात्सोऽमितःसूर्योवरुणोभवतीत्यपिविवरणान्तत्रपोऽश्वक्षसेज्ञापकायदेवायप्रोतमानायसर्व
पश्यायतन्मोहविरत्नेमहोभ्राजमानंतत्तदृशेदूरेशेनत्यजमानऋजंविहितत्वापघायफलकंसमर्पयतपूजय
तहेऋत्विजःदूरेदृशेपरमविप्रकृष्टेपिदेशेप्रकाशमानायसर्वभासकत्वात्तदेवजातायदेवाअग्नयोजाता
होमार्थंप्रादुर्भूताययस्मेतादृशायकेतवेसर्वेषांज्ञानप्रदत्वेनतद्रूपायदिवस्पुत्रायाकाशात्मजायसूर्यायशं
सनवर्णीयतेन्यर्थः सूर्यःकश्यपाददितेर्जातइतिपुराणाद्यौतिचेन्मैवदिवस्पुत्रायेतिपदेनेवस्वयंभूत्वस्याऽपि
तत्वात्आकाशस्यामूर्तत्वात्दिवःप्रकाशकत्वेनात्यपत्यपत्वोपायात्पुराणस्यत्वयमर्थःकश्यइत्सु
दकनामतद्दहतिकश्यपःशरीरंपातिस्वीयस्वेनरक्षतिपिबतिवातेपसोशोषयतितादृशोधामिकोजीवस्तस्मा
दादित्यासुरिभितरदीनादेवमातेतिनिरुक्तोप्ता चक्षुर्देहारंबुद्धेप्रादुर्भूतः परमात्मेतितस्मात्सूर्यस्यस्वयंभूत्वमे
वेतिसिद्धंतस्मात्प्रकाराननाहंभूतत्वरूपेणखवायुग्निजलपृथिवीत्वात्मनाजडास्तामसाभवतिक्रियाभिः

कर्मभिः बुध्या ज्ञानेन तथा राजससात्विकाद्यैस्तेन प्रकारेण राजसाद्यसात्विकाद्येत्यर्थः तेषामेवं त्रिविधफल
दातृत्वेन त्रैविध्यमिति भावः अथवा आत्मेत्यत्र आत्मनः प्रभृताग्रहा आत्मा रवी भूतत्वरूपेण स्थूलशरीरा
कारेण जडाः क्रियाभिर्बुद्धैव वचनैर्वा ज्ञानप्रतिपादनार्थं बुध्या एकवचनं वृत्तिप्रतिफलितस्य ज्ञानस्यैकत्व
प्रतिपादनार्थं ज्ञानं ज्ञानमित्येकरूपावगमात् आगमापायित्वस्य तु वृत्तिधर्मत्वात् तथा राजससात्विकाद्यैरेव
मनुष्यादिर्यज्जन्म तस्मात् आरभ्य सर्वे तथा तथा भवंतीति भावः ॥७५॥ उत्तमदृग्भिरुत्तमो भवति मध्यमोऽधमा
हृदृक्षु तत्र इदं विभावितं ॥ खेचरा अपि भवंति तादृशा दातुमैहिकफलं यथायथं ॥७६॥ हृदृक्षु मीन
स्थदृक् तत्प्रतिपदादिरूपं च यस्मात् तस्मिन् उत्तमो भवति पूर्णः तदानीं फलमप्युत्तमं भवति
षष्ठ्यादिदशम्यन्तासु मध्यमो मध्यमत्त्व भवति तदानीं फलमपि तथा एकादश्यादिदशान्तासु अ
धमो नीचस्तेनैर्भवति तदानीं फलमपि तथा एवं शुक्लपक्षेपि प्रतिलोमतोऽवगंतव्यं तदुक्तं ज्योतिःशास्त्रे
स्वेतराज्यभूपाचजया चरिकाः प्रोक्ता तिथि मध्योत्तमा अधमशस्ताः ॥ सितेऽसिते शस्तसमाधमाः स्युः सितं त्वभी
मा किं गुरौ च सिद्धा इति तत्र स्थदृक् तारतम्यादिदं विभावितं ज्ञापितं भवति इदं किं तदाह खेचरा अपि कुज
बुधगुरुभृगुशनयोपि ग्रहाः यथायथं यथास्वं ऐहिकामैहलोके भवं फलं सुखदुःखमोहात्मकं दातुं याज्

पितुं प्रकाशयितुं च तादृशा उत्तममध्यमाधमा भवंति किंच तत्तो यथा चंद्रात्मकाशता रत्नस्येन फलतारतम्यं
भवति तथा खेचरा अपि कुजादयः उत्तममध्यमाधमा भवंतीति इदं विभावितं रूपमप्युक्तं ज्योतिःशास्त्रे प्र
सिद्धं अथवा आत्मा हृदृक्षु [illegible] मनः पंचेन्द्रियाणि तत्राभिमानितानांस्तूत्तमो भवति सुखयतीत्यर्थः पंच
कर्मेंद्रियाणि तत्राभिमानिना मध्यमं भवति दुःखयतीत्यर्थः पंचमहाभूतानि तत्राभिमानिना मधमं भवति
मोहयतीत्यर्थः मनुष्यतिर्यग्वृक्षजन्म तु तथा भवतीति भावः तत्तो मनस्तारतम्यात् इदं विभावितं यत्
खेचरा अपि इंद्रियाणां प्रियथायथं ऐहिकफलं दातुं तादृशा उत्तममध्यमाधमानि भवंति ॥७६॥ ॥ इदा
नीं ज्योतिःशास्त्रे अर्कादीनां ग्रहाणां शत्रुमित्रसमा उक्ताः तद्यथा शत्रू मंदसितौ समश्च शशिजो मित्राणि
शेषा रवेः तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः ॥ जीवेंदूष्णकराः कुजस्य सुहृदौ ज्ञोऽरिः
सितार्की समौ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ॥ सूरेः सौम्यसितावरी रविसुतो मध्योप
रे त्वन्यथा सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी ॥ शुक्रज्ञौ सुहृदौ समः सुरगुरुर्मंदस्य चान्ये
ऽरयः तत्काले च दशायबंधुसहजस्वांतस्थमित्रं स्थितादिति तथैवाध्यात्मपुरुषत्वारोपेणात्मारोतां मन
इंद्रियाणां मित्रवैरिसमान्दर्शयति तत्रादौ वात्मार्कस्य आत्मानमिति आत्मानमन्येतितनोसि नित्यमित्र

स्वात्माः
६३

रवेरात्मन इंदुं चित्तं ॥ चक्षुः शशानि सत् द्विषतां तकर्मा शत्रुस्तथा त्वगहं गुणं रत्नोपि ॥ ७३ ॥ इंदुं चित्तं
सदृशसात्विकं मनः नित्यप्रत्यहमात्मानप्रमानात्मभ्योजि विषयीकरोति यद्यानथ हे त्वज्ञानेनाशयति
तः कारणात् रवेः सूर्यस्योपासकौ श्रमतस्वात्मा प्रमानात्मस्य यद्वारु शब्द इति धातुपाठात् आत्मा बुध्यास
मेत्याथी मनो मुडे विवक्षेयति वचनात् शब्दकारणात् आत्मनो मित्रमसि हि तत्कृद्भवति तद्विपरीतक
मीतस्य मनसो विपरीतमनात्मरूपवद्व्यप्रकाशनरूपकर्म दृजिर्यस्य सः चक्षुः शशानिः शनिसदृशं
चक्षुः शत्रुविषयासः चक्षुः शशानिः शनिसदृश चक्षुः शत्रुविषयास सत्कुत्यारेनेन दुःखयति त्वगहं गुणं
रत्नोपि शत्रु [illegible] कसदृशं सशनि समपि तथा शत्रुर्भवति अधिदैवतेन इंदु चित्तं चंद्रस्य मनः सदृशं मनः
सदृश सदृश आत्मा नस्सूर्य नित्यमुभ्यति अभिमुख रवेर्भवगच्छति चंद्रो मासीति नियमात् तत आत्मनः सूर्यस्या
त्मा जगतस्तस्थुषश्चेति श्रुतेः रवेर्मित्रं भवति तद्विपरीतकर्मा तमः कुलानुकूलकर्मा च चक्षुः शशानिः च
क्षुः सदृशः शनिः शत्रुर्भवति त्वगहं गुणं रत्नोपि त्वक्सदृशः शुक्रोपि तथा तमः कुलानुकूलकर्मा शत्रुर्भ
वति ॥ ७३ ॥ अन्यत्र वीरात्रविद्विषद्गुरुग्जानेशेषोत्तमाद्विनोसरश्च सहस्ररश्मेः ॥ तत्रापि सौम्यं निजशत्रुमि
त्रसमं विलोकायपि हितश्च रात्मा ॥ ७४ ॥ कवरोषीगुरु भौमौ रविद्विषद्गुरस्सूर्य शत्रू भृगुशनी इवतमः राम
६३

कुलानुकूलकर्म न कुरुतः तस्मात्कारणात् सहस्ररश्मेर्बहुप्रकाशस्यार्कस्य हितौ स्तः मित्रे भवतः तत्रा
पि तमः कुलानुकूलकर्माभावे पि सौम्यं बुधे निजशत्रुमित्र स्वशत्रू भृगुशनी तयोर्हितकृतं यद्वा तत्काव
स्यमाणरीत्या स्वस्य शत्रुश्च मित्रं चाभयरूप अतएव समशत्रुमित्रभावशून्यं विलोक्यापि ज्ञात्वापिय
द्वा अपि भिन्नक्रमः सममपि विलोक्य चिदात्मा शुद्धचैतन्यरूपः यद्वा चेतपितरूपः सर्वहितः परमका
रुणिकत्वान्मित्रमभूत् हितकृत्त्वं तत्कपुरस्तात् तथा चक्षुः निः स्तंजनाः सूर्येणप्रसन्ना अयत्नथी निक
णावत्रयंसीति सूर्येणप्रसन्नाः स्वसेवनाय बोधिताजना ब्राह्मणादयः अयत्नथी निप्राप्ताः प्रयोजनानि कृ
वन्तु मार्ष कृषावन्न्यासि अकुर्वन्कर्माणि निश्चितं पुनः प्रयोजनसिद्ध्यर्थमित्यर्थः अथाध्यात्मशेषो अंग
भूतेरसन घ्राणो रविद्विषद्गुरू आत्मवैरिणी अनात्मरूपवद्व्यप्रकाशकत्वात् त्वक्चक्षुषी उद्वेन कुरुतः आ
त्मविरोधि न प्रकाशयतः किंतु न द्विष्टः तौ रसगंधावेव प्रकाशयतः रसादीनामात्मविभूतित्वमुक्तं भगव
ता रसोहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः ॥ प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ पुण्यो गंधः पृथिव्यां च
तेजश्चास्मि विभावसौ ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु इति तेज ओ [illegible] रसो मधुरः अ [illegible] मधुर [illegible]
नित्यापो [illegible] भिन्नत्वात् त्वक्चक्षुषोः [illegible] रसित तथापि तयोस्तदा [illegible] पृथिव्या [illegible] कत्वेन शत्रुत्वं

आत्मा:
६४

क्तिः तदाज्ञयाणां महाभूतानां चेतनविरुद्धत्वात् तस्मात् सहस्रारश्मेरात्मनो हितोऽस्तः मधुररससुरभिगंधग्र
हणेन ह्राणेन हर्षस्यैव जननात् मित्रे भवतः तत्रापि आत्मविभूतिशब्दग्राहकत्वेपि सौम्यत्वात् निजशत्रुमित्रं
स्ववैरिणीत्वक्चक्षुषी तयोरपि द्विषपरक्षणपरत्वेन हितकारित्वात् एवं सममपि विलोक्य चिदात्महितो भू
तशेषः पूर्ववत् ॥७८॥ मनश्चंद्रस्यैव चंद्रमिति चंद्रं विना स्वीयफलं विधातुं न शक्नुवंतीति समा भवंति
॥ प्रकाशकत्वात् देहरंजकत्वात् खगेशः सौम्यो भवतोऽस्य मित्रे ॥७९॥ सर्वे ग्रहाः चंद्रं विना चंद्रबलमंतरेण
स्वीयफलं खगतिजन्यं शुभाशुभरूपं विधातुं योजयितुं न शक्नुवंतीत्यैवं समत्या भवंतीति हेतोः समा भवं
ति शत्रुमित्रभावशून्याः संतिपराधीनत्वात् तत्र खगेशः सौम्यो स्यपश्चाद्बुधश्चास्य चंद्रस्य मित्रे भवतः हितका
रिणौ स्तः कुतः इह लोके रविचंद्रयोः प्रकाशकत्वात् सूर्यश्चंद्रस्य मित्रं मित्रकार्यं तूक्तं पुरस्तात् शशिबुधयो
रंजकत्वात् इन्दुजदर्शनेन प्रीतिजनकत्वात् बुधश्चंद्रस्य मित्रं भवति मित्रकार्यं तु तदुद्देशप्रवर्तनेन पुराणे
प्रसिद्धं यद्वा इह सूर्ये चंद्रप्रकाशकत्वात् सूर्यश्चंद्रस्य मित्रं भवति इह बुधे चंद्रवंशप्रवर्तनेन तद्रंजक
त्वात् इन्दुजदर्शनेन प्रीतिजनकत्वात् बुधश्चंद्रमित्रं भवति इह बुधचंद्र अभावात् ननु ग्रपतेयावदेको
पि रिपुर्नास्ति कुतः स्यात् ॥ पुरः क्लिशनोतीति सोमं हिसैं हिकेयोऽसुरोद्वाममिति मासाप्य वचनाद्राहोः शत्रोऽवि राम ६४

द्यमानेकथ्यं न रभावइति चेत् तत्र तु राहोः पृथिवीछायारूपत्वेन तमस्त्वात् तुच्छत्वं वस्तुतस्तु ज्योतिर्मे
येषु न रभावकथ्यते तात्पर्यं अथ आध्यात्मं इंद्रियाणि चंद्रमनो विना स्वीयफलं स्ववृत्तिविषयप्रकाश
नं विधातुं न शक्नुवंति सकलबाह्य अन्यक्षेमनइंद्रियसंयोगस्य हेतुत्वात् समाः समानि भवंति मनःसंयो
गमंतरेणेंद्रियाणामकिंचित्करत्वमिति भावः तत्रास्य मनसः खगेशः सौम्यो आत्मा चक्षुश्रोत्रं च मित्रे भ
वतः कुत इह प्रपंचे आत्ममनसोः प्रकाशकत्वात् आत्मा मनो मित्रं भवति समानशीलत्वात् इह मनः श्रो
त्रयोरंजकत्वात् श्रोत्रं मनो मित्रं भवति मित्रकार्यं तु नित्यशुद्धबुद्धमुक्तस्वभावसद्विदानंदात्मत्वं
योनतोऽन्द्रोस्य तु च्छत्वे ज्ञाते स्वस्वरूपे मनःस्थैर्यं जननरूप शत्रुस्तु नोक्तः अभावात् यद्यपि देहाभिमान
स्य भयलोभाद्यनेकदोषजननेन मनः शत्रुत्वं वर्तते तेन धापितस्य संसारदशापामप्यमियतस्तत्राक
त्वात् शत्रुत्वं वस्तुतस्तु इंद्रियेषु न किमपि मनो वैरिपत्रतात्पर्यं किंचैसौम्यः शब्देनाहरुहक्षुयोगीः सा
ष्टांगयोगसाधनेन मनःस्थैर्यं जनयति अतः स मनोहितकारी भवति तद्युक्तं देहाभिमाने गलिते विज्ञा
ते परमात्मनि ॥ यत्र यत्र मनो याति तत्र तत्र समाधयः इति ॥७९॥ घ्राणं मंगलस्य रसेति रसप्रदानेन गु
रुः शशी तु प्रसादतः कर्मधियोर्महीजः ॥ संतोषयामास समोऽपि भानुः तथा अपरे वेदास्तु समा भवंति ॥८०॥

आत्मा: ६५

गुरुर्बृहस्पतिः रसप्रदानेन काव्यरसभोज्यरसयोः समर्पणेन महीजं मंगलं संतोषयामास सुखिनं च कारि
शशी तु चंद्रस्तु कर्मधियोः कर्ममार्गज्ञानमार्गयोः प्रसादतः सफलत्वसंपादनेन महीजं संतोषयामास समो
पि भानुः उक्तरूपौ चंद्रचौ चाप्यत्र तु रविश्चाजनि मम तु [illegible] पाणां ॥ समो दिवाकरः शोभेच मानः क
त्वा कृतः सुकृतः कर्त्रा भिर्भूरिति श्रुतेः अस्या अर्थः सूर्यो बृहत्तस्य पोषस्तु गिरिशसोम्य कृतः हन्यमीषि
महीजनिते जातो सि कर श्रोत्रे तद्गत्वा प्रापवान् किं च पुरु बहु निविश्वासवाग्जनिम जन्मानि मानुषाणा
न प्रणां कालात्मनो रश्मयः तेऽत एव लोके सर्वेषां मरणधर्मिणां रूपाश्रितत्वेपि मनीषिणां न श्रणा
मेव जन्म समय साधनं दृश्यते समः उपचयापचय रहितमंडलः दिवा दिवसे दृढ शोभः सः शाच मानः
प्रकाशमानः कत्वा क्रतुना नाभावभ्राजादसः क्रतुशब्दस्य षड्विंशति कर्म नाम सु पाठात् कर्मणा
भिहोमादि नाकृतः स्विष्टसाधकत्वेन संपादितः सुकृतः शोभनकर्मा कर्त्राभिरारा धकैर्भूरितः अभ म
बहुलं छंदस्यमाङ्योगेपीत्युभावः यस्मिन्त्शोभवहवः श्रौतस्मार्तकर्मतत्सरास्तस्मिन्रङ्गो भोम दि आनी
भोत्मा ना भावात् सर्वं तासुखमेव मम भवतीति भावः एवं स्वरूपो पिसूर्यः तथास्तकले प्रसंपादनेन महीजं सं
तोषयामास सूर्यो हि प्राणो भवति उपनुरुखलु वा आदित्यः सर्वाणि भूतानि प्रणयति तस्मादेनं प्राणमाचक्षते मा राम- ६५

नेन संतोषयामास तदा

णाङ्त्याचक्षते प्राणो हास्य संप्रतिकृतं भवति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यमिति श्रा स्त
णात् तस्माद्देते गुरुशशिभानवो मंगलस्य मित्राणि भवंति अन्ये रवेः यत्तु अन्यो भ्रगुशर्मनिर्णये के तु वा ग्र
हाः समा भवंति शत्रुमित्रभाव हीनाः संति अथवा आत्मगुरुत्वरसनरसप्रदानेन महीजं देहाभिमानिनं
प्राणिनं संतोषयामास पद्मा महीजं प्राणं चोपस्थं च रसप्रदानेनैव तयोः स्वविषये प्रवृत्तेः शशी तु मन
स्तु कर्मधियोः प्रसादतः महीजमुक्तरूपं संतोषयामास जितविषयभोगस्येव कर्ममार्गज्ञानमार्ग
योः सिद्धेः समोपि भानुः सकलेन्द्रियविषयभोगसाधारणोप्यात्मा तथा महीजं संतोषयामास प्राणा
पानब्रह्मचर्याभ्यां तस्य प्रशस्तेः तथा च श्रुतिः ब्रह्मचारी ...ति वेविषद्विषः सदेवानाभवन्मे वर
कं मंगमिति वेविषद्विषः अभिभवन् कामक्रोधलोभमोहमदमत्सराख्यानारिपून् एकं मंगमु
ख्यस्थानं ब्रह्मचारिणस्व देहेंद्रियमनोबुद्धिषु सर्वा देवताः स्वस्वविभक्त्याति विष्ठंतीति भावः तथा महीं
जं लक्षं दत्तवनिता भोग संपादनेन संतोषयामास तेन तस्य पुष्टे वै घकशास्त्रे कथितत्वात् तस्माद्
सन हृदयो [illegible] आत्मानः पुरुषस्य लोक दु
सुखसंपादनेन मित्राणि भवंति अन्यस्य वेयत्तु अन्ये त्व क्रूरत्वानाथ्या साहदयचण देहाभिमानि

डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
MEMORIAL

आत्मा:
६६

नः पुरुषस्य घ्राणस्य चोपस्थस्य च समा भवंतीति निदूषयेत् दासीनाः संति ॥ २० ॥ बुधः इति उपेंद्रवज्रा
वृत्तं उपेंद्रवज्रा जौ जौ गा गिति लक्षणात् बुधः सदा प्राप्तरवि प्रदेशः स्तमेव गंतुं यतमानचित्तः ॥ अधी
नयंतं वनितादि भोगैः प्रमादकं दुष्टसतां महीजं ॥ २१ ॥ सदा प्राप्तरविप्रदेशः सर्वस्मिन्काले अधि
ष्ठितो रवेः सूर्यस्य प्रदेशः यस्मिन् आशो रविः स राशिस्तत्पूर्वो परराशिर्वा येन सः तमेव गंतुं सूर्यमे
व प्राप्तुं यतमानचित्तः यतमानं प्रयोगचित्तं मनो यस्य सः यद्वा तमेव सूर्याधिष्ठितं राशिं तत्पूर्वापर
राशिं वा नान्यराशिं गंतुं यतमानं चित्तो बुधः वनितादिभोगैः स्त्र्यादि सुखानुभवैरधोनयंतं नीचस्थानप्रा
पकं भूलोके अग्नेः कन्या मिलितादृष्ट्वा तेजसो दर्पलोभेन बुधः स्ववररोतो प्रवर्तयामासेति पुराणं तादृश
प्रवर्तनेन बुधस्याप्रशस्तिकरं किंच सतां श्रोतकर्मपराणां शुभानां कर्मणां वा प्रमादकं मनवधाना
पादकं अतएव मंगलः पापरूपस्तु क्रोज्योतिरिश्शास्त्रे महीजं दुष्टमंगलस्य शत्रुर्भवति अथवा ध्यात्म सदा
प्राप्तरविप्रदेशः प्राप्तात्मस्थानः आत्मस्थानं त्वतः करणं तत्रैव तत्स्वप्रतिफलनात् तमेवात्मानमेव
गंतुं प्राप्तुं यतः करणमेव गंतुं वशीकर्तुं यतमानं चित्तः मनो वृत्ति रागादिकषायैरिंद्रियाणि विष
येषु माप्रवर्तिष्यंतीति बुध्यायतते उपयुक्तः तादृशं चित्तं यस्य सः बुधः ज्ञाता आरुरुक्षुर्योगी वनितादि

राम
६६

भोगैः वनिता भार्या प्रिया च स्निग्धा च आदिना स्रक्चंदनादीनि तेषां सुखानुभवैः योगसिद्धि सुखानुभ
वैश्चाधोनयंतं सतां प्रमादकं महीजं प्राणोपस्थरूपं दुष्टं दुष्टकर्म तु प्राणायाम ब्रह्मचर्याभ्यां त
न्निग्रहः ॥ २१ ॥ श्रोत्रं बुधस्य ॥ सदेति सदा समीपे स्थितं मात्मभानुर्बुधं समीक्ष्याप्रिहितो घकाव्यः ॥
स्वपालकं मित्रसखं स्वमित्रं तथैव जातं अपरे समाना ॥ २२ ॥ आत्मभानुः आत्मैव भानुः सूर्यः उ
क्तरीत्या सदा समीपे स्थितं बुधं समीक्ष्य विचार्य हितो आप्तमित्रं भवतीति तदुक्तं भगवता अनन्याश्चिंत
यंतो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति अनन्याः इत्यत्र चाविद्यमा
नोन्यः उपास्यो येषामिति विग्रहे सूत्रमतेन बहुव्रीहावितिसर्वनाम्नो निषेधः भाष्यमते तूपसर्ज
नत्वान्निषेधः अनन्याः भिन्नभावमप्राप्ताः इति विग्रहे तु उभयमते आर्षः जनग्रहणं वैराग्यप्रप
र्युपासते विश्वरूपेण भजंते नित्याभियुक्तानां योगमात्रं तत्परचित्तानां योगक्षेमं योगे चित्तवृत्ति
निरोधे क्षेमं निर्विघ्नकरणं योगस्य क्षेमपालनमिति वा अथानंतरं बुधस्यादूनीयो मित्रमुच्यते
काव्यः काव्यम् अस्यास्तीत्यर्श आद्यच् काव्यः शुक्रः स्वपालकं निजरक्षकं मित्रसखं मित्रं शनिस्त
स्य सखा मित्रं तं राजाहः सखिभ्यष्टजिति सखशब्दात् तत्पुरुषादचे स्वमित्रं अत एव निजाहितं तथैव

आत्मा: ज्ञानस्य विलोकैर्यैव मित्रमभूत्परेऽकुजगुरुशनयः समानाः शत्रुमित्रत्वहीनाः संतीत्यर्थः अथाध्या
६७ त्म आत्मभानुः सूर्यसदृशः प्रमीतात्सदा समीपे स्थितं बुधं स्वस्य श्रवणात्परमारुरुक्षुर्योगिनं समी
क्ष्य हितोऽस्मिन्निति तदिष्टतममात्मस्वरूपं प्रकाशयतीत्यर्थः अथ कोऽयं त्वक् स्वपालकं शरीरमाद्यं
खलु धर्मसाधनमिति बुध्या आरोग्यसंपादकं मित्रसरखं मित्रस्फोटादित्वग्रोगनिवारकं च
स्तुः उक्तमेतद्वैद्यकशास्त्रे यावच्छरीरप्रदेशे दृष्टिपातस्तत्र स्फोटादित्वग्रोगः प्रबलो न भव
तीति तस्य सखित्वयोगसाधनत्वं नादि चक्षुष्यमक्ष्णोर्न हितकारित्वम् अतोऽपि स्वमित्रं निजाहितं न
त्वेव जातः प्रेष्ठहितमेवाभवत् अहितकर्मत्वविक्षेपकरणं विक्षेपाऽक्ताः पातंजले योगशास्त्रे व्या
धिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तवि
क्षेपास्तेंतरायाः इति अथ परेऽपराणि घ्राणरसनचक्षूंषि समानाः समानानि आरुरुक्षोर्योगिनो
निर्विघ्नसच्चिदानंदात्मप्रकाशे जाते घ्राणरसनचक्षुषां मम किंचित्करत्वमिति भावः॥ ८३॥
अधीत्येति अधीत्य वेदान् गुरुशिक्षया च प्रदीप्तबुद्धिर्मयि संज्ञितोऽसौ॥ पश्चाद्दिनादृत्य रविं प्र
यातितस्माद्बुधं दृष्टिसमीक्ष्य सोमः॥ ८४॥ सोमश्चंद्रस्तस्मात्कारणात् बुधं समीक्ष्य विचार्य दृ राम ६८

ष्टितस्य शत्रुर्भवतीत्यर्थः तस्मात्कस्माद्यस्मात्कारणात् असौ बुधः वेदान् ऋग्यजुःसामाथर्वा
ख्यानधीत्य पूर्वमध्ययनेन गुरुशिक्षया च गुरोर्बृहस्पतेः शिक्षया स्वराक्षराद्युदीरणज्ञापनरूप
या च प्रदीप्तबुद्धिः प्रकृष्टज्ञानः सन् मयि मन्त्रापके कर्मणि संज्ञितः तत्परो भवति पश्चाद्बुद्धि
रूढ्यनंतरं मामनादृत्य किमनेन कष्टेन कर्मणेति बुध्या रविं ऋजुतिगम्यपरमात्मानं प्रयाति नि
त्यमुपास्ते अथाध्यात्मम् असावारुरुक्षुर्योगी वेदान्धीत्य गुरुशिक्षया व्यापकशिक्षया गु
र्वीवाशिक्षया प्रदीप्तबुद्धिर्मयि मन्त्र पंचे संज्ञितेऽपि पश्चान्मामनादृत्य रविमात्मानं प्रयाति ध्यायति
तस्मात्कारणात् समीक्ष्येवं विचार्य बुधं मारुरुक्षुयोगिनं दृष्टिदूषक मंतुस्त्वचापलेन दुःखज
नतरूयं॥ ८४॥ रसनवृहस्पतेः परस्परेति परस्परप्रीतिवशाद् ज्ञेयोरवेर्गुरोस्तौ भवतोऽस्य मित्रं॥
मंत्रोपदेष्टुः परमेश्वरेण समं न भेदोऽस्य तत एव जातेः॥ ८५॥ परस्परप्रीतिवशाद्गुरुरव्योरन्योन्यस्तु
रवाधीनत्वात् रवेः सूर्यस्य योऽपकुणाविशिष्टोऽहितावेष्टसंपादकोऽसौ मम मंगलो भौमः तेन गु
णविशिष्टो सोम मंगलो अस्य गुरोर्बृहस्पतेर्मित्रं भवतः इष्टसंपादकोऽतः दुष्टोः अत एव
स्मादेव हेतोर्लोकेऽपि मंत्रोपदेष्टुर्वेदाध्यापकस्य परमेश्वरेण समं सर्वोपास्यत्वसाद्दृश्ये भेदोऽभिन्नबु

द्विर्नास्ति तथा चानयोः समानं पूज्यत्वमिति भावः इति ज्ञाने ज्ञानात्म हंग्रं थकृत परस्परप्रीतिस्तु उ
त्पाते स्वगृहगतारय इति श्लोके कथिता अथाध्यात्मं आत्मरसनयोः परस्परप्रीतिवशादात्मना
यो हितो मनो प्राणरूपो नाम वस्य गुरोरसनस्य मित्रे भवतः तत्तराहु तत्काथे शेषं पूर्ववत् ॥ ८५॥
ना ननु गुरुरव्योः समानं पूज्यत्वमुक्तं तथा च द्वयोः समवधाने आदौ कः पूज्य इति चेत्तत्राह स
र्वे ति सर्वग्रहाणां कमपीन शत्रू अपि द्विषन्नेव गुरुरविस्तु ॥ यथाकृतकर्मफलप्रदाता वा
गीशभान्वो गुरुराज्यते ऽतः ॥ ८६ ॥ गुरुर्बृहस्पतिः सर्वग्रहाणां सकलानां सूर्यसोममंगल
बुधशुक्रशनीनां मध्ये कमपि ग्रहं नैव द्विषन् द्वेष्टा नैव भवतीत्यर्थः इन शत्रु सूर्यारिपूमनु
शनी नैव द्विषन् सर्व समत्वात् सर्वपोषकत्वाच्च अत एव ज्योतिःशास्त्रे बृहस्पतेर्जीव इति सं
ज्ञा न लोकाध्ययनिष्ठारवलर्थेनेनाभिति यषष्ठो निषधः शनुर्लादेशात्वात् रविस्तु सूर्यस्तु पथा
कृतं कृतं विहितं च निषिद्धं च तदनतिक्रम्य कर्मफलप्रदाता कर्मफलेस्तु रविद्वः रवितयोः प्रक
र्षेणानुभवसंपादकः सर्वेश्वरत्वात् अतः कारणात् वागीशभान्वो गुरुरव्योर्मध्ये गुरुर्बृहस्प
तिरीज्यते पाच्यते पूज्यते स्तूयते ईलिर ध्येषणा कर्मा पूजा कर्मावितिनिरुक्तात् इंउस्तु जावि

ति धातुपाठात् अत एवाभ्यर्हितत्वाद्वागीशशब्दस्य पूर्वनिपातः अथाध्यात्मं गुरुरसनं ग्रहाणां
सकलेन्द्रियाणां मध्ये कमपि किमपीन्द्रियं नैव द्विषद्भवति इन शत्रु अपि आत्मारिपुरूपे सत्वे क्व शु
षीनेव द्विषत् सर्वपोषकत्वात् रविस्तु आत्मा तु यथाकृतकर्मफलप्रदाता भवति अतो वागीश
भान्वोः रसनात्मनोर्मध्ये गुरुरसनमीज्यते प्रियस्निग्धमेध्यभोजनेन सकलेष्टसिद्धेः अन्नेन प्रा
णाः प्राणो बलं बलेन तपः तपसा श्रद्धा श्रद्धया मनीषा मनीषया मेधा मेधया शान्तिः शान्त्या
चित्तं चित्तेन स्मृतिं स्मृत्या स्मारं स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नद
दन्सर्वाण्येतानि ददातीति श्रुतेः ॥ ८६ ॥ विरुद्धेति विरुद्धात्मभिः पूजितः सर्वथैवमकवि
र्दुष्ट्यो नूचानमाम्नायमार्ग ॥ तथा च दृष्टमेतत्समस्तयुगेऽस्मिन्द्विजद्वेषिभिष्यावितो नाच
पून्यः ॥ ८७ ॥ विरुद्धात्मभिर्वैदिकमार्गविरोधिस्वभावैरसुरैः पूजितः गुरुत्वेन संमानितः क
विः काव्यश्च सनातनः शुक्रः अनूचानं वेदार्थवक्तारं अत एवाम्नायमार्गं आम्नायो
वेदः तदुदितं कर्मज्ञानात्मकमनुष्ठानं स एव मार्गो गतिर्यस्य तं तथा च कालिदासः पद्यः श्लो
चेदं शीघ्रमितादरे श्वरामलोमसामादरेतेन यद्गातिमिति इमं बृहस्पतिः सर्वथा सर्वप्रकारेण

स्वात्मा:
६९

द्विष्टिद्वेषकर्मनुच्चस्याः सर्गविधौ प्रजापतिरभूच्चंद्रोनु कांतिप्रदः शृंगारैकरसः स्वयंनु मद
नो मासो नु पुष्पाकरः॥ वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोह
रमिदं रूपं पुराणो मुनिः॥१॥ ब्रह्मन्नध्ययनस्य नैष समयस्तूष्णीं बहिः स्थीयतां स्वल्पं जल्प बृह
स्पते जडमते नैषा सभा वज्रिणः॥ वीणां संहर नारद स्तुतिकथालापैरलं तुंबुरो सीतारल्लकमल्लभ
ग्नहृदयः स्वस्थो न लंकेश्वर इत्याश्रिन्निंदारूपंपद्यस्य सर्वथानूचानमाम्नायमार्गमितियोजनीयंपूर्व
नतद्वेषकर्मत्वमस्मिन्प्रवर्त्तमाने युगे कलिकाले समक्षं प्रतिपुरसमनुभ्यो ऽक्षाद्यन्य व्ययीभावे
च प्रत्यक्षं तथा तेन प्रकारेण दृष्टं चक्षुर्योग्ये जानंतथा कथं मिथ्याव्रतः श्रुतिस्मृत्यविहितवि
रूढाचरणः धर्मलिंगी तिथावत्र च जनएवं नीच पूज्यः धर्मतत्त्वमजिज्ञासवो नीचास्ते पूज्यः सत्क्रिया
न्वासनस्वादुभोजनस्रक्चंदनवचनैर्माननीयः पुरुषः द्विजं ब्राह्मणक्षत्रियवैश्यं द्विष्टिद्विजानां वैदि
कमार्गमात्रवर्तित्वान्न द्विजमित्येकवचनं द्विजत्वाभिप्रायेणाय ज्ञानं तपसामित्यादियाज्ञवल्क्य
स्मृतेः यद्वा द्विजं ब्राह्मणं दृष्टान्येव क्षत्रियवैश्ययोः शूद्रयोरिदानीमभावात् द्वेषकर्मत्वं ब्राह्मणा
द्विदानीं लोभग्रस्ताश्च नियमाचारा गृहे गृहे ऽन्नार्थं याचमाना स्तिरस्कृता हततेजसः संति वयं राम
६९

तु निःस्पृहा लयस्विनस्तेजस्विनः केवलं लोकानुग्रहार्थमेव दर्शितस्वरूपाः स्मः वैदिकमंत्रास्तु नसि
ध्यंत्येव फलादर्शनात् तत्र मंत्रास्तु सिध्यंत्येव प्रत्यक्षफलदर्शनादित्यादि निंद्या स्वस्तुत्या च जगद्वचनरू
पंचथाध्यात्मविरुद्धात्मभिः केवलशरीराभिमानिभिर्भोगतत्परैः पूजितः पोषितः कविस्त्वक सर्वथानूचा
नमाम्नायमार्गं तपानाद्यशनाद्यरीमति श्रोतः विषयाविनिवृत्तो निराहारस्य देहिनः॥ रसवर्जं रसोप्यस्य
परं दृष्ट्वा निवर्तते स्थितः परं बुद्धिभासकं सच्चिदानंदमात्मानं रसो विषयप्रीतिः नोद्विग्नवन्मे स्थिते तडप
वासपरभित्यर्थः दूममिदं रसनं द्विष्टिद्वेषकर्मत्वं स्वपोषणाय मांसादि निषिद्धभक्षणे प्रवृत्तेन रूपं उत्तपद्
तत्कार्थं तत्र द्विजं रसनं॥८७॥ सेवीं शतिसर्वैः प्रमाणैर्विदितात्मतत्त्वस्तत्रैव संविष्टमना मनीषी॥ तकादिवा
ग्जालविधातुरस्य व्यर्थश्रमस्येद्दुरुत्तानमित्र॥८८॥ सर्वैः श्रुतिस्मृतिपुराणैः प्रमाणैरबाधितार्थकत्वे
न ज्ञातैः विदितात्मतत्त्वः ज्ञातसच्चिदानंदस्वरूपः तत्रैव सच्चिदानंदब्रह्मणि सम्यगेव तत्स्थैव परमार्थत्वात्
अन्यस्य तुच्छत्वात् संविष्टमनाः नियतचित्तः अतएव मनीषी विद्वत्त्वेनाभिमतः इदृशे ज्ञात्वा बुधः कृतार्थ
त्वाभिमानात्तर्कादिवाग्जालविधातुः तर्कः कणादगौतममतरूपः आदिशब्देन सांख्ययोगनादिनास्तिक
मतानि तेषां वाग्जालं वाचां शब्दानां जालमिव आवरकं जालं समूहः तस्य विधातुः प्रकाशकस्य व्यर्थश्र

आत्मा:
७०

मस्य व्यर्थो निष्प्रयोजनः श्रमः प्रयत्नायासो यस्मात्तस्यास्य बृहस्पतेर्निमित्तं शत्रुर्भवतीत्यर्थः ननु तत्को
दिवाज्ञाल्लिविधातुः श्रमवैयर्थ्यं कथमिति चेत्तत्र गुरुतत्रादिश्लोत्रमुरादिद्विपनेतच्चथाप्रतियोग्यवृत्तिश्च
धर्मो न प्रतियोगितावच्छेदक इति चिंतामणिगंगेशग्रंथमवतारयता दीधितिकृता तार्किकशिरोमणिना रघुना
थकवे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावमादाय व्याप्तिलक्षणं तथाहि हेतुतावच्छेदकसं
बंधेन यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्ना यावंतोऽभावाः स्वविशिष्टहेत्वधिकरणावच्छेदेन
प्रतियोगिसमानाधिकरणास्तत्त्वं व्याप्तिः वह्निमान्धूमादित्यादौ हेतुतावच्छेदकसंबंधसंयोगादि
तेन यत्समानाधिकरणा हेत्वधिकरणपर्वतादिवृत्तयः साध्यतावच्छेदकवह्नित्वादिनावच्छिन्नस्य वह्न्य
रव्यापकतादृश्यत्वादिनिष्ठावच्छेदकप्रतियोगितापेक्षया तादृशा यावंतोऽभावाः घटत्वेन वह्न्य
त्वाभाववद्भिन्नाभावादयः तावंतः स्वविशिष्टहेत्वधिकरणावच्छेदेन तादृशभावविशिष्टपर्वताद्यवच्छेदेन
प्रतियोगिसमानाधिकरणाः द्रव्यत्वावच्छिन्नाद्यधिकरणवृत्तयः तत्त्वं हेतुत्वं धूमादिनिष्ठमिति लक्षणा
समन्वयः अथ यद्धर्मावच्छिन्नहेतुतावच्छेदकसंबंधग्रहणादयमात्मा ज्ञानादित्यत्रात्मत्वे साध्ये समवा
येन हेतौ ज्ञानस्याविषयतयाधिकरणे पर्यदोवर्तमानस्यात्मत्वत्वेनात्मत्वाभावस्यात्मत्वसामाना

राम
७०

५ प्रसंगः समवायसंबंधेन व्यापकतावच्छेदकप्रति ×५

धिकरण्याभावेऽपि न क्षतिः समवायेन ज्ञानाधिकरणे आत्मनि वर्तमानस्य घटत्वेनात्मत्वाभा
वस्य ग्रहणात्तस्य व साध्यते ज्याादिरत्नान्तरेऽपि यन्न संबंधेन व्यापकतानेनैव संबंधेन प्रतियो
गिसामानाधिकरण्यमिति विवक्षणीयं तेनायमात्मा महाकालत्वादित्यादौ समवायेनात्मत्वे
साध्ये तेन संबंधेन तादृशात्मत्वाभावस्यापि कालिकविशेषणतयात्मत्वाधिकरणे महाकाले
सत्त्वेऽपि नातिप्रसंगो नाकस्यात्मत्वत्वेनात्मत्वाभावस्य समवायसंबंधेन प्रतियोग्यात्मत्वसामाना
धिकरण्याभावात् अभावेषु यावत्त्वोपादानात् भूतत्वमूर्तत्वोभयवान्मूर्तत्वादित्यादौ द्वित्वाव
च्छिन्नाभावस्य प्रतियोगिभूतत्वसामानाधिकरण्येऽपि यावदंतर्गतयोर्भूतत्वाभावमनोन्यत्वा
भावयोराकाशनिष्ठभूतत्वमनोन्यत्वरूपप्रतियोगिसामानाधिकरण्याभावान्नातिप्रसंगः साध
नसमानाधिकरणस्य गोत्वाद्यभावस्य तत्साध्यव्यधिकरणभावस्य चातथात्वात् वह्निमान्धूमादि
त्यादावव्याप्तिः तद्वारणाय साध्यतावच्छेदकेत्यादि ॥ हेत्वधिकरणावच्छेदेनेति विवक्षणात् गोमा
नोत्वादित्यादौ नातिप्रसंगः हेतुमति प्रत्येकगवाद्यभावस्य प्रतियोगिसामानाधिकरण्याभावा
त् स्वविशिष्टेति विशेषणात् कपिसंयोगाभाववान्सत्त्वादित्यादौ संयोगाद्यात्मकस्य साध्याभा

७१

MEMORIAL

आत्माः ७१ वस्य स्वविशिष्टहेत्वधिकरणवृत्तित्वेन प्रतियोगिसामानाधिकरण्याभावो व्याप्तिरिति नन्वेवं धू
मवान्वह्नेरित्यादौ धूमत्वाद्यवच्छिन्नप्रतियोगिताकधूमाद्यभावस्य धूमवद्वृत्तित्वविशिष्टगोत्वा
भावाभावात्मकतया वह्निद्रव्योभयाभावात्मकतया च गोत्वाभाववह्निरूपप्रतियोगिसामाना
धिकरण्यादतिव्याप्तिरित्याशङ्क्य स एव द्वितीयं लक्षणमवचेन तद्यथा यत्समानाधिकरणानां
साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां
प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वमिति वह्निमान् धूमादित्यादौ धूमसमानाधिक
रणेन रूपेण घटाद्यभावः एवं तत्तावत्तामभावानां प्रतियोगितावच्छेदकं वह्नित्वद्रव्यत्वा
दवच्छिन्नवह्न्यादितत्सामानाधिकरण्यात् लक्षणसमन्वयः धूमवान् वह्नेरित्यादौ नातिव्याप्तिः धू
मत्वादिना तादृशधूमाद्यभावस्य तादृशगोत्वाभाववह्न्यादिरूपप्रतियोगिसामानाधिकरण्येपि
प्रतियोगितावच्छेदकं धूमत्वादि तदवच्छिन्नधूमादिसामानाधिकरण्याभावात् प्रतियोगिताव
च्छेदकावच्छिन्नग्रहणात् वह्निमान् धूमादित्यादौ वह्नित्वादिना द्रव्यत्वाभावस्य यावदन्तर्गतस्य राम ७१

हेत्वधिकरणे ह्रदत्वप्रतियोगिसामानाधिकरण्येपि नासंभवः प्रतियोगितावच्छेदकावच्छिन्नवह्न्यादिसा
मानाधिकरण्यात् एवं वह्नौ तु वह्निमान् धूमादित्यादौ वह्निह्रदत्वोभयत्वावच्छिन्नप्रतियोगिताकघटाद्यभा
वस्य प्रतियोगितावच्छेदकावच्छिन्नवह्निह्रदत्वोभयसामानाधिकरण्याभावात् ह्रदत्वेनत्वेन वह्न्याद्यभावस्य
च हेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नह्रदत्वसामानाधिकरण्याभावात् असंभवः तद्वारणाय
तादृशव्यापकतावच्छेदकरूपावच्छिन्नेति शेषं पूर्ववद्बोध्यम् इयं तर्कविद्या बृहस्पतेरनभिमतेति तु नाशङ्क
नीयं यस्य पुनरानुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्तीति प्रत्ययो न तेषां तादृशाभावनिवारणाय गु
बीणगुरूणामपि शङ्काभिमतं व्याप्तिवदन्तानां किं च शिरोमणिने वतर्कविद्याया बृहस्पत्यभिमतत्वेन
नात अन्ये त्वित्यवान्यादृशानि व्याप्तिलक्षणानि चक्रुः तथा चानवस्थानात् एतावत्पर्यन्तं प्रतिसंधानाभा
वे पिपीलिकादिप्राकृतजनानामपि सकलेष्टसिद्धेः अयमेतद्विचारो व्यर्थ एव यत्नः उक्तं तु पण्डितम्मन्याभिप्रा
येणैतत् वस्तुतस्तु चतुर्दशानामपि विद्यानां सदसद्विवेके तात्पर्यं शास्त्रार्थकत्वमेव वस्तुविज्ञानं चिकितु
षे जनाय सच्चासच्च वचसी पस्पृधाते ॥ तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासदिति श्रुतेः सोव
ज्ञानं अबाधितविशेषज्ञानं चिकितुषे विदुषे चिकित्वांश्चेतनावान् निरुक्तात् पस्पृधाते परस्परं प्रामाण्य

कीदृशस्यास्य तर्कादिवाग्जालविधातुर्व्यर्थश्रमस्यारुरुक्षुदृष्ट्यार्थः पूर्ववत्

आत्माः
७२

प्रकाशयतः सत्वमबाधितार्थकं तत्रापि ऋजीयः प्रियंतरमितिवेदभाष्यमतेतद्देवनिरुक्तमते पदपूरणादु
ऽच्छब्दोनर्थकः एवसोमः मनोदेवताचंद्रमाः स्तूयते अध्यात्मेतु चंद्रमोऽनुगृहीतमनः हन्यासतहेतिअ
सदितिपदच्छेदः संहितायांदीर्घपाठः यस्यमनसिचंद्रमोनुग्रहोनास्तितस्यमनसिरावणदुर्योधनयोरि
वासदेवतिष्ठतीतिभावः सौगतादिमतानिनोपन्यस्यंते ग्रंथविस्तरभयात् प्रकृतानुपयोगाच्च ननु तर्कवि
द्यायाः कुत्रोपयोगइतिचेन्नैवं प्रत्ययादिदृष्ट्यारूपादिसामान्याभावेसाध्ये पृथिवीत्वादिकंसद्धेतुरेवेति
वदतातार्किकशिरोमणिनातत्वज्ञानदृष्ट्यात्मनिसंसाराभावस्योक्तप्रायत्वात्प्रकृतोपयोगात्प्रकृत
मनुसरामः गुरुद्वेषोनर्थहेतुरितितत्रोक्तं प्राक् सौम्यत्वेतिश्लोके अथाध्यात्मेइंदुस्तुतः इंदुर्मीनः सच्चि
दानंदात्मकः संप्रीतः स्तुतः अभिष्टुतः शिथिलसंस्कारकं तनयेनस ४ आरुरुक्षुर्योगी अस्यारूढस्य
योगिनेतेनमित्रंद्वेषंकरोतीत्यर्थः शेषंपूर्ववत् नैवस्तु नस्तु न कीदृशः आदिशब्देनवेदांतादिशास्त्रंतर्कबलं
विनादुरूहेवेदांतविषयेब्रह्मणिदुष्प्रवृत्तेः तत्वाग्जालंयस्मात्तदुक्तंतथाचसूत्रंशास्त्रयोनित्वादि
तितस्यप्रकाशकस्यातएवविविधाअर्थाविभक्तयोयस्मात्सः पदैर्विशिष्टोनित्योर्थःस्त्रिविधदुःखा
त्यंतनिवृत्तिरूपः स्वस्वरूपावाप्तिरूपोवायस्मात्सः आत्मायोगाभ्यासरूपोयस्यतस्यविदितात्मतत्वेत्र

राम
७२

विदितमात्मतत्वं हरिहरादिदेवतारूपंयेनसः किंचेंदुस्तुतः इंदुत्वेनात्मकः सोमः स्तुतः कं उनेनद्रावि
तोयेनसयजमानः अस्यसर्वसमस्यत्यागिनोनामित्रं कीदृशः विदितात्मतत्वः विदितमात्मतत्वंब्राह्म
णस्यगृहस्थस्यममयज्ञएवाधिकारः महायज्ञैश्चयज्ञैश्च ब्राह्मीयंक्रियतेतनुरितिस्मरणात् एवंभूतस्व
रूपंयेनसः तत्रैवयज्ञएवविष्णुर्वैयज्ञइतिब्राह्मणात् शेषंपूर्ववत् द्वेषकर्मितत्रभयत्रापितद्वचोनारदरूपं
अपरंचाध्यात्मेइंदुस्तुतः वक्तुर्गीतात्मत्रोक्तरीत्याश्रोत्रतदुत्थानश्रोता अस्यरसनस्यनमित्रंविदितात्मतत्व
ःविदितमात्मतत्वंशरीरपोषणारूपंयेनसः तत्रैवशरीरपोषणएवव्यर्थश्रमस्यविपरीतार्थकश्रमस्य
नवाहदेवाः क्षुधमिद्वधंददुरुताशितमुपगच्छंतिमृत्यवइतिश्रुतेः मृत्यवोरोगाः शेषंपूर्ववत् द्वेषकर्म
तुर्वेधकोपदेशात्तन्निरोधनरूपंतदुक्तंभगवतानात्यश्नतस्तुयोगोस्तिनचैकांतमनश्नतइति ॥ ८८ ॥ त्वग्भ
ग्वक्षिसोर्यीः रजोभीनिरजोभियुक्तोबुध आत्मशत्र्वोः संसज्जतेनावपिहृक्तमंदो ॥ परस्परप्रीतहृदो
विलोक्यद्विषद्धितस्त्वीपगुरोपुसक्तः ॥ ८९ ॥ रजोभियुक्तः सत्वतमःप्रवर्तकश्चलः प्रकृतिगुणोरजः ते
नविशिष्टोबुधः आत्मशत्र्वोः सर्वदोपार्थित्वेनपरप्रेमास्पदत्वेनचात्मासूर्यः तस्यशत्रुः शुक्लमंदेन
योः कर्मिणितमः कुलपालनरूपेसंसज्जतेनितरामासक्तोभवति अतः शुक्लमंदयोस्तत्यात्स्यपा

आत्मा
७३

लकत्वेनहितोभवतीतिभावः। तावपितमःकुलपालकत्वात्सूर्यशत्रू अपिशुक्रमंदौमद्गुणशानीद्विष
द्धि। तद्विषन्चंद्रः तस्यमित्रंचंद्रस्यशुक्रमंदशत्रुत्वंवक्ष्यतेबुधंस्वीयगुणेषुस्वयोः शुक्रमंदयोरि
मेगुणाः रजस्तमः प्रवर्तकत्वादयः तेषुसक्तंतत्परंविलोक्येदृष्ट्वा परस्परप्रीतहृदौ अन्योन्यहि
तकरणान्मित्रे भवतः अयंभावः सर्वेश्वरेसूर्येस्वशत्रौविद्यमाने आवयोः परस्परोपकारीकथं
सेत्स्यतइतिभीतौशुक्रमंदौतादृशसूर्यप्रीतिपात्रंबुधंस्वहितकारिणंदृष्ट्वा निर्भयौसंतौपरस्प
रोपकारीकृतवंतावितितत्रशनौशुक्रोपकारस्तूक्तः ग्रहोक्तेतिश्लोकेशुक्रेशन्युपकारत्वंतु
परमेववक्ष्यते अथाध्यात्मरंजोभियुक्तोबुधः आत्मा आरुरुक्षुर्योगी चात्मशब्दोहृतःकत्या
त्वक्चक्षुषोर्विषयेस्वंकरनवनिताद्दर्शनगमनस्पर्शनसेवनरूपेऽभ्यासाचार्यदर्शनोपसर्प
णतस्वरेणास्पर्शनपूजनरूपेचसमसज्जनेतन्त्यापरणतत्परत्वात्तन्मित्रंभवतीत्यर्थः। तावपि आ
त्मशत्रू अपिशुक्रमंदौतेअपित्वक्चक्षुषी दृष्ट्वा तंवक्ष्यमाणरीत्याद्विषन्मनः तस्यजन्मो
षधिमंत्रतपः समाधिजन्यसुखसमुत्पादनेनहितकारिणं स्वीयगुणेषुत्वक्चक्षुषोरेषुपूर्व
गुणेषुसक्तंविलोक्यपरस्परप्रीतहृदौ अन्योन्यहितकरणादन्योन्यमित्रेस्तः हेतुःपूर्ववत् राम

७३

चक्षुषिकरोपकारस्तूक्तः करस्यशुक्ररूपत्वंचोक्तंत्वचिचक्षुरुपकारोवक्ष्यते॥ ८९॥ तमइतितमःकुले
शुक्रयमौहितौस्तस्तस्माद्रवीदूनतयोर्हितस्थौ॥ स्वस्यापनेचचलवासमार्किः अक्षेतनोद्विदृशानिमहोजः॥
९०॥ यतः शुक्रयमौमद्गुणशनीतमः कुलेराहोर्वशतत्पालनेनहितौस्तः मित्रेभवतः तस्मात्तामसकुलहित
करणात्रवीदूसूर्यचंद्रौतयोः शुक्रमंदयोर्नहितस्थौहितकरौनतिष्ठतः स्वमेजसातन्नाशकत्वात्शत्रूस्त
इत्यर्थः। किंचयतआर्किः सूर्यपुत्रः शनिः स्वस्यापनेस्वस्वामिकेमकराघनेराशौचंचलवासंचचलः चरः
मेषराशिः सएववासोवसतिगृहमितिपावनतादृशचक्रेकृतवासान्ततः स्ववसतेः चंचलत्वकरणात्तमहा
जौमंगलः शनिद्वेष्टिशनिः शत्रुर्भवतीत्यर्थः मंगलगृहमेषराशिश्चरइतिज्योतिःशास्त्रप्रसिद्धः आर्किग्र
हशास्वगृहोच्चरानेनाकपूजकस्यमंगलस्यापकारकरणमयुक्तमितिसूचनाय अतोपिपापत्वेशनेरीति
भावः अध्यात्मंशुक्रयमौत्वक्चक्षुषीतमःकुलेअज्ञानकल्पितेभक्तग्रामेहितौस्तः तत्प्रकाशनेनमि
त्रेभवतः तस्माद्रवीदूआत्ममनसीतयोः त्वक्चक्षुषोर्हितस्थौतत्कार्यसंपादकेनस्तः नन्विदंविरुद्धं आ
त्ममनसीविनात्वक्चक्षुषोः स्वकार्यसाधनेसामर्थ्याभावादितिचेन्मैवं आत्ममनसोस्तत्वज्ञानत्वक्
चक्षुर्विषयस्यसमूलस्याच्छेदसाधकत्वात् अतःशत्रूभवतइत्यर्थः किंचयतआर्किः अक्षचक्षुः स्वस्या

यनेज्ञानमार्गे चंचलत्वात् प्राणस्य वासःस्थानं नासिका वायुः प्राणः तं च चंचलं चक्रे सदागतित्वाच्चलस्वभावो हीति भावः तथा च श्रुतिः आतेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः इति अस्या अर्थः अत्र प्राणदेवतारूपावश्विनौ यस्यैते हे अश्विनौ मनसो जवीयसा मनोजवीयः वेगवत्तरं ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तरिति श्रुत्यन्तरात् ततोपि वेगवत्तरेण तेन रथेन प्राणरूपेण यायातमागच्छतं तेन तकेन क्रमवक्रभुनामकाः ऋषयः वायुवपोः आपकं प्राणरूपं रथं क्रीडास्थानं रथो रंहतेर्गतिकर्मणः स्थिरते वौ स्याद्विपरीतस्य रममाणोस्मिन् तिष्ठतीति वा रपतेर्वा रसतेर्वेति निरुक्तात् चक्रुः कृतवन्तः युक्तात्मा प्रये प्राणायाममयं बभूवुरिति भावः नन्वस्मात् आचर्यात् किं फलमिति चेत्तत्राह यस्य नियस्य प्राणरूपस्य रथस्य सा ध्येये योगे विजयते निरोधे दिवः द्योतमानस्य हृदयाकाशस्य सकाशात् दुहिता दुहिताद्दुहि ताद्रोहितोदग्धेवेति निरुक्तात् परिणामसुखात्वात् विद्या जायते प्रादुर्भवति तदा विवस्वतः स्पर्शानुग्रहीतस्यात्मन उभे अहनी कर्ममार्गज्ञानमार्गरूपे तथा च श्रुत्यन्तरं अहश्च कृष्णमहरर्जुनं चेति अत्र निरुक्तं च अहश्च कृष्णं रात्रिः शुक्लं चाहरर्जुनमिति सुदिने इष्टसाधके जायेते इ

त्यर्थः तथा च जीवन्मुक्तिरित्यध्यात्मे अधिदैवते तु स्पष्टोर्थः ततः कारणात् महीजो प्राणाशनिं चक्षुर्दृष्टिद्वेषकर्मतु स्ववशीकृत्य च चक्षुर्विषयशरीरयुः क्षपणरूपः ॥९०॥ मारेति मारायणे स्थैर्यमसाववाप्य प्रतुष्टचित्तोर्कसुतोस्मि शुक्रः ॥ स्वस्यायने चंचलतो [illegible] विधातृरिपोर्यशोदः परत्वात्त्समोस्मि ॥९१॥ असौ सर्पशत्रुः शुक्रः मारायणे मकरायणे उत्तरायणे स्थैर्यं स्थिरगृहत्वं वृषभः शुक्रगृहे स्थिरत्वात् ज्योतिःशास्त्रप्रसिद्धं तदवाप्य प्राप्य अर्कसुते शनेः प्रतुष्टचित्तः प्रीतमना अस्मि शनेर्मित्रं भवतीत्यर्थः अर्कसुतगृहे शनेः रिपुपुत्र्येपि स्वसुखकर्तृत्वमात्रं परं अत एव शुक्रः शुभ इति भावः स्वस्यायने कर्कादिदक्षिणायने चंचलताविधातुः चरगृहत्वकर्तुः तुलाशुक्रगृहे चरमिति ज्योतिःशास्त्रप्रसिद्धं अतोपि रिपोर्यशोदः स्वपरत्वान्नतद्दशावासान्त्स्वफलजननेन तस्यापि क्षणाच्चतरक्षीनः अतः समोस्मि शत्रुमित्रभावरहितो भवतीत्यर्थः अध्यात्मं असौ आत्मशत्रुः शुक्रस्त्वं कुमारायणे ज्ञानमार्गे स्थैर्यं स्वात्मश्रयवर्ममनः संयोगाभावे ज्ञानसामान्याभावस्य सत्त्वे मोरंशीनाजत्रस्वस्यावश्यं पकलात् चलत्वम् अवाप्य प्रतुष्टचित्तश्चक्षुर्विषये प्रीतमनस्कः अस्मि त्वक्कुष्ठो मित्रं भवतीत्यर्थः प्रीतिकर्मतत्कं प्राक् किंच स्वस्यायने चोद्रकर्ममार्गे चंचलताविधातुः ग्रहणातिसर्जनव्यापारवशाद्रिपे

आत्मा:
७५

बु

रत्नसंपादनेनरिपोरपीदोमनसःपरवानस्वस्ययथेष्टप्रवृत्तेर्मनोधीनत्वात् इष्टक्रूरः करःसमोस्ति॥ ये।
दृष्टानी सूर्य चंद्र मंगलबुध बृहस्पतिशुक्र शनीनामध्यात्मे आत्ममनो घ्राणश्रोत्ररसनत्वक् चक्षु
मित्रवैरिसमानत्वप्रयोजककर्मीभ्यागुरुबुधयोरध्यात्मे आरूढारुरुक्ष्वोर्विशेषमाहयुंजे
नयुंजानजनेनवक्रप्रतीतिकर्मात्मकेमोश्रितांगं॥ एकस्तयोः स्वप्रतिकूलवैरीनेदृग्विधोभःस
मभावभाजोः॥ ६४॥ प्रतीतिकर्मात्मकप्रतीतिब्रह्मज्ञानकर्मप्रतिस्मृतिविहितमनुष्ठानेने
आत्मानोहेत्रूपस्यतत्र चक्रद्वादशराशिमंडलेयुक्तेन सिद्धयोगेन बृहस्पतिना आश्रितांगंआश्रि
तपूर्वोत्तरधनुर्मीनगृहस्थित्या आलंबितमंगमकरकुंभरूपोंशोयस्यतत्तथायुंजानजनेनयु
ज्ञानोयोगसाधकोजनोलोकोयस्मात्तेनयुंजानवैराग्यबुधेनाश्रितेपूर्वोत्तरमिथुनकन्यागृह
स्थित्या आलंबितमेषकर्कसिंहरूपोंशोयस्यतत्तादृशंभवति। किंचसमभाजोः समःसूर्यःतत्रभा
वेरतिभजतः मित्रसेवकत्वाभ्यांसेवतेतोतयोर्गुरुबुधयोर्मध्येएकोबुधः स्वप्रतिकूलवैरीस्व
प्रतिकूलोनिज्ञानेभिमतकर्तृत्वेनाभिमतोइंदुर्भौतयोर्वैरीशत्रुर्भवतिअन्योगुरुःइदृग्विधः
ईदृक्स्वप्रतिकूलवैरित्वरूपाविधाप्रकारोयस्यसः नतादृशोनभवतीत्यर्थः सर्वात्ममावात् राम
७५

मो

अथाध्यात्मप्रतीतिकर्मात्मकंसंसाररूपंचक्रयुंजेनारूढेनयुंजानजनेनारुरुक्षुणालोकेनाश्रितेअंगेतक
र्मात्मकेयस्यतादृशंभवतियुंजानजनेनेत्यत्रजनग्रहणंयुंजानानांबहुत्वप्रतिपादनार्थंयुक्तस्तुकश्चिदेवेति
दूरोहंस्वःस्वरूपंस्वदूरोहणं ३ अत्रसोवेदूरोहंयासौतपतिकश्चिदेतांदूरोहतिस्वर्गोवैलोकोदूरोहणंस्वर्गमे
वतल्लोकंरोहतियएवंवेदाअत्रतगच्छतिसयदूरोहणंरोहतीतिब्राह्मणात्मनुष्याणांसहस्रेषुकश्चि
द्यततिसिद्धये॥ यततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतइतिभगवद्वचनाच्च किंचसमभावभाजोः
सम आत्मातस्यभावंसंबंधंदानंदात्मकत्वंभजतः ज्ञानकर्मभ्यांसेवतेतोतयोरारूढारुरुक्ष्वोर्मध्येएकः
आरुरुक्षुः स्वप्रतिकूलवैरीस्वप्रतिकूलानिरसनयोग्यप्राणापत्यानितेषांवैरीनियमनकर्ताअन्यआ
रूढः ईदृग्विधोनभवतिसिद्धयोगत्वात् देहोभयत्रार्थक्रमात् शाब्दक्रमस्यक्तोभवति अग्निहोत्रजु
होतियवागूपचतीतिवत् आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइतिवच्चवदेज्ञानुरो
धात्॥ ६५॥ पूर्वोक्तमयं चयतित [illegible]मंतव्योनिदिध्यासितव्यइतिवच्चवदेज्ञानुरोधात्॥ ६५॥ मइतित
पूर्वोक्तयोःयुंजानइंदोस्तनयोपरस्तु॥ पुक्तस्तथ्यानेतिविचार्यमान्यस्तुरेदपूज्यगुरुमा
मोन्वितागारपतिस्तथोक्तोयुंजानइंदोस्तनयोबुधःतमोन्वितागारपतिःतमोराहुस्तेनान्वितेसंबद्धेतदुच्चगृहरूपेअगारेगि
रामः॥ ६३॥ इंदोस्तनयोबुधःतमोन्वितागारपतिः

उत्तराखंड संस्कृत अकादमी
MEMORIAL

आत्मा: ७६ धुनकन्येतयोः पतिः स्वामी भवति अतएव तथोक्तः तेन प्रकारेण कथितः तथा कथंभूतः ज्ञानः योगसाध
कइति अपरस्तु बृहस्पतिस्तथा नत मोक्षिनागारपतिर्न भवति अतो युक्तः सिद्धयोगइत्युक्तइति विचार्य
विशेषणज्ञात्वा मान्यं बुधस्यापि गुरुत्वात्पूजनीयं इहलोके पुरोहितरूपेण सर्वेषां मंत्रदानादिभिः
सेव्यस्तुरेद्र पूज्य परलोके बृहस्पतिरूपेण देवेशस्य सर्वप्रकारेण माननीय तदुक्तं ब्राह्मणे बृहे
स्पतिर्हि वै देवानां पुरोहितस्तमन्वन्ये मनुष्यराज्ञां पुरोहिता इति मनुष्यराज्ञामिति मनुष्याणां राज्ञां येषां
तेषां मनुष्यराज्ञामिति बहुव्रीहिः गुरुमाश्रयामः ज्ञानप्राप्तये बृहस्पतिसेवा महत्त्व यथा व्यात्मि द्वी
मेनसस्तनयः स्वास्थ्यकारी नापत्यतुल्यं आरुरुक्षुर्योगीयत्तेकत्री चतमोन्विनागारपतिः सोम्य
त्वमालक्ष्येति श्लोके द्योतरी त्वा अज्ञानविषयपालको भवति श्लोकेद्वयमुक्तम्मत्र ज्ञानविषय
पालको भवति अतएव सयुज्ञानद्दत्युक्तः अपरस्तु आरूढो योगी तथा न अज्ञानविषयपालकोन
भवति अतएवमयुक्तइत्युक्तः इति विचार्य मान्ये आरुरुक्षोरपि ज्ञानप्राप्तये सेव्यतां द्विद्धिगणपातेन प
रिमज्जेन सेव्यता ॥ उपरेश्यति ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति भगवदुपदेशात् तद्रूपत्वं अणि राम
मादिभिः सिद्धिभिः स्वोपजोपमाननीयं गुरुं सर्वोपरि स्थिरमाश्रयामः ॥ १३ ॥ किंचे युक्तेतिस्तत्विकी ७६

वृत्तं जगतीन्यथिषुरिस्त्वरगणि इतिलक्षणात चत्वारो रगणाः इत्यर्थः मुक्तं ज्ञानयोः साम्यभाजोस्तयो
र्मित्रवर्यं सदासि चमा हृद्गुरुः ॥ चक्रिणा प्रोक्तं चक्रेण च काधिपतं नमस्यामे दुर्हृदोरंजनं ॥ १४ ॥ मित्र
स्तयः साम्यभाजोः स्तये प्रीत्येरागद्वेषाभाववतोः युक्तमुज्ज्ञानयोः तत्त्वेनाभिमतयोस्तयोर्गुरुबुधयोः स
रसोन्तरंतरंमुदाहर्षं राभित्रवर्यं भूतकाशिश्रेष्ठमाहुर्वदंति तज्ज्ञाः विद्वः न चात्र पुनरुक्तिदोषः स्तर्यस्वेना
दृशागुणावाद्धनकारित्व ज्ञापनेनतात्पर्या तन्ननु बुधस्य गुरुभौमवैरित्वात्कथं साम्यभाक्त्वमिति चेत्सत्य
स्वयं सेवासमये स्त्र्यानुग्रहाद्ज्ञोसंनिवृत्ते बुधस्य साम्यभाक्त्वमिति हृदोनिजमनोरूपस्य दोश्च्युद्र
मसो रंजनं प्रकाशकमेमतावता अथ नोक्त प्रभावं नमस्यामः सापं प्राजह विभिस्तोषयामः निघं दुर्धुअ
त्वनामस्तुनमः शब्दस्य पाद्यः नमोवरिवश्चित्त्रङ्ः कृत्तिज्ञिनिस्तत्रैकरणे दृजिवर्त्मानिनमः शब्दोत्रि
याविशेषे कंपच पद्मानमस्कृमीः कीदृशं प्रोक्तं चक्रेण चक्रिणा धान्यन धन्वानितिवद्भेदे तृतीया प्रक्तेत्या
दिभिरुपसंख्यानमिति वार्त्तिकात् प्रकर्षेण उक्तं द्वितीयोपदेशो बाणि तं द्वादशराशिमंडलं तद्भिन्न
शिशुमारनामकं कालचक्रं तदुत्ते चक्राधिपद्वादशराशिमंडलप्रवर्त्तकं पथाधृष्टोरूपवानपिरू
पान्तरात्पारते असमर्थः कुलालपवत्त्वात्तथास्त्रयोनभवतीतिभावः ननुभीषाऽस्माद्वातः पव

आत्मा: तेभीषोदेतिसूर्यः भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावतिपंचमइतीतिश्रुत्यापरंतेजस्त्वज्ञापनात्
ति एवमधिकारी त्वं तमात्मरूपं भजस्वेदं वेद्यं॥ १०६॥ उपेति उपासकोपास्यकयोर्यदैक्यं स्वरूपमात्मा
पविरोधि विदंति॥ यदप्युपसीत्यत्वमपि प्रसन्नतमास्मि॥ १०७॥ आत्मा यो वेदः स यश्चायं पुरुषे यश्चा
सावादित्ये स एकः स य एवंवित् इत्यात्मकः तं विदन्तीति तद्वेदार्थज्ञाः उपासकोपास्यकयोः उपासको
ध्यात्मरूपः उपास्यकः उपास्यश्चासौ कश्चेति विग्रहः सुखरूपत्वात्सेव्यो मंडलरूपः सूर्यः तयोरैक्यमाद्वि
तीयस्तावत्सादृश्यभानमाविद्यकत्वान्मिथ्येति भावः यत्स्वरूपं मायानुपहितं ब्रह्मा विदन्ति भजे
नाविर्भूतज्ञानचक्षुषा साक्षात्कुर्वन्ति अत्रेयं प्रक्रिया यथा वनवृक्षयोर्जलाशयजलयोर्वा समष्टि एम

८६

६ व्यष्टित्वं दिशः सकलश्रोत्रात्मकत्वात्समष्टित्वं श्रोत्रस्य कर्णविवरावच्छिन्नाकाशत्वात् व्यस्तशब्दकरणत्वाद्व्यष्टित्वं वायोः
६ सकलस्पर्शनात्मकत्वात्समष्टित्वं त्वचो व्यस्तस्पर्शग्राहकत्वाद्व्यष्टित्वं आदित्यस्य जगच्चक्षुरात्मकत्वात्समष्टित्वं चक्षुषो
६ व्यस्तरूपग्राहकत्वाद्व्यष्टित्वं वरुणस्य सकलरसनात्मकत्वात्समष्टित्वं रसनस्य व्यस्तरसग्राहकत्वाद्व्यष्टित्वं अश्विनोः सक

व्यष्ट्यभिप्रायेणैकत्वबहुत्वव्यपदेशः वनं एकमत्र वृक्षा बहव इति एकस्मिन् जलाशये बहूनि जलानि
नि वा तथा आधिदैविकः प्रपंचः समस्तव्यापित्वात्समष्टिरूपः आध्यात्मिकः प्रपंचस्तु व्यस्तव्यापित्वाद्व्यष्टिरू
पः यथा वनेन नष्टे समृद्धे वा वृक्षा नष्टाः समृद्धा वा भवन्ति यथा वा जलाशये शुष्के पूर्णे वा जलानि शुष्काणि पूर्णा
नि वा भवन्ति तथाधिदैविके नष्टे सति सर्वोऽप्याध्यात्मिकः प्रपंचो नष्टः समृद्धे समृद्धो भवति तस्य तदात्मकत्वात् कि
च सूर्यस्य सर्वात्माभिमानात्समष्टित्वं जीवस्य व्यस्तात्माभिमानाद्व्यष्टित्वं चन्द्रस्य सर्वसंकल्पविकल्पप्रकृतित्वात्सम
ष्टित्वं मनसो व्यस्तसंकल्पविकल्पप्रकृतित्वात्समष्टित्वं पादस्य व्यस्तगमनकरणत्वाद्व्यष्टित्वं मित्रस्य सकलपा
य्वात्मकत्वात्समष्टित्वं पायोर्व्यस्तोत्सर्गकरणत्वाद्व्यष्टित्वं प्रजापतेः सकलोपस्थात्मकत्वात्समष्टित्व
उपस्थस्य व्यस्तानंदकरणत्वाद्व्यष्टित्वं ब्रह्मचर्येणावैराग्येण चोपस्थप्रसादे सति तदात्मको देवतारूपः
समष्टिः प्रजापतिः प्रसीदति एवं सर्वत्र यदि योऽपि देवतारूपाः समष्टयः जीवादीनां प्रसादे सति तदात्मकाः प्रसीदन्ति
अत्रेदमपि बोध्यम् अतीतजन्मकर्मभिस्तास्ता देवता आरभ्यारब्धः स्वस्वेतानानि कर्माणि वागादिषु आरण्यादिषु णि
वा ध्यात्मदृशा प्रत्यक्षाणीति अन्यच्च पृथिव्याः स्थावरजंगमात्मकत्वात्समष्टित्वं देहस्य व्यस्तात्मकत्वाद्व्यष्टि
त्वं अन्तरिक्षस्य जसकलांतरालात्मकत्वात्समष्टित्वं देहस्याकाशस्य व्यस्तांतरालात्मकत्वाद्व्यष्टित्वं दिवः सक

७ लघ्राणात्मकत्वात्समष्टित्वं घ्राणस्य व्यस्तगंधग्राहकत्वाद्व्यष्टित्वं अग्नेः सकलवागात्मकत्वात्समष्टित्वं वाचो व्यस्तवचन
७ करणत्वाद्व्यष्टित्वं इन्द्रस्य सकलपाण्यात्मकत्वात्समष्टित्वं पाणेर्व्यस्तग्रहणकरणत्वाद्व्यष्टित्वं उपेन्द्रस्य सकलपादा
त्मकत्वा x ७

आत्मा: ९७

लमष्ट्यात्मकत्वात्समष्टित्वं मष्ट्यो व्यस्तात्मकत्वाद्व्यष्टित्वं एवं पृथिव्यामग्नेः सकलभौमदिव्यौदर्याकर
जेतेज आत्मकत्वात्समष्टित्वं देहे वाच औदर्याग्नेश्च व्यस्तात्मकत्वाद्व्यष्टित्वं अंतरिक्षे वायोर्जगत्प्राणा
त्मकत्वात्समष्टित्वं हृदयाकाशप्राणस्य व्यस्तात्मकत्वाद्व्यष्टित्वं दिवि सूर्यस्य समस्तात्मत्वात्समष्टि
त्वं मूर्ध्नि जीवस्य व्यस्तात्मत्वाद्व्यष्टित्वं तत्र महत्याः पृथिव्याः वेष्टनमंतरिक्षं भवति तद्वेष्टनं द्यौर्भव
ति जलेतीरस्थमनुष्यप्रतिबिंबवत् एतद्रूपेण मध्यात्ममहतो देहस्यांतर्गतं च प्राणमनोबुद्धिरिं
द्रियसमन्वितं अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनं भवति सूक्ष्मांगस्यांतर्गतं कारणशरीरं भवति
तत्र सुषुप्तिसमये जीवः तमः मलिनसत्वाविद्यासूक्ष्मवृत्तिभिरानंदमनुभवति सुषुप्तिस्थितस्य तस्य सु
खमहमस्वाप्सं न किंचिदवेदिष इति परामर्शात् कारणशरीरस्यानंदमयकोशत्वं सूक्ष्मांगस्य
तु विज्ञानमयमनोमयप्राणमयकोशत्रयात्मकत्वं देहस्य तु अन्नमयकोशत्वमेव एतेषां कोशा
(...) वदावरकत्वात्कोशत्वं तत्र देहे जीवस्य इंद्रियवृत्तिकालीनमर्थज्ञानं जागरणं भवति सूक्ष्मां
गे तु इंद्रियवृत्त्यभावकालीनार्थोपलंभः स्वप्नो भवति कारणशरीरे तु सर्वप्रपंचोपरतिः सुषुप्तिर्भवति
तदानीं जीवस्य दुःखमोहयोरप्यनुभवात्कादाचित्क आनंदानुभवः सुषुप्त्यानस्य स्वरूपं स्यात्तु शुद्ध

राम ९७

MEMORIAL

सत्वप्रधानमायोपहितत्वात् सः सर्वदानंदमेवानुभवति तत्र सर्वदा सर्वानर्थनिवृत्तेः तादृशे परमात्मनि
स्वरूपेण यद्यपासनेन महिम्ना जीवात्मनि लयं गते सति सर्वो ध्यात्मिकः प्रपंचो लयं गच्छति तथा हि
मनः चंद्रं प्रविशति श्रोत्रं दिशं प्रविशति त्वक् वायुं प्रविशति चक्षुरादित्यं प्रविशति रसनं वरुणं प्र
विशति घ्राणं दस्रौ प्रविशति वागग्निं प्रविशति पाणिरिंद्रं प्रविशति पाद उपेंद्रं प्रविशति पायुर्मि
त्रं प्रविशति उपस्थं प्रजापतिं प्रविशति एवं पांचभौतिकं शरीरं यथायथं च भूतानि प्रविशति उक्तं च प
उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः ॥ जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथेति तदा स जीवो
मुक्त इत्युच्यते यदा तु प्रारब्धवशाज्जीवति तदा जीवे महात्मस्वरूपसायुज्यं गतवति सति मन आदी
नि इंद्रियाणि भूतानि च व्यष्टिरूपाणि उक्तरीत्या समष्टिभिश्चंद्रादिभिर्देवताभिः सायुज्यं गच्छं
ति ततो देवतात्मकैस्तैर्मनआदिभिर्महात्मस्वरूपात्मको जीवः सर्वभासकः सर्वकारकश्च पर
ष्टा भवति तदा स जीवन्मुक्त इत्युच्यते निरंतरपरमानंदानुभवात् एवं च यथा हृक्षंतरवच्छिन्ना
काशे यावन्नांतरवच्छिन्नाकाशेन आधारभेदात् तयोर्भेदः अनवच्छिन्नाकाश आधारो भवति तथाध्या
त्मिकस्य प्रपंचस्योक्तरीत्याधिदैविकः प्रपंच आश्रयो भवति तस्य च उभयप्रपंचहेतुर्मायानुप

हितं ब्रह्मैव वा अयमर्थः तं भवतीति तस्माज्जीवचैतन्यस्य स्वरूपोपहितं चैतन्यमाधारभूतं भवतीति तस्य वसा
क्षात्त्जीवोपहितं चैतन्यस्य तु परंपरया आधारभूतं शुद्धचैतन्यं ब्रह्मैव भवतीति ज्ञाने सतित्र जगद्भ्रम
नाशात्तदधिष्ठानं ब्रह्मैव भवतीत उक्तं च तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा॥ यावन्न ज्ञायते ब्रह्म सर्वा
धिष्ठानमद्वयमितितस्मात्सर्वानर्थनिवर्तकं तं पसच्चिदानंदलक्षणं ब्रह्मैव सेव्य सेवकयोः स्वरूपमेकं
भवतीति दृत्यमुक्तं रीत्या प्रसन्नो निर्मलप्रकाशरूपस्त्वं आत्मानं चात्वमपि उपासकः पश्यसि ज्ञात्वा त्वमि
एतादृशज्ञानस्य एतादृशोपासनाया अदूरभवत्वाल्लट् प्रयोगः अपिशब्दात्ममादृशउपासकाः पश्यसि
तिगम्यते तथा चश्रुतिः महिज्योतिर्बिभ्रतं त्वा विचक्षण भास्वंतं चक्षुषे चक्षुषे मयः॥ आरोहंतं बृहतः पा
जसस्परि त्वं जीवाः प्रतिपश्येम स्वर्पे ति अस्या अर्थः हे विचक्षण सर्वज्ञ त्वं महिज्योतिः महत्तेजः बिभ्रतं द
धतं अतएव भास्वंतं प्रकाशवंतं चक्षुषे चक्षुषे मयः प्रतिचक्षुष्मत्पुरुषसकलभयवारणात्तस्य स्वरूपं बृ
हतः पाजसस्परि आरोहंतं महद्बलं परिवर्ज्य अपपरीवर्जने पंचम्यपाङ्परिभिरित्यनुशासना[redacted]
[redacted]उच्चतरं तत्वात्वा सेव्य वयं सेवका जीवा अज्ञानाभिभूताः प्रतिपश्येम स्वोद्धाराय प्रतीक्षेमहि हे स्वर्पे
सर्वात्मन् अध्यात्मेतु ज्योतिः चैतन्यं चक्षुषे चक्षुषे सर्वस्मै विषयज्ञानाय आरोहंतं बृहतः पाजसस्प राम

९८

तत्प्रवहद्वायुवशा॰

रिसिद्ध प्राणायामाभ्यासवशात् मूर्द्धानं प्रति ऊर्ध्वं तं वयमारुरुक्षवः जीवाः जडानां देहेंद्रियमनोधियां चै
तन्यसंपादकाः हे स्वर्पे भविष्यत्सर्वात्मना मवलंब्य संबोधनं त्वा गायत्र्युपासनमहिम्ना सर्वात्मानं प्रतिपश्ये
मद्रष्टु मिच्छेमेति एवमधिकारीत्वं तमात्मस्वरूपं भज वेदवेद्यं॥१०७॥ संप्रत्यधिकारिणः शिष्यं मत्वा सेवा सा
धने प्रवर्तयन्नत्रा भियुक्तं प्रवृत्तिं ज्ञापयन्नाशास्ते द्वाभ्यां एकाग्रेति एकाग्रचित्तः शुचिरर्घ्यपाणिः
सेव स्वसेवामह आत्मस्वरूपं॥ स चेद्भवत्पूर्णकलं मनो नः करोतु संसारनिशि प्रसन्नः॥१०८॥ एकाग्र
चित्तः समाहितमनाः शुचिः बाह्याभ्यंतरशुद्धिमान् अर्घ्यपाणिः अर्घ्यीपूजाहं हविरादिद्रव्यं स्वर्पे प्रीत
येसु क्षेपणाज्जलं च पाणौ हस्ते यस्य सः त्वं आत्मस्वरूपं आत्मसदृशपरप्रेमास्पदं स्वरूपं सेव स्व अनुदि
नं स्वर्पो ज्योतिर्ज्योतिः स्वर्पः स्वाहेति मंत्रेण वा स्वर्पाय स्वाहेति मंत्रेण वा होमेन स्वर्यीपुनमदृतिमंत्रेण गंध
पुष्पनैवेद्य समर्पणेन च अनुरात्रिं तु स्वर्पं बुद्ध्वैव आदित्यो वा अस्तं यन्नग्निमनुप्रविशतीति श्रुतेः
अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति मंत्रेण वा अग्नये स्वाहेति मंत्रेण वा होमेन जलेन क्षेपणेन च पूजयत
पश्चोपस्थानेड पन्वाग्नेर्दिवार्दिवे दोषावस्तर्धिया वयं॥ नमो भरंत एमसीति मंत्रे अग्निशब्देन स्वर्पं सवा
भिधीयते न चात्र लक्षणा वृत्तिः शंक्या आप्तवाक्येन शक्तिवृत्तिनिश्चयात् मंत्रार्थ स्तु हे अग्ने अग्न्या

आत्मा: ९९

त्मक अग्निप्राप्य त्वा सूर्यपरिवेविद्विवे प्रत्यहं हे दोषावस्तः सायं प्रातः धिया कर्मणा ज्ञानेन च वयं सेवकाः नमो
भरंतः पयम् आ इहि उप इद्ध्यमानयंतः हे अग्ने होभग्नेऽहं रसीति वार्तिकेन हत्वो हस्य भत्वं किंचन नमस्कारं कु
र्वीनः न चात्र भत्वानुसंधानं भज्ञ भरणाद्रजि भादिधातुपाठात् त्वा त्वामेव उपेमसि समीपं आगच्छामे
इति भृञ्धातुपाठात् त्वा त्वामेव उपेमसि समीप ७ सेवामहे त्वमात्मा अवयमेव मे व पूजयामः स
सन्तोसेव्यः आत्मसूर्यः स्वतेजसा चंद्रवत् यथा स्वसेवकं चंद्रं राकापारात्रो पूर्णकलं समग्रप्र
भकं न वा न तथा नः सूर्यसेवकानाम् अस्माकं मनः अन्तः करणं संसारनिशि निद्रात्रिस्तत्सदृशे
नेकभयदे संसारे पूर्णकलं सर्वावभासकं अत एव प्रसन्नं कामादिषड्वैरिक्षोभाभावान्निर्मलं
करोतु कृत्वा विषयतया प्रविशतु तेन एव कृतार्था वयं स्यामेति भावः दूरमत्रा व धे परवग्रासे चंद्र
स्य पृथिवीमंडलेन समस्तसूर्य व्यवधाने प्रकाशाभावो भवति तथा नत्र त्वा नो सर्वपोषकसूर्यव्यवहि
तानाम् अग्निघातादिपित्रादिलोकानाम् भयं भवत्येव तदानीं विहितं पुत्रादिभिर्दत्तम् आद्धं तत्रसुत्रोपस्थि
तं भवति तेन तेषाम् अतिसुखं भवति पृथिव्यास्तु सूर्य सर्वग्रहेपि सूर्यच्छादकचंद्रबिंबस्याल्पत्वात्
वलयाकारसूर्यदर्शनात् सर्वदा सूर्यदर्शनाभावाभावेपि भूमिष्ठानाम् अस्मदादीनाम् अचिरेण पृथिवी हरि राम ९९

विबेन सूर्यव्यवधानात् रात्रिर्भवति न तस्मादार्द्रिं न भवति तस्मात् अस्मदपेक्षया अचिरेण चंद्रलोकस्थानां
शुक्लाष्टम्या प्रदोषो भवति पूर्णिमायाम् अर्द्धरात्रः कृष्णाष्टम्यां दिने दर्शे मध्याह्नः बहुकालसूर्यदर्शनेन भ
याभावात् चंद्रलोकं पञ्चाशन्ने सत्यो मिश्चकर्म ठजयति ततऊर्द्ध्वः सूर्यलोकः सर्वदा सूर्यदर्शनात् कु
तो भयम् ४ तं लोकं गायत्र्युपासनमहिम्ना ग्निः प्राप्नुवंति न तेषु नरावर्जते तस्मात् ज्ञेत्र वगमेन यत नोप
मिति तथा च श्रुतिः अनृणा अस्मिन् अनृणाः परस्मिन् तृतीये लोके अनृणाः स्याम॥ ये देवयाना उत पितृ
याणाः सर्वान्पथो अनृणा आक्षियेमेति ऋणमाधमर्ण्यं तेन रहिता अस्मिन् भूलोके स्याम विद्याध्ययने
न ऋषिऋणान्मुक्ता भवेमेत्यर्थः तथा परस्मिन् पितृलोके स्याम प्रजोत्पादनेन पितृऋणान्मुक्ता भवे
मेत्यर्थः तथा तृतीये लोके देवलोके स्याम यज्ञकरणेन देवऋणान्मुक्ता भवेमेत्यर्थः यद्वा भूयास्मेति
व्याख्येयं एतदृणत्रयमुक्त्या एतेषु लोकेषु प्रशस्यते प्रेत्य तु पितृलोकमेव प्राप्नोति कर्मणा पितृलो
को विद्यया देवलोक इति श्रुतेः उदानीं सर्वाः भयरहित्याभिन्नेन परब्रह्म प्राप्नुतं सत्योपासकं प्रत्याह ये देव
यानाः यावन्तो देवलोकमार्गाः अर्चिरादयः उत पितृयाणा अपि पितृलोकमार्गाः धूमादयः सर्वान्पथः
तावन्तो मार्गान् अनृणाः वर्णाश्रमधर्माः अयदेहेंद्रियमनोधीभिन्नाः परमार्थतः सच्चिदानंदरूपा वयं

आत्मा: १०० आक्षिपेम आत्मत्वात् समंतात् अभिव्याप्याश्रयभूतामवेमेत्यर्थः अथाध्यात्मेएकाग्रचित्त अ
न्तब्रह्मरसो विष्णुभोक्तादेवोमहेश्वरः प्रीयतां भगवानीशः परमात्मासदाशिव इति अत्रै अध्यो
अति च भूतानि तस्मादन्नं तदुच्यत इति श्रुतेः अन्तर्योग्यतत् अन्नमाहुः प्रजननं प्रजानामिति श्रुतेः
जोगुणोपहितं ब्रह्मस्वरूपं स्रष्टृ भवति तत्र रसः प्रीतिविषयः सत्वगुणोपहितो विष्णुरूपो जीवनं भ
वति तस्य रसवत्तोत्र स्य भोक्तासंहारकः देवः योसावादित्ये पुरुषः सोसावहमिति श्रुतेः दिवु क्रीडा
स्तुति विजिगीषा व्यवहारद्युतिमोदमदस्वप्नकांतिगतिष्विति धातुपाठात् एताव द्गुणकः तमोगुणोपहितः
त एव महेश्वरो रुद्ररूपः सर्वत्र समर्थो भवति किं च तस्याशात्र भोजनेन भगवान् ऐश्वर्यस्य समग्रस्य
धर्मस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा उक्त भाग्यवान् कृष्णः प्रीयतां प्रीतो भ
वतु उक्त प्रीत्यात्मकौ विश्वः स्थूलशरीराभिमानी व्यष्टिरहं तादृश कर्मणा तादृशभाग्यवान् भवि
ष्यामीति तात्पर्यं तथा ईशः प्रजापतिर्लोकेशः प्रीयतां समष्टिहिरण्यगर्भः प्रीत्यात्मकस्तैजसः सू
क्ष्मशरीराभिमानी व्यष्टिरहं तादृशस्तस्थो भविष्यामीति तात्पर्यं तथा परमात्मा कामादिशत्रुसंहर्ता
शंकरः प्रीयतां समष्टिः शंकरः प्रीत्यात्मकः प्राज्ञः कारणशरीराभिमानी व्यष्टिरहं तादृशगुरुः राम १००

नास्य स्यादन्नजो व्याधिर्विषमप्यतामियात् ॥ विषं च पीत्वैतत्सूक्तं जपेत विषनाशनं ॥

रेताभविष्यामीति तात्पर्यं तथा सदाशिवः स्वं त्रिपुरभेदः स तिपरमानंदस्तुरीयः प्रीयतां तादृशगायत्री
तुरीयपदपरमानंदप्रीत्यासस एवाहं अविद्याविनिर्मुक्तः परमानंदस्वरूपो भविष्यामीति तात्पर्यमित्य
र्थः एवं स्थिरमनाः शुचिः शुचिः शोचेन ज्वलति कर्मणा इति निरुक्तात् शोचेर्ज्वलनः स्नानं
पितृन्विष्णुपतिष्ठेत नित्यमन्नमुपस्थितं ॥ पूजयेदशनं नित्यं भुंजीयादविकुत्सयन् ॥ नोवाप्यनं भुंजीत स॰ ४
नाशुचिर्न जुगुप्सितं ॥ एषा च पूजयेच्चैव जुहुयाच्च शुचिः सदा ॥ स्तुदयनौ स्तिकिंचित्प्राप्यान्नजं व्या
धिमाप्नुयादित्यभिधानात् अर्घ्यपाणिः आत्मसुखाहारस्य स्निग्धस्थिरहृद्यभगवदुपदिष्टान्नहं सः
त्वं सेवस्व आत्मरूपं रूपसदृशं सेव्यमात्मानं संतोषयन् तु नेप चेदन्नमात्मनइति निषेधादात्मार्थं प
चनस्य पापहेतुत्वात्कथमात्मनः संतोषः स्यादिति चेन्नैवं केवलशरीरपोषणार्थं पचनस्यैव पापहेतु
त्वात् मोघं मन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ॥ नार्यमणं पुष्यति नो सखायं केवलाघो
भवति केवलादीति श्रुतेः अर्यमणं स्वयंतोद्भूतीः प्रजोपत्यादीश्च सेवामहे वयमेवम्भे वसंतोषयामः
उत्तराद्व्याख्यानं उपत्वाग्ने इति मन्त्रार्थत्वत्रेहे अग्नेजाठराग्न्यात्मक पुनर्म आत्मा पुनरायुरागात् पुनः प्रा
णाः पुनराकूतमागात् वैश्वानरो रश्मिभिर्वावृधानः अन्तस्तिष्ठत्वमृतस्य गोपा इति श्रुतेः आकूतम

MEMORIAL

आत्मा: १०१ मित्रेतेजात्तराग्निप्राप्यवाश्चन्नेनप्राणाइत्यादिश्रुतेः शेषंसमाने॥१०८॥ किंचदोषांतइतिदोषांतेजम
सिविनाशितेप्रसन्नः स्वात्मादिशतुसमस्तवस्तुजातं॥ संपाद्यप्रयतहृदस्तदर्घ्यमिष्टंभद्रेवा विगतभ
याश्चरंतुभूमौ॥१०९॥ दोषांतेदोषारात्रिः तस्याअंतेऽथः कालेतमसिअंधकारेविनाशितेकेनेत्यपेक्षाया
संनिहितत्वादुषः कालेनैवध्वंसंप्रापितइत्यर्थः प्रसन्नः नीहाराभावेनिर्मलः स्वात्मा स्वयंएव आत्मेस
मस्तवस्तुजातंसकलार्थसमूहं दिशतुदर्शयतु किंचभद्रेवाः भुविदेववन्मान्याब्राह्मणाः प्रयतहृदः शुद्ध
चित्ताः संतः इष्टंस्वर्यप्रीतिकरंतदर्घ्यंसूर्यार्घ्यंदत्तश्यकंसंध्यासमयेजलोत्क्षेपणंसंपाद्यकृत्वा तद्दुहवा
एतेब्रह्मवादिनः पूर्वाभिमुखाः संध्यायांगायत्र्याभिमंत्रिता आपऊर्ध्वं विक्षिपंतितानएता आपोवज्री
भूत्वा तानिरक्षांसिमंदेहारुणेद्वीपेप्रक्षिपंतीयत्प्रदक्षिणंप्रक्रमंतितेनतया पाप्मानमवधून्वंतीतिश्रुतेः भूमौ
भूतलेविगतभयाः विहितसर्वकर्मयोग्यत्वात् तथापीयसौममकर्मफलंकथंभविष्यतीतिचिंतारहिताः सं
ध्याकर्मणासर्वपापक्षयात् संध्यामुपासतेयेतुसततंसंशितव्रताः॥ विधूतपापास्तेयांतिब्रह्मलोकंसना
तनमितिवचनात् चरंतुगच्छंतुवाभक्षयंतुवाफलस्नेहेनकर्मकुर्वंतुवा अथवा ध्यात्मदोषाः सत्त्वरजस्तमो
गुणाः तद्गुणीमायातस्याअंतेतत्त्वज्ञानेनतमसितत्त्वाज्ञानेनाविनाशितेसति[illegible]स्वात्मास्वयंसद् राम १०१

शआराध्यः आत्मासमस्तंपरिपूर्णंवस्तु आत्मस्वरूपंसच्चिदानंदात्मकंजातंमनसिप्रादुर्भूतंदिशतुकिंच
भद्रेवाः मुविदेहेद्योतमाना निरिंद्रियाशिप्रयतहृदः प्रयत्नेनोनिवृत्तेहृत्सहचारिमनः येषांतानितादृशा
निसंतिइष्टमात्मप्रीतिकरंपरिणामसुखत्वात्तदर्घ्यंतस्यात्मनः पूजासंपादकंरेतउत्थयनंसंपाद्यनिरंतरं
कृत्वा ऊर्ध्वरेतस्काएवभूमौ सत्सुविषयेपिदेहेविगतभयाः ऊर्ध्वरेतस्कत्वादेवमरणादिभयरहितानिमलाप
तेबलंपुंसांशुक्रायत्तंचजीवितमितिवैद्यकशास्त्रात् चरंतुविषयानाक्षुंठत्कामादिबाधाभावात् दुःखाभा
वइतिभावः॥१०९॥ दुःखदुर्गकर्तृमिदंसर्वदारेहशोषणं॥ आत्मस्वरूपेतवेदाद्याविभक्तिरस्तुसंतता
॥५॥ ॥इतिकालोपनामकाहिताग्निविश्वनाथभट्टात्मजगोविंदभट्टकृत आत्मार्कबोधे आत्मार्कोपा
सनकथनंनामपंचमउपदेशः॥ ॥इदानींगुरुशिष्यसंवादमुपसंहरन्शिष्यस्यकृतार्थत्वमाह इतीतिइ
तिवदतिगुरौ सशिष्यवर्यः प्रसन्नः सपदिविगतशंकः इजयामाससर्वं॥ नियततरगीताभक्तिः प्राप्तबुद्धिः स
मंताद्विततनमसिनष्टेस्वात्मरूपंददर्श॥११०॥ इत्युक्तप्रकारेणस्वोहितोपदेनशेस्वपरमार्थसाधनेप्रवृत्ति
करणादात्मीयेगुरौ अनुल्लंघनीयवचने उपदेशं दिशति आत्मस्वरूपमहिमानंकथयतिसतिवर्तमानकालनि
देशात् अनुपरतेसतीतिगम्यते यस्यचभावेनभावलक्षणमितिसप्तमी सपदितत्कालं उपदेशानंतरकालमेव

आत्मा: विगतशंकः प्रध्वस्तसंदेहः अत एव प्रसन्नः निर्मलचित्तः शिष्यवर्यः शिष्येषु उत्तमः श्रेष्ठः स्वल्पश्रवणेनब
१०२ हुज्ञत्वात् श्रेष्ठः सूर्यं श्रुतप्रभावं पूजयामास गायत्र्युपासनप्रकारेण सिषेवे ततः नियततरेण भक्तिः नि
यता स्थिरा ततः रोगो संसाररोगः भुजरोगाय भक्तेः सूर्ये भक्तिः रोगराध्यबुद्धिर्यस्य सः अत एव प्राप्तबुद्धिः उत्पन्नत
त्वविद्यः ततः एव समंतात् विततमसि तमस्तिनद्दे जीवचैतन्यस्य मलिनसत्वप्रधानाविद्योपाधिकत्वात् सर्वत्रा
ध्यात्मिके प्रपंचे गुरुत्वात् आवरकत्वात् सुव्यापके अज्ञाने आच्छादने ध्वस्ते सति स्वात्मरूपं ददृशे स्वस्याध्यात्मि
कप्रपंचस्यात्मत्वं आत्मा आप आधिदैविकप्रपंचः सूर्यश्च तेन रूप्यते ज्ञायते ततः सच्चिदानंदलक्षण
ब्रह्मज्ञानवान् कृतार्थो बभूवेत्यर्थः अत्र जितेंद्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयात् प्राप्यते॥
गुणप्रकर्षे राजतो ऽनुरज्यते जनानुरागेण भवति संपद इति वृतकारणमाला ऽलंकारः॥११०॥ इष्टानीत्यस्मि
न्नपि सिद्धिमाशासानः साधनसंपत्तिं विनिवेदयति तथेति तथा ऽस्मभ्यं ज्ञानं दिशतु तरणिः स्वात्मविषयय
तो गच्छेन्मोहतमइव विनाशं द्रुततरं॥ वयं भूयो भूयो नियतमनसः शुद्धान्तवो नमस्कुर्मो नित्यं निपततभया
दुःखजलधौ॥१११॥ तरणिः सूर्यः तथापूर्वोक्तं संसारमुक्तिजनकं स्वात्मविषयं स्वस्य सूर्यस्यात्मा जगत
धोरुक्तः द्वादशप्रकारकः सच्चिदानंदलक्षणं स्वतत्वाप्तिं ज्ञानं चैतन्यं अस्मभ्यं गायत्र्युपासकेभ्यो ऽ) राम
१०२

वेभ्यो दिशात्तु ददातु ननु किंतद्ज्ञानं तत्राह यतो यस्माद्ज्ञानात् तमइव यथा सूर्यप्रकाशात् बाह्योंधका
रो विनश्यति तथा मोहः अहंकरोमीत्याद्याकारकः स्वात्मीज्ञानं चाभ्यंतरः द्रुततरं विनाशं गच्छेत् शीघ्रमे
व ध्वस्तो भवेदित्यर्थः समष्टिः सूर्यस्वसर्वं करोति भवति चेति निश्चयात् तथा च श्रुतिः विश्वतश्चक्षुरुत
विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्॥ संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एक इति
देवः समष्टित्वात् द्योतमानत्वाच्च सर्वेषां प्रत्यक्षः एकः अद्वितीयः सूर्यः व्यष्ट्यभिप्रायेण विश्वतश्चक्षुः
जीवनेत्रैः सर्वत्र दृष्टिर्यस्य सः तथा उत विश्वतोमुखः अपि जीववदनैः सर्वत्र भोजनं यस्य सः उतेत्यने
न विश्वतः श्रोत्रः विश्वतो घ्राणः विश्वतस्त्वगिति गम्यते तथा विश्वतोबाहुः जीवहस्तैः सर्वत्र कर्म यस्य
सः तथा उत विश्वतस्पात् अपि जीवचरणैः सर्वत्र गतिर्यस्य सः उतेत्यनेन विश्वतोवाक् विश्वतः पायुः
विश्वत उपस्थ इति गम्यते एतादृशः सन् बाहुभ्यां बाहूक स्थानीयबाधत आभ्यां कर्मणी इति निरुक्तो
तसर्वकर्मप्रवर्तकाभ्यां तेजोमयजलमयमंडलाभ्यां [illegible] पतत्रैः किरणैः संधमति द्यावाभूमी उभौ लोकौ
प्रकाशयति किं कुर्वन् संजनयन् रात्रौ दुस्थान् ज्योतिर्मयान् लोकान् संपर्कदोषेण पतादिवानु भूमिष्ठा
न् लोकान् सम्पर्के चेतयन् व्यष्ट्यभिप्रायेण तु बाहुभ्यां बुद्धिमनोभ्यां पतत्रैः इंद्रियैः द्यावाभूमी संधम

आत्मा: १००३ तिजयतिकिंकुर्वन्संजनयन्विहितानिकर्माणिसाधयन्यद्वाविहितैःकर्मभिरुभोलोकाद्वुत्पारय
न्नित्यर्थः यतःदुःखजलधौदुःखाद्दुःखप्रचुरःसंसारःसएवजलधिर्दुस्तरत्वात्समुद्रः तस्मिन्निपत
नभयात्तनीचेगमनचिंताद्दुःखात्त्रातएवशुद्धतनुवःपथ्यमह्नौरोरोगशरीरःयद्यपिसर्वाशुचि
निधानस्यकृतप्रस्यविनाशिनः॥शरीरकस्यापिकृतेमूढाःपापानिकुर्वतेइतिअत्यंतमलिनोदेहो
देहीचात्यंतनिर्मलः॥उभयोरंतरंज्ञात्वाकस्यशौचंविधीयतइतिचतथापिशरीरस्यचित्ताक्षोभकत्वेन
शुद्धत्वमिहाभिप्रेतमितिबोध्यंतदुक्तंपश्चात्तरमालायांकःपथ्यतरोधर्मःकःशुचिरिहयस्यमानसंशुद्धं॥कःपंडितोविवेकीकिंविषमवधी
रितागुरवइतिअतएवनिपतनमनसःअप्रमत्तचित्ताःतथाचश्रुतिः।विमाहात्वाप्रमनसःसुचमसःप्रजावंतोअनमीवाअनागसः
॥उद्यंतंत्वामित्रमहोदिवेदिवेज्योग्जीवाःप्रतिपश्येमसूर्येतिअस्याअर्थःसर्वाणिदिनानित्वांजहीहसप्रमत्तचित्ताःप्रदीप्तबुद्धयःपु
त्रपौत्रादिसंततिमंतःभृत्यादिजनवंतःप्रधर्मैश्वर्यवैराग्यज्ञानसंनतिमंतोवाअ मीवंसंचितंपापंआगःक्रियमाणंपापंताभ्यांरहिताः
जीवात्रधाप्यविद्योपाधिकावर्ययाअपात्मकाःहेमित्रमहःमित्रंसर्वेषांसकलकार्यसंपादकंबाह्यांतरमलनाशकंवामहस्ते
जोयस्यसःतादृशप्रभावसूर्यदिनेदिनेउद्यंतंत्वाचिरंप्रतिपश्येमअविद्योपाधिनिरस्तयेध्यायेमेतिज्योग्जीवारतिवायोजनीयं
एतादृशावयंसेवकाःभूयोभूयःपुनःपुनःत्वमस्कुर्मःतरणिंसर्वोत्कर्षेणभावयामः ॥११॥ इहानीविनेकर्णापत्यतोविचहुर्वारदं श्रा॰
ज्योतिर्हृदयआदित्यंपत।विमेमनस्ययतिद्धूरअधीःकिंस्विद्वक्ष्यामिकिमुनूमनिष्येमेकर्णाविपतयतःममश्रोत्रेअनात्मविषया १०३

अतिविपरीतेगच्छतःममचक्षुर्दृष्टिर्वितथाविपरीतंश्रोत्रापनमिसुखमस्तीत्यर्थःननुमनसोऽभ्यंतर
त्वात्तत्ज्योतिर्ग्राहकंस्यादित्यतआहमेमनःविचरतिममांतःकरणंविपरीतंइंद्रियाधीनंसत्तगच्छतिअत
एवदूरआधीःआत्मानिविप्रकृष्टदेशेसर्वत्रप्रसरणशीलाबुद्धिर्यस्यतादृशोहंकिंस्विद्वक्ष्यामिस्वितस
देहेआत्मज्योतिर्विषयकंकिंवदिष्यामिनकिमपिसाधनाभावात्तस्त्वंचकिमुनूमनिष्येउपरदूरणा
र्थःतथाकिंवाचिंतयिष्यामिसाधनाभावादितिअत्रायमर्थविचारेणनइंद्रियाणिप्रमाथीनिहरंतिप्रसभं
मनइतिभावहुत्तमपीवधारणेनचक्षुरुनिग्रहेमनोमन्वानत्रिश्चलंकर्तुंसकलार्थप्रदेआत्मार्केऽष्टभिः
॥१११॥ श्लोकैःप्रवर्तमिस्युपदायितिपराधेच्छाधीनेभवतिसकलंवस्तुजगतिस्थिरप्रज्ञाएवंहृदयनिगदंतिश्रु
तिविदः॥अतस्त्वंप्रेक्ष्यत्वंशरणमनिशंस्वपरिहृठंभ्रमंत्वक्त्वासर्वंमहतिसुचिरंतिष्ठमहसि॥११२॥
हेहृदयहेमनःजगतिभूलोकेश्रुति[illegible]विदःरथःक्षोणीयंताशतधृतिरगेंद्रोधनुरथार
थांगेचंद्रार्कौरथचरणपाणिःशरइतिदिधक्षोस्तेकोयंत्रिपुरतृणमाडंबरविधेयैःक्रीडंत्योनखलु
परतंत्राःप्रभुधियःहेईशत्रिपुरतृणंत्रिपुरेतृणाभिवानायासेनदग्धव्यतारिधक्षोःदग्धुमिच्छो
स्तेतवाडंबरविधिःमहासामग्रीसंपादनप्रयत्नःइतीयंकोयंकिमर्थोयंदुनातिकिंक्षोणीभूमिः

वे

आत्मा: १०४ रथः स्यंदनो भवति शतधृतिर्ब्रह्मा यंता सारथिर्भवति अगेंद्रः पर्वतराजो हिमालयो धनुश्चापं भवति चंद्रा
र्कौ सोमसूर्यबिंबे रथांगे चक्रे भवतः रथचरणपाणिश्चक्रपाणिर्विष्णुः शरो बाणो भवति उक्तमर्थं दृष्टां
[illegible] पतिः खलु निश्चयेन प्रभुधियः समर्थस्य बुद्धयः कर्माणि च विधे
ये रथरूपकर्तव्ये रूपकरणोः क्रीडंत्योरसमारणाः संति न परतंत्राः नैवोपकरणाधीनाः संति स्वतंत्रत्वात्तव्यष्ट
भिप्रायेण तु त्रीणि पुराणि स्थूलसूक्ष्मकारणशरीराणि तेषां भेदकमात्मा त्रिपुरं शरीरत्रयं स्वल्पत्वात्तृणामिव
ततरिपुस्तोः भेत्ताभिक्षोः यदहस्त्वत्राधिष्ठानप्रमितिर्निबंधनः तेइतित्र्याउंबरविधिः कोऽपि भवति इतीति किं क्षो
णीतनुः रथो भवति शतधृतिर्गुरुः रसनं च यंता भवति अगेंद्रः प्रमाता धनुर्भवति चंद्रार्कौ मनोबुद्धी रथांगे
भवतः रथचरणपाणिः सोमसूर्यबिंबे कर्ममार्गज्ञानमार्गाभ्यां उपास्ये मनोबुद्धी तेथेव शोधनीये सेउमे रथ
चरणे पाणिगोणपञ्चुपासनमहिम्ना वशवर्तिनी येन सः सत्वगुणः शरो भवति स्वयंप्रकाशसामर्थ्यात् शेषव्या
ख्यानार्थं एवं श्रुतार्थज्ञाः यदुः सप्त युंजंति रथमेकचक्रमेको अश्वो वहति सप्तनामा। त्रिनाभिचक्रमज
रमनर्वं यत्रेमा विश्वा भुवनाधितस्थुः विषुवान्मेषतुलात्मकः तद्वृत्तेमध्यमं ततउत्तरतस्त्रीणि वृषमि
थुनकर्काख्यानि वृत्तानि ततएव विषुवद्वृत्तात् दक्षिणतस्त्रीणि वृश्चिकधनुर्मकरात्मकानि वृत्तानि राम १०४

तत्र मकरवृत्तमारभ्योदक्संस्थेषु कुंभमीनमेषवृषमिथुनकर्केषु तथा कर्कवृत्तमारभ्य दक्षिणासंस्थे
षु सिंहकन्यातुलावृश्चिकधनुर्मकरेषु मासेमासे सूर्यः उदगयने दक्षिणायने यथाक्रमं भ्रमति तथा च
विषुवद्वृत्ते मध्यमं तदुभयतस्त्रीणि त्रीणि एवं सप्तानि वृत्तानि ज्योतिःशास्त्रे गोले प्रसिद्धानि तथा च मुख्या
दिसप्ताश्वा इति भूलोके सप्तवृत्तस्थस्य सूर्यस्यैव सप्ताश्वत्वमिति ज्ञेयं तानि सप्तवृत्तानि एकचक्रे एकंस
र्यबिंबत्वात् आध्यात्मिकचक्रं तु तन्मात्रबिंबत्वात् लीकं भवति चक्रं द्वादशारूपात्मकं यस्मिन्नंतरं धप्र
वहवायु संयुज्जति संवध्नंति सप्तनामा सप्तानि [illegible] सप्तानां नामानि व्याहृतिरूपाणि
नामानि स्थानानि [illegible] अभिधानानि च य
स्य सः एकः समष्टित्वात् बिंबत्वात् मुख्यः स्वतंत्रत्वात् सहापश्च अश्वः सूर्यः अश्वः कस्मात् अश्नुते ध्वा
नं महाशनो भवतीति वृत्तिनिरुक्तात् अथ योसौ तपति एषोश्वः श्वेतो रूपं कृत्वाश्वाभिधान्यपिहिते
नात्मना प्रतिचक्रम इमं वो नयाम इति नित्यब्राह्मणात् अश्वः आदित्यात् इमं सूर्यं प्रतिनयामः अंगिरसो वे
यमनेन यज्ञेन प्राप्नुयामश्चेति तु आदित्यानूर्दृदश्न पदा सूर्यभावं प्राप्तान् अंगिरसः प्रतीप्तस्वरूपाः पं
गारा अंगारा ते स्मे अंगिरसोऽभवन्निति ब्राह्मणात् वेदितव्यं क्रामति किं दधत्याह त्रिनाभिचक्रं चेत्यादि पश्चात्वा
दशमासा एकानाभिः आवर्तनादपश्चात्वा रोहतीपामाग शीर्षी रयश्वत्वा रस्तजीया एतेन त्रिनाभिचक्रमत

आत्मा: १०५

संवत्सरो ग्रीष्मो वर्षा हेमन्त इतीति निरुक्तं व्याख्यानं एवं विति सो नाभयो यस्मिन् ततद्द्वादशाराख्यात्मकं
कीदृशं अजरं विनाशरहितं जरारहितं जीर्यते स्तुतिकर्मणः स्तुतिकर्मणः इति निरुक्तात् जरा स्तुतिर्भवति
सर्वाश्रयत्वात् सर्वप्रमेयत्वाच्च स्तुतिरहितं च पुनः कीदृशं अनर्वं अर्वतो ऽश्वाः तद्रहितं लोके अश्वाः रथस्य
केकर्षन्ति तद्धि इदं चक्रं न भवति रथिनः एवं वाहकत्वात् अत एवाग्रं एको अश्वो वहति सप्तनाम
ति अनर्व मित्येतेव निपातनात् रकारान्त पदं यत्र सर्वाधिष्ठाने द्वादशयष्पात्मके कालचक्रे इमा
विश्वा भुवनादृश्यानि स्थूलशरीराभिमानवन्ति भूतानि अधितस्थुः तदाश्रितान्येवासन् तस्य विव
त्वात् व्यष्ट्यभिप्रायेण तु संवत्सरात्मकाः शोणितास्थिस्नायुमज्जारेतांसि एकचक्रे एकपाद उपासनात्तन्म
फलभागिनः प्राणमुख्यबुद्धिमनोदेहेन्द्रियमंडलं यस्मिन्नं प्राणाः भुंजन्ति सप्त नामाग्नेः अन्नं जिघ्रन् पश्यन् श्रय
न् स्पृशन् भुंचन् आनंदनं एवमात्मकाभिधानः एको गायत्र्युपासनाजन्यमोक्षभागिनः प्राणमुख्यः अश्वो
जीवो वहति किं वहति तत्राह त्रिनाभि चक्रं त्रिस्त्रः पित्तश्लेष्मवातात्मिका नाभयो नाड्यो यस्मिन् बुद्धिम
नोदेहेंद्रियमंडले कीदृशं अजरमनर्वं च अत्रैव देहे पूर्वं इमा विश्वा भुवनाधितस्थुः यत्र बुद्ध्या
दि द्वादशमंडले तथा च संख्यासूत्रं समदशैकं लिंगं व्यक्तिभेदः कर्मविशेषात् तदधिष्ठानाश्रये
तस्य कर्मणो ऽधिष्ठानमाश्रयभूतं लिंगशरीरं तस्याधारभूते एवं वेदार्थज्ञाः आत्मा किं नियत बुद्ध्यः प
देहेन्द्रियाणि द्वादश इति सप्तदश बुद्ध्यादयो द्वादश पंचतन्मात्राणि च तदधिष्ठानाश्रये २ राम १०५

अत एव स्थिरप्रज्ञा: १

MEMORIAL

डिताः एवमनेन प्रकारेणानिगदितविशेषेणाक्षथयंति एवं कथं सकलं संपूर्णं गुणवत्सु वस्तु पुत्रादि
रुद्धादि च यदीयेच्छाधीनं भवति यस्यात्मार्कस्य पचिकीर्षा चरियाल्लिप्सा च संजिहीर्षा च तत्परं तेत्र
स्तिनथाच श्रुतिः यद्दघकश्च वृत्रहन्नुदगा अभि सूर्य ॥ सर्वं तदिंद्र ते वशे इति वृत्रहन् वृत्रं तमो मेघं च
व्यष्टौ तु अज्ञानं कामं च हतवान् तत्संबुद्धिः अतः कारणात् त्वमेव स्वेस तत् त मात्मार्क शरणं रक्षकं अविद्य
मानाविशास्वात्मादर्शनरूपाय स्यनं स्वहितकारिणां तर्क परोपिहितवान्नु धुर्वं धुरप्यहितः परः ॥ अहि
तो देहजो व्याधिर्हितमारण्यमौषधमिति पारिवृढं समरिद्ध्य प्रभो परिवृढ इत्यनुशासनात् प्रेक्ष्यय थार्थं ज्ञा
त्वा सर्वं भ्रमं अन्यत्र सर्वत्र विषयेषु प्रसरणात्यक्तान् विस्मरन्पन्यथः महीनः सर्वान्कृत्वेमह सिप्रका
शरूपे आत्मार्के तथा च श्रुतिः बण्महां असि सूर्य बळादित्य महां असि ॥ महस्ते सतो महिमा पनस्य
तेऽद्धा देवमहां असीति बट् इत्युद्दाशब्दो ऽत्यन्त स्तवचने पनस्यते पूज्यते व्यष्टौ तु हे सूर्य आत्मन् त्वं बण्म
हानसि कुत इत्यपेक्षायां सर्वावधिर्यात् हे आदित्य अदितिः कार्यं रूपं तद्विरोधि अरो दायं तत आगत आ
दित्य दित्यादित्यपत्युत्तरपदाण्यदित्यनुशासनवत्र अतो बण्महानसि हे महः चेतन्य सतस्ते सर्वं बाधा
वधिभूतत्वात्सन्यस्य तव महिमा सर्वावभासकत्वरूपः पनस्यते अत एव अद्धा देव साक्षादहं त्वय प्र१

दोअवखंडने द्यति स्यति मा स्था मितिक्ति तीत्यनुशासनात् दितिः १

आत्मा० १०६

नद्योतमानमहानसिकिमन्यद्धक्तव्यंत्वंसर्वसाक्षित्वादित्यर्थः स्तु चिरंजिष्णुसर्वदानिरंतरं आत्मार्क
मेवस्मरेत्यर्थः॥११२॥ जगदृष्टीतिजगद्दृष्टीनित्यंचरतिविपुलव्योमनिरविःस्वसेवारक्षणेविनरति
मनोवांछितमिह॥ अनंतंप्रेक्ष्य॥११३॥ हेविपुलमहतपरममहतोप्यात्मार्कस्यग्राहकत्वात्सो
ऽपिमहत्त्वमुपचरितंयद्वाउदारोहेहरयरविरात्मार्कः जगत्लोकत्रयात्मकंस्थूलसूक्ष्मकारणशरीर
रूपंचदृष्टीन्त्रितिताचक्षुल्यादिष्वेर्थेषुतन्पश्यन्सन्व्योमनिविभाषाडिश्योरितिपक्षेत्रलोपा
भावः अंतरिक्षेऽतःकरणेचनित्यंचरतिनिरंतरंगच्छतितथा चश्रुतिः आकृष्णेनरजसावर्तमा
नोनिवेशयन्नमृतंमर्त्यंच॥ हिरण्ययेनसविनारथेनादेवोयातिभुवनानिपश्यन्नित्यर्थः [illegible] कृ अस्या
ष्णेनअहःस्वरूपंरात्रिःशुक्लंचाहरर्जुनमितिनिरुक्तात्रात्रिरूपेणागमनेनरजसाज्योतीरजउच्य
तइतिनिरुक्तात्दिनरूपेणागमनेनआवर्तमानःपुनःपुनरागच्छन्नमृतंरोत्रोरिविज्योतिर्मयंलोकं
निवेशयन्स्वव्यापारेशंस्वपन्तथामर्त्यंमर्त्युलोकदिवाभूमौनिवेशयन्स्थापयन्हिरण्ययेनज्यो
तीरूपेणरथेनमंडलेनवस्तुतस्तुब्रह्मांडात्मकेनरथेनहिरण्यगर्भस्यब्रह्मांडवाचित्वात्भुवनानि राम
त्रुष्यतरिक्षस्वर्गरूपाणिपश्यन्साक्षात्कुर्वन्देवःप्रत्यक्षद्योतमानःसूर्यःआयातिआगच्छति १०८

यथोक्तकृष्णेनकर्ममार्गेणरजसाज्ञानमार्गेणअमृतंलिंगशरीरंमर्त्यंस्थूलशरीरंहिरण्यवत्प्रियेणरथेनबुद्धि
रूपेणवस्तुतस्तुपिंडात्मकेनरथेनभुवनानिस्थूलसूक्ष्मकारणशरीराणिशेषसमानंकिंचहेमनःइहभूलोके
देहेचस्वसेवारक्षणांस्वस्यात्मार्कस्यसाक्षात्सेवाअग्निहोत्रहोमादिःजपध्यानादिश्चरस्य [illegible] गेषुस्थिर हिन
हृद्यात्रभोजनादिश्चतत्रक्षाःकर्तुंसमर्थाःतेषांवांछितंभोगस्वर्गापवर्गरूपंवितरतिददातितथाचश्रु
तिःएषवृआपन्नत्रयमारेवहतयोऽकएवतत्रावस्यानिदुष्कराः॥ नयेशेकुर्यज्ञियांनावमारुहमीर्मेवतेन्य
विशंतकेपयइतियेप्रथमाःब्राह्मणाःदेवहतयःदेवार्थात्हूतपआहूतेपायेषांतेयापजन्काःअवस्यानि
यशस्कराणियद्वाश्रन्ननामसुपाठात्अवोन्नंतस्यसंपारकानिदुष्कराणिदुरनुकराणिर्यत्येशितानिरुक्तात्दु
ष्कराणिकर्माणिज्ञानानिचअकृएवतकृतवंतःतेहिरण्यशरीराःहिरण्यशरीरस्तुर्वःस्वर्गलोकमनीतिब्रा
ह्मणात्एषवकदुःखप्रचुरात्संसारात्छिन्नाःसंतःप्रापन्कर्मफलंभोगस्वर्गापवर्गरूपंप्राप्तवंतःअयाप
जन्काअन्याहपेब्राह्मणाःसंतःयज्ञियानावपागरूपानारिआरुहंआरोढंनशेकुःनसमर्थाःबभूवुः
तेब्राह्मणाःसंतोपिईर्मेवइहेवअनुपस्तोकेन्यविशंतन्वगादिरेणोतेअधमयथभूतेदेहेप्रविष्टाः अतएवकोपि
यःकुत्सितःइत्यर्थःअतस्तंप्रेक्ष्यत्वंशरणमनिशंस्वपरिहरंभ्रमंत्यक्त्वासर्वमहतिस्तुचिरंजिष्णुमहः॥११३॥

स्वरोगघ्ना इति स्वरोगघ्ना लोकाः श्रुतिविहितपूजादिकुशला यतो लब्ध्वा कामान् सुखिताः उद्धतिं जुतिस्तुष्ट
ठाः॥ अनतस्तं प्रेक्ष्य०॥१९४॥ स्वरोगघ्नाः स्वस्य शरीरस्य रोगमामयं घ्नंति नाशयंतीति आरोग्यकामा इत्यर्थः
अतोपि श्रुतिविहितपूजादिकुशलाः वैदिकानुष्ठानाद्याराधनतत्पराः लोकाः ब्राह्मणादयः यतः आत्मा
कीर्तकामात् आरोग्यादिसुखमनोरथान् लब्ध्वा प्राप्य सुखिनः प्रसन्नमनसः सुदृढाः बलवद्देहाः तिष्ठ
ति तनु रोगनाशार्थमित्र स्तजो देवांतरं गच्छंति तद् घ्नत्रघ्नमित्रमह आरोहंतु तरां दिवं॥॥ हृद्रोगं मम सूर्य ह
रिमाणं च नाशयेति श्रुतेः हेमित्रमहः तथास्म भ्युमिति श्लोके व्याख्यातं सूर्य आत्मार्क हरिमाणं धर्मादि सु
नाशकं च कारतात् हृशशत्रु शरीरगत हरितवर्णं च शोषस्पष्टं अनतस्तं प्रेक्ष्य त्वं शरणमनिशं स्वपरिहृढ
भ्रमं त्यक्त्वा सर्वं महति स्तु चिरं तिष्ठ महसि॥१९४॥ पठंतविति पठंतो ज्ञानार्थं सद्गुरुपरिचर्यासु निरताः यतः
सिद्धिं लब्ध्वा विरधीति विनाशं स्वतमसः॥ अनतस्तं प्रेक्ष्य०॥१९५॥ सद्गुरुपरिचर्यासु निरताः सद्गुरोरध्यात्मवि
द्या [illegible] द्युपदेष्टुः [illegible] ष्टुः एतेनाध्यात्मविद्या विद्यानामिति भगवदुक्तेः अध्यात्मविद्यायाः श्रेष्ठ
तदुपदेष्टुः शोभमानत्वं च द्योतितं परिचर्यासु सेवासु निरताः तन्मात्रमनस्काः शिष्याः तल्लक्षणं तु ब्रह्म
चारिप्रकरणे याज्ञवल्क्य आह कृतज्ञाद्रोहिमेधाविशुचिकल्यानसूयकाः॥ अध्याप्या धर्मतः साधु

शक्ताप्तज्ञानवित्तदा इति अत्र विशेषणपरंपरा महिम्नैव शिष्यत्वबोधाद्विशेष्यपदं नोपात्तं ज्ञानार्थं चिरं चिद्दूवेका
येव तत्त्वस्मै प्रयोजनाय पठंतो ऽभ्यस्यंतः संतः यतः आत्मा कीर्तसि·द्धिं लब्ध्वा तत्त्वविद्यां प्राप्य स्वतमसः स्वा
नर्थहेतोः स्वरूपाज्ञानस्य विनाशं विरधंति प्रध्वंसं कुर्वंति कृतार्था भवंतीति यावत् तमेवं विद्वानमृत इह भव
ति नान्यः पंथा विद्यतेऽयनायेति श्रुतेः परस्मैपदं तु क्रियाजन्यफलस्य परगामित्वद्योतनाय आत्मनः परमार्थ
तो नित्यशुद्धबुद्धमुक्तस्वभावत्वात् अनतस्तं प्रेक्ष्य त्वं प्रेक्ष्य त्वं शरणमनिशं स्वपरिहृढ भ्रमं त्यक्त्वा स
र्वं महति स्तु चिरं तिष्ठ महसि॥१९५॥ क्षितीशा इति क्षितीशाः संपूर्णाः सुकृतफलधात् भगवतो यतो लब्ध्वा
राज्यं स्वजनविभवा यांति पृथ्वीं॥ अनतस्तं प्रेक्ष्य०॥१९६॥ संपूर्णाः सुकृतसंपन्नाः क्षितीशाः राजानः रा
जपुत्रा वा यतः आत्मा कीर्तराज्यसंभोगत्याचराजधर्मप्रकरणे या॰ज्ञवल्क्यः स्वाम्यमात्यजना दुर्गको
शो दंडस्तथैव च॥ मित्राण्येताः प्रकृतयो राज्यं सप्तांगमुच्यते इति लब्ध्वा पुण्ये विहिते तु प्राप्य स्वजनवि
भवाः शोभनलोकसंपत्तिं पृथ्वीं यांति आसमुद्रकरग्रहणे नरक्षंतिं कीदृशात् आत्मा कीर्त सुकृतफलधा
तुः सुकृतं विहितं कर्म तस्य फलं सुखं तस्य प्रापयितुः पुनः कीदृशात् भगवतः एकाग्रचित्तः इति श्लोके
व्याख्यातः एतेन स्वल्पकर्मणोऽपि आत्माकानुग्रहान्महती सुखप्राप्तिर्भवतीति ध्वनितं अनतस्तं प्रेक्ष्य

आत्मो:
१०८

त्वशरणमनिशं स्वपरिवृढमभ्रमन्यन्कासर्वे महतिस्तु चिरं निष्ठमहसि॥११६॥ कुसीदाद्दाविनि कुसीद
दोसम्पद्ः यतमनसस्तोषनिरतायतो लब्धालाभविपुलवसवः संतिवणिजः॥ अतस्तं प्रेक्ष्य॰॥११६॥
कुसीदार्दो कुसीदं वृद्ध्यर्थं धनप्रयोगः आदिग्रहणात् कृषिवाणिज्यया पशुपाल्यानितत्र सम्यक् अशी
तिभागो वृद्धिः स्यात् मासि मासि सबंधके॥ वर्णक्रमा च्छतं द्वित्रिचतुःपंचकमन्यथा॥ कांतारगास्तु दश
कं सामुद्रा विंशकं शतं॥ रघुवीस्वकृतावृद्धि सर्वे सर्वासु जातिष्वित्यादि व्यवहारशास्त्रानुसारेणानि
यतमनसः लोभानभिभूतचित्ताः अतएव तोषनिरताः तोषः अधिकलाभेच्छाभावः तत्र निरतानि
श्चलाः एवं भूताः वैश्याः यत आदिम्पस्य सदा पूजातिलकं स्वामिनस्तथा॥ महागणपते श्चैव कुर्वन्ति
वृद्धिमवाप्नुयादित्यादि ज्ञवं वा धितेत्यक्त स्मृतिः पूजालुष्यासन्माकीन लाभं लब्धा प्रयुक्तस्य धन
स्य वृद्धिं प्राप्य विपुलवसवः संतिप्रभूत धनावंतो भवंत्यस्माकीमोनुग्रहात् तेषां कदाचिदपि
चोरादिभ्यो धनक्षयो न भवति किंतु वर्द्धत एवेति भावः अन्येषां वणिजां तु धनक्षयो भवत्येव दृष्टो
विपश्चीन्वेकनार्थं अहर्दृशान्तकन्वा पणी मिरेष्ठा पुः सर्वा न्वेकनायनहर्दृशः सर्वदृशो यस्मा
न्महानिपश्यति तत्परायणा जेवाऽभिभवति कर्मणायणीश्च वणिजइति निरुक्तौ तत्परायणा इति पर राम
१०८

लोके किं भविष्यतीति न जानंतीत्यर्थः वेकना वेकनायनकुसीदिनः वेकनाटाः खलु कुसीदिनो भवंती
ति निरुक्तात् अतस्तं प्रेक्ष्य त्वशरणमनिशं स्वपरिवृढमभ्रमन्यन्कासर्वं महतिस्तु चिरं तिष्ठ महसि॥११७॥
तथैवेति तथैवान्ये लोकाः परदुरयमभीक्ष्य प्रतिदिनं स्वकर्तव्यसक्ताः कृतपरिकराः संतस्तु खिन्नाः॥
अतस्तं प्रेक्ष्यः॥११८॥ आत्मार्कपूजापराः एवं स्वकर्तव्येषु स्वधर्मा विशेषिकर्त्तव्यं विविधं शिल्पं तत्र
सक्ताः तन्मात्रमनस्काः कृतपरिकराः रचितोद्योगाः अन्ये लोका द्विजभिन्नाः सर्वे मनुष्याः प्रतिदिनं प्र
त्यहं परदुरयं पयस्याम्माकेस्याविर्भावं अभीक्ष्यानुलक्ष्य कृत्यस्तु खिन्नः संतिपूर्वं पुरात्माकीनुग्रहात् ध
नं बहुलब्धं अघासमन्पोषकउरेति स्वयमेव नः सर्वान्मनोरथान्पूरयिष्यतीति निश्चित्य स्वस्थमनसो भवं
तीत्यर्थः अथवा आसक्तिप्रयत्नस्तु खानामुत्तरोत्तर प्रतिपूर्वं पूर्वस्य कारणत्वात् तथैवान्ये लोकाः परदुर
यमभीक्ष्य प्रतिदिनं स्वकर्तव्ये सक्ताः संतितत्तस्तथा कृतपरिकराः संतितत्तस्तथा सुखिनः संतीतियो
जनीयं अतस्तं प्रेक्ष्य त्वं शरणमनिशं स्वपरिवृढमभ्रमन्यन्कासर्वं महतिस्तु चिरं तिष्ठ महसि॥११८॥
समस्ता इति समस्ताः पदक्ताः सुपरिचितनीर्थाणतमपदाउदाराः दृश्यंते निजपरयविद्याकृतजनाः॥ अत
स्तं प्रेक्ष्य०॥११९॥ समस्ताः सकलाः यद्वा समीचीन आत्माकीराधकत्वात् अस्तश्चिंतलयीपषांतेय

आत्मा: १०८
दृष्टाः पश्यात्मार्कस्याराधकाः योगिनः स्वपरिचितनीर्थादृश्यंपेनेसु नराममम्य स्नानिशास्त्रादीनि शोभना
निर्येस्तेनत्ताद्विगः सा क्षात्क्रियतेऽन्यथे: अतएवगतमहाः न चाहंकारादृश्यंपेने अतएवासराः अध्या
त्मविद्योपदेशादात्मारः अहंताममताशून्यत्वान्महान्अध्वदृश्यंपने इदानीरोदान्त्यमहतोऽरितिपार्वः अत
एव निजपदं पवित्रीकृतेजनाः निजपदेन आत्मादिदेशस्वस्थानेन पद्मोभिन्नाकालेस्वचरणेन अपवित्रोऽप्रशान्तः सोपि पवित्रः प्र
शान्तः कृतः संपादितः पवित्रीकृतः जगोपि येनेत्यादृशादृश्यंपेतेतथा च श्रुतिः हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दु
रोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतमिति अस्मिन्मंत्रे आत्मा कोविभूतिभिः स्तूयतेतेनहंधि
शोनोपासनात्संदशात्रपेतथाहि हंसः समष्टिरूपः शुचिषंतशुचौ तमोमलान्विते दिवि सीदतीति तिष्ठतीति हिनहद्भ्मदस्तथे
पहासीदितिक्षिणपति अपरिच्छिन्नस्यात्मार्कस्य परिच्छेदकरणात्कृशः पश्यास्वं वरसर्पुसः कारागृहे निरोधात्क्लेशाः
वसुत्वरत्र हंसः समष्टिरात्मा शुचिषत् श्रवणमननिदिध्यासेन हत्वालिते कारणशरीरे भासमानो भवति वसुः लोकवा
सापयिता समष्टिर्वायुरूपः स्वरूपः अंतरिक्षसत् उभयोर्द्यावापृथिव्योरंतराले सदागच्छतिवसुर्व्यष्टिः प्राणरूप आत्मा अं
तरिक्षसत् लिंगशरीरे स्थितो भवति होता आवाहनस्य कर्त्ता सपिता अपुभावहापुभावहेत्यावाहयति तदेव होतु होतत्त्वमि एम०
तिब्राह्मणात् अधिदैवतेकर्त्ता चित्र अग्निमग्न आवहेति कल्पसूत्रात् समष्टिरग्निरूपः स्वरूपो वेदिषत् अग्निविहारभूमिर्वेदिः त १०९

त्रयाज्वल्यमानत्वात्तिष्ठतीति होता व्यष्टिः हवनीयनायमाज्यादीन्यालेकानानां अर्पिता देही आत्मा वेदिषत् तनुस्थो भवति अतिथिः अ
ध्वनीनः दुरोणसत् दुरोण इति गृहनाम दुःखाभवंति दुःखप्रा इति निरुक्तात् गृहे स्थितो भवति सर्वं प्रीतपेहजना यहतिभावः अध्या
त्मेतु अतिथिः अतसाततसगमन इति धातुपादात् निरंतरं सर्वार्थेश्ववर्त्तमानः मनोरूपा आत्मा दुरोणसत् उरसि उदरे इति षृति अधि
दैवतेतु अतिथिश्चन्द्रमोरूपः स्वरूपः दुरोणसत्तिथी मांश्चहन्नयेकाले तिष्ठतीति नृषत् व्यष्टिरूपेण समस्तात्मत्वेपि मनुष्येषु भासमा
नः समष्टिः परमात्मा स्वरूपः अतएव नारायण इत्युच्यते नृषत् व्यष्टिः मनुष्यशरीरे स्थितिरिति आत्मा अतएव नर इत्युच्यते व
रसत् वरं श्रेष्ठात्मकं शुद्धसत्वप्रधानमायारूपं समष्ट्यात्मकं तत्र तिष्ठतीति वा अतिवरसत् श्रेष्ठादकस्वरूपः अतएव ईश्वर इत्युच्यते मलि
नसत्वप्रधानाविद्यावच्छिन्न आत्मा अतएव जीव इत्युच्यते ऋतसत् ऋतं सत्यं मायानुपहितं चैतन्यं साक्षात्तदाश्रितः समष्टिः
स्वरूपः अतएव सर्वसाक्षीत्युच्यते ऋतसत् ऋतः अविद्यानुपहितः बिंबरूपः स्वरूपः तदाश्रित आत्मा अतएव व्यस्तप्रपंचसाक्षी
त्युच्यते व्योमसत् परमे व्योमन्निति स्मृपरमे व्यवन इति निरुक्तात् विशिष्टं पालनं यस्मिन् तत् ब्रह्मदर्शने सत्वं तत्र स्थितः समष्टि
ष्टिः स्वरूपः व्योमसत् सत्वमात्रगम्यः समस्ताधारो व्योमाः स्वरूपस्तदाश्रितः प्रतिबिंब आत्मा व्यष्टिः अब्जाः अब्भ्यो वा एष प्रातरुदे
त्यपः सायं प्रविशतीति ब्राह्मणात् समुद्रवासिनो हृदयाद्भ्यो जातः स्वरूपः व्यष्टौ तु अब्जाः रेतो वा आप इति अब्जा इतः क्षिप्य
तेरेतसः अब्जाः अब्जा यं तरति च ब्राह्मणात् शरीरपुरुषाणां हृष्टारेतसो जात आत्मा गोजाः गावः किरणास्तेभ्यो जाता तेनापि

आत्मा॰
११०

तदर्थस्यापि तु गोजाः शुभाहृतिकरौर्जापितः कृतजाः शुद्धचैतन्यात्मा जातः सूर्यः अपि तु कृतः सूर्यः तस्माज्जातः आत्मा तथा सत्त्वभ
पः सर्वात्मत्वं [redacted] सर्वदा कुतो न दृश्यत इति चेत्तत्राह अरिजाः अरिरेव व्यापक
पर्वतः सुमेरुस्तस्माज्जातः अपि तु अरिः शरीरपर्वतः तस्माज्जातः गुहा अरिः ग्रसनरूपा घटादिकानि शान्तरूपमेघाच्छादय
त्रिशान्मेघनामत्वं शिशब्दस्य पापतते योऽज्ञातः सूर्यं तमिस्रहन्तोऽप्रादुर्भूत इत्यर्थः अपि तु अरिरविद्या आत्माच्छादिका तेन ज्ञातः तिमि
स्रहन्तो प्रादुर्भूत इत्यर्थः ननु ज्ञातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य चेति भगवद्वचनात् कदाचित्प्रादुर्भूतस्यापि तिरोभावः स्या
त्तिरोभूतस्यापि प्रादुर्भावः स्यादित्याशंक्य समाधत्ते असिते आत्मा कर्मायानुपहितं चैतन्यं भवति स संज्ञानमनन्तं ब्रह्मेति श्रुतेः
रात्मस्वरूपं भावः श्रोपनिषद्गायत्र्युपासनमहिम्नास्वोपाध्यविद्यानिवृत्तौ जीवस्वरूपात्मकत्वात्माभवतीति ततस्तु ज्योतीरूपस्य
तस्य तमःसंबन्धाभावात्सर्वदा स्वभाव एव भतीति तदास्य एव जीवो ऽकारस्त्वं च्युते एवं शुद्धसत्त्वप्रधानमायावच्छिन्नोनारायण
णः सूर्यः कालपर्यायैः सर्वेषु जीवेषु श्रोपनिषद्गायत्र्युपासनमहिम्ना सूर्यभावं गतेषु सत्सु सूर्यस्य जीवसमष्टित्वात् श्रोपनि
षद्गायत्र्युपासनमहिम्नैः स्वस्वोपाध्यविद्यानिवृत्तौ सत्यां स्वं स्वं सच्चिदानन्दब्रह्मात्मको भवति सकलसंसारकारणत्वात्त
भावाब्रह्मण्वनरावर्तते इत्युपनिषत्साः भिहितमिति वदति स्म सूर्यः सुमायास्यानादिनिधनत्वप्रख्यात्जीवः एवं सूर्यात्मको भवतीति
तु तत्त्वतस्मादविद्योपाधिकेन जीवेन स्वाविद्यानिवृत्तये सूर्य एवोपास्य इति सिद्धम् अनन्तमेव सत्त्वशरणम् निःशेषं परिहृ ११

इत्यर्थं मत्वा सर्वमहति सुचिरं तिष्ठमहसि ॥ ११९ ॥ रहोभीत्यक्ता तु पहास्यतां विराकुर्वन् त्वस्येश्वरपारं तन्मेव योऽन्तपरत्व
र्थं यत्कृत्यं जरमानं रमाशाः ज्ञेयथा मतीजित्यथा मतिर्यथोक्तं तस्मरशं मो ईश्वरप्रीतये क्षमयामि हं सगतेया
नरच्छ्रसद्धुरूपः ॥ ततो तु सतां प्रभुः स्वरूपपरंपराः सर्वदा प्रवर्तितजनो स्त्रियः सकलवृत्तिसाक्षी हरिः ॥ १२० ॥
मयाश्रविद्योपाधिनाजीवेन यथामति यावती स्तुतिरग्रहाद्वेजसमो ऽभिभवसम्बोद्धं कुजन्यावृद्धि
स्फूर्तिः स्यामनतिक्रम्य स्मरणं स्मयन्ते पुराणादिषु वेदानां च चतुर्दशसु विद्यासु ग्रन्थो नार्थो येन नादृशो ग्रं
थरचनं कृतं स्वल्पत्वजन्यभयलज्जाविहाय विहितं कस्मै प्रयोजनाय ईश्वरप्रीतये मायापाधेः
सर्वनियन्तुः सूर्यस्य संतोषाय यथा यन्त्राय प्रतिरात्राप्रीतिर्भवत्यस्वाक्यं करोति तस्मिन्नन्यैरा
जः प्रीतिर्लोके दृश्यते तथा कतिमलनष्टमुक्तं ज्ञानं प्रतिवेदिको द्वारा यत्न संतोषाय च सूर्येण प्र
रितो हं ग्रन्थरचनं कृतवानस्मीति भावः समस्तान्मसूर्य प्रेरणां तु नारायणो नम स्तुतान् नरैश्च वनरो जनं ॥ १
वीसरस्वतीचैव ततो जयमुदीरयेदित्यात्मकतस्यार्थः नारायणं नराणां मनुष्याणां समूहः समस्तस्य
त्वेपि मनस्य मात्रगम्यत्वात् अयनं स्थानं यस्य तं नारायणं सर्वेनमस्कृत्य सर्वोत्कर्षेणोपास्य मन्वा
नरोत्तमं नराः पञ्चजनाः ब्राह्मणक्षत्रियवैश्यशूद्रम्लेच्छाः तेषु साक्षादाराधकत्वात् सर्वयाजनेन स

Dr. Bhau Daji Memorial

आत्मा ११९ वेष्टसाधकत्वात्सर्वोपदेष्टृत्वादुत्कृष्टं नरं ब्राह्मणं चैव नमस्कृत्येव उपासकत्वादुत्कृष्टमन्येव
आदित्यमीक्षेदेवसवितरेषते ब्रह्मचारी तंगोपाय समामृतेत्याचार्यदुक्तउपनयनकल्पसूत्रात्र हेऽत
सत्यसूर्यसः ब्रह्मचारिरक्षकस्त्वमां ब्रह्मचारिणुपदेष्टारंब्रह्मचारिणारक्षेत्यर्थः अमृतेनिपरत्नो
दयक्षेमामामित्यर्थः परलोकेतुनरोत्तमं सर्वसमत्वात्पुराणप्रसिद्धं सर्वदेवमान्यं नरं चैव बृहस्पतिं
नमस्कृत्येवतथा सूर्यसमत्वादुध्यंनमस्कृत्येव अध्यात्मेतु नारायणो नरो मनुष्यदेहः अयनं यस्य
सः नारायणः स्वार्थेतद्धितः सएवनारायणः एतेन सूर्योपासको जीवः सूर्यो भवतीत्यभिध्व
नितं आपोनाराइतिप्रोक्ता आपोवैनरसूनवः॥ अयुनंतस्यताः पूर्वं तेननारायणः स्मृतइति
पुराणाद्युक्तं नारायणमात्मानंनमस्कृत्यदेहेंद्रियमनोधीचैतन्यसंपादनेनसेव्यत्वेनचोत्कृष्टम
त्वात्पुराणार्थस्तुव्यष्ट्याभिप्रायेण आपोरेतोरूपाः नाराः नरसंबंधित्वादितिप्रोक्ताः प्रकर्षेणाक
र्षिताः प्रकर्षस्तुनरदेहेनसोसूर्योपासनयोग्यशरीरहेतुत्वात्पत आपोरेतांसिवेप्रसिद्धं नरसून
वः मनुष्यशरीरदृत्पत्तावितिना रेतोरूपा आपः पूर्वं सूर्यप्राप्तेः प्राक्कालेतस्यात्मनः अयनंस्था
नंभवतिएतेनसूर्योपासनमात्मनिकुंभिततेनतेः संबंधभियासावित्र्यागायत्र्यासरस्वत्याकत्री राम ११९

व्यमेवोत्तमानामितिध्वनितंतेनतेरेतसिस्थितत्वेन नारायणः स्मृतः नतु सूर्यप्राप्त्यनंतरमतएवतः सूर्यसायुज्यादि
तिनरोत्तमदेहेंद्रियमनोधीषुयोषकत्वादुत्कृष्टं नरं चैव नरत्वापादकरसंनंनमस्कृत्येवरस्यस्निग्धस्थिरहृद्यात्मभी
त्यासत्वगुणवर्द्धनात्पायनिवर्त्तनादुत्कृष्टमन्येवतथा श्रोत्रंसकलार्थश्रवणेनसकलार्थसिद्धेरुत्कृष्टमन्येवदे
वीपुयोगाहारव्याप्याभिन्नत्रिलिंगधानात्देवः स्वर्गः तत्प्रापिकासावित्रीगायत्रीउपासनसाधनभूतातदुपास्यार्था
सकार्थबोधिकाचसरस्वतीचैवसरस्याप्यायनात्सर्वेषामागमनादादित्यो ब्रह्मतत्प्रतिपादिकावाचं नम
स्कृत्येव अपुनरावृत्तिसाधकतमत्वादुत्कृष्टामन्येवततः सरस्वतीतः प्राप्तजयं जयः आदित्यप्राप्तिरूपः सा
स्मिन्नसीतित्रशीआद्यच्जयःतेमहाभारतादिग्रंथमुदीरयेततदुच्चारेप [illegible] तयद्वासवितृपदप्रापिकायाः
सावित्र्याः गायत्र्याणाद्गायत्र्याः चतुर्विंशत्यक्षरायाः उपास्योयासकस्वरूपाद्वितीयब्रह्मप्रकाशिका
याः उपासनसाधनभूतायाः सरस्वत्याः सकाशाज्जयं सूर्यपदप्राप्तिरूपंतद्द्वारासच्चिदानंदब्रह्मवाप्त्या
त्मकंचोदीरयेतशिष्यान्प्रतिप्रतिपादयेत्नरं चैवेत्यत्रैवकारस्तुउपासकांतरोत्कर्षव्यावृत्त्यर्थः सरस्वतीचै
वेत्यत्रैवकारः साधकांतरोत्कर्षव्यावृत्त्यर्थः ततः शब्दस्य व्याप्तद्रुत्पर्थस्तु पक्षएवाव्यावर्तकत्वात्
वाचोव्यापकत्वात्यावद्ब्रह्मविष्ठितंतावतीवागितिश्रुतेः उदीरणंवाग्व्याप्तिमंतरानुपपन्नमित्याश्ये

पत्नीमानसरस्वतीं व्यासमितिपाठस्तुप्रामादिक एव व्यासस्य नरनारायणयोरंतर्भूतत्वात्तन्नमस्कारेणैव तन्नम
स्कारसिद्धेः स्वग्रंथादौ स्वनमस्कारकथनस्य योग्यत्वाभावाच्च उक्तं युक्तं अजयमुदीरयेदिति लिङ्गात् तादृशजयो
दीरणस्या॰ प्रामस्य प्रापणादवश्यकर्तव्यत्वात् ब्राह्मणस्य तादृशजयोदीरणमावश्यकमिति सिद्धं अतः कारण
देहे सद्रूपः सतो मे त्सगानभिभूतायेषार्थ्यादिणी च बुद्धिः प्रज्ञायेवातेन तादृशाः पूर्वं इह मत्कृते के तादृशजयसा
धके ग्रंथस्य चैनयद्वाक्यसंगतेयोग्यत्वादुत्तरत्वायोग्यं च तदुभयं स्वमद्वंभावावबोधनेन सह ध्वंकिं च हृदिस्थः अतः करणा
न्तर्यामितया स्थितः अत एव प्रवर्तितजनः स्वस्वकार्ये नियोजितलोकः अत एव सकलवृत्तिसाक्षी संपूर्णा
ध्यवसायादिकरणव्यापारद्रष्टा यः स्वयं अस्ति अनेन लिंगेनानुभूयते इत्यर्थः तथा चेदं स्वयं प्रेरणायैव कृतं
न तु स्वतंत्रेणामयेति भावः सः सर्वजनहृदयस्थः सतोऽस्माद्भावतो ब्रह्मविदां युष्माकमस्माकं च प्रभुः पालकः स्वयं
सर्वदा निरंतरं सुखपरंपराः कल्याणपंक्तीस्तनोतु विस्तारयतु ॥१२०॥ एवं षड्पदे शेते स्तमोयत्नाशितं त्वया ॥ आ
त्मस्वयं ततः सर्वमस्माकं काममापूरणम् ॥ ६ ॥ आत्मा कीर्जयीति सदा निजपूर्वकाशाघट्टाधाद्भवतितमोमलस्य
नाशः ॥ तेद्भवतुः कृतिरियमेवमेऽस्तु जेत्री व्याख्यानाशुकजीतभक्तेः कृतीना ॥ ७ ॥ ॥ इति श्रीसदावेदांतसि राम
द्धांतानुभवानंदानंदितकालापनामकाहिताग्निविश्वनाथभट्टात्मजगोविंदभट्टकृत आत्मार्कबोधे आत्मा ११२
सोमयाजी

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

कैश्वर्यकथनेनामषष्ठउपदेशः॥ ॥समाप्तोयंग्रंथः॥ ॥: :॥ :॥लीःदेसीनीकायथ:
संवत १८०३ ॥: मीती अगहणमासे सूकुलपक्षे रवीवासरे:॥ :॥ :॥ :॥ छु:॥ :॥: ॥:
हहआतके॥ अन१ हप भ२ मगां१० गना६ कुला रा४ स घा१२ वणिजो७ चदिवाकरादितुंगा ४॥ दशा१०शिरस३
मनु पुव२८ तिथी १५ द्रियांशे ५ स्त्रिन वक्ष२७ विंशतिभि२० स्तेसा नी चा:॥१॥